# Chanakya Niti
(Sanskrit Verses, Grammar & Meaning)

# Cāṇakya Nīti
(Saṃskṛta Verses, Grammar & Meaning)

# चाणक्य नीति
(**सुभाषित**, **व्याकरण**, **अर्थ**)

*Kishore Nayak*
*Padmakar Gangatirkar*

अहं, विष्णुं प्रणम्य, लोकानां हितकाम्यया, नानाशास्त्रोद्धृतं,
धर्मोपदेशविख्यातं, कार्याकार्यं, शुभाशुभं संप्रवक्ष्यामि॥

-आचार्य चाणक्य

After bowing to Lord Viṣṇu*, I will now state, for the benefit of the people, those actions that are right or wrong and those that should be or should not be done, as written in various scriptures and as per Dharma.

-Ācārya Cāṇakya*

.★★★★★★

## * A Note to Readers

The English alphabet has 26 letters; whereas the Sanskrit alphabet has 52 letters. One cannot transliterate a Sanskrit word unambiguously using only 26 English letters. Therefore, in this book, we are using the International Alphabet of Sanskrit Transliteration (IAST) to spell the Sanskrit words. However, the book title is in Standard English alphabet due to its historical spelling and for easy search. It is spelled as "Cāṇakya Nīti" in the rest of the book along with other Sanskrit words. Please see page 13 for explanation of this International Alphabet.

We have also used British spellings as opposed to American spellings for few words as this book is published in many other countries where British spellings are routinely used.

The verse number in this book refers to the chapter and number in the original Chanakya Niti book.

## Table of Contents


Preface (लेखक परिचय) ........ 7

Introduction (पुस्तक प्रस्तावना) ........ 9

Brief Saṃskṛta Grammar (संक्षिप्त व्याकरण) ........ 11

Chapter 1- On Hindu Philosophy (तत्वज्ञान) ........ 17

Chapter 2- About Family & Friends (कुटुम्ब: च मित्राणि) ........ 47

Chapter 3- People Charactristics (जनगुणा:) ........ 63

Chapter 4- Importance of Knowledge: Vidyā (विद्या) ........ 95

Chapter 5 - About Wealth (संपत्ति:) ........ 113

Chapter 6 - Life Observations (जीवन निरीक्षा) ........ 121

Chapter 7- That is the Way it is (वस्तुस्थिति:) ........ 141

Chapter 8- Do's and Don'ts (कार्याकार्यम्) ........ 165

Chapter 9 - Miscellaneous Verses (सङ्कीर्ण सुभाषित) ........ 187

Chapter 10- Modern Cāṇakya (आधुनिक चाणक्य) ........ 201

Epilogue (सारांश) ........ 217

References ........ 218

## Preface (लेखक परिचय)

Cāṇakya Nīti **(चाणक्य नीति)** is a compilation of Saṃskṛta (संस्कृत) Subhāṣitas (सुभाषित), known as aphorisms, by Ācārya Cāṇakya (आचार्य चाणक्य: 375–283 BCE). He was a teacher, author, strategist, philosopher, economist, jurist and a royal advisor. He is also known as Kauṭilya or Viṣṇugupta, who authored the ancient Indian political treatise, the Arthashāstra (अर्थशास्त्र). He is considered the pioneer of the field of political science and economics in India. Around 321 BCE, Cāṇakya assisted the first Mauryan emperor, Candragupta, in his rise to power.

Ācārya Cāṇakya chose these Subhāṣitas from ancient literature prior to his own time. It is not known who originally wrote them nor do we know whether some of them were written by Ācārya Cāṇakya himself. We are truly indebted to those sages and poets who composed these beautiful verses but chose to remain anonymous.

Ācārya Cāṇakya comments that by understanding the philosophy behind these verses, one would know what is right and what is wrong, what is to be done and not to be done, by individuals, family members and the rulers.

The word Nīti means ethical behaviour and/or moral philosophy related to human beings in a society. Most verses in Cāṇakya Nīti are logical, ethical, universal and pertinent even in today's world. Cāṇakya Nīti is also called a Darśana (दर्शन) which means a view, an insight, vision or an understanding or Darpaṇa (दर्पण), a mirror or an eye into the social behaviour.

The verses or chapters in original Cāṇakya Nīti are not organized by specific subjects. The same subject may be scattered in various verses or chapters throughout the book or the same verse can apply to more than one subject! In this book, I have organized the verses pertaining to a specific subject by chapter.

This book grew out of our love, not only for the philosophy in these verses but also how beautifully they were composed in the Saṃskṛta (संस्कृत) language. Both Kishore and I had studied the Saṃskṛta language in our high school years. Kishore started relearning it as a retirement activity. He has been analyzing the Saṃskṛta grammar of Cāṇakya Nīti verses as well as those from other literature since 2018. He is very thorough, systematic and is able to discuss with his peers not only the

grammar but also the interpretations of these verses. He is the true inspiration behind this book.

I could not find a published book of Cāṇakya Nīti that explained nuances of Saṃskṛta words and their grammar, except in bits and pieces, here and there. This detailed analysis brings out much better understanding of the philosophy and Saṃskṛta art of expression. I have further edited many verses with my own commentary.

It would be impossible to include in this book the detailed Saṃskṛta grammar that would be necessary to decipher the verses word by word. I have included a short primer that should be read first if one wants to further understand the verses.

Kishore and I remain students of Saṃskṛta language and her literature. This book summarizes what we have learned so far!

Padmakar Gangatirkar September 15, 2023

★★★★★★

# Introduction (पुस्तक प्रस्तावना)

Cāṇakya Nīti (चाणक्य नीति) is one of the most read ancient literatures of India. Many books and blogs have been published in several languages, which explain the literal meaning of its aphorisms.

However, none of the published books focuses on the analysis, composition and the grammar behind the beautiful Saṃskṛta (संस्कृत) verses of Cāṇakya Nīti. Many Saṃskṛta words do not have equivalent English words. So, something does get lost in just translation!

Further, while editing the composition and grammar, several questions arose about the meaning, interpretations and background of various verses. That required further learning and understanding Cāṇakya's thoughts on Hinduism, his observations about the contemporary politics and social values, his advice about what to do and not to do and what is right and what is wrong.

The content and meaning of most verses are as much valid today as they were 2500 years ago. However, there are concerns about a few of them, which deal with castes and women in an unfavorable manner. What Cāṇakya would write in today's Hindu world? I have added a few commentaries on those verses without losing the message they deliver.

Thus, my initial intention of publishing a book just on Cāṇakya Nīti Grammar evolved into much more than that!

Saṃskṛta (संस्कृत) is the oldest and most developed language in the world. The wonderful philosophies that Cāṇakya compiled are succinctly expressed in few words in well-defined poetic meters. Understanding his philosophy in original Saṃskṛta words takes its meaning to a much higher level, as some of those words cannot be adequately translated into English language.

Su (सु) means good; bhāshita (भाषित) means spoken. Taken together- Subhāṣita सुभाषित- literally means well spoken or an eloquent saying. सुभाषित is translated as an aphorism which is a concise, terse or memorable expression of a general truth, observation, principle or advice and is a literary piece of art. Most of the verses in Cāṇakya Nīti can be considered as Subhāṣita; a few others may not fulfil that definition in today's society!

The original Cāṇakya Nīti consists of 17 chapters, each chapter consisting of 14 to 23 verses on different subjects. In this book, we have arranged chapters by key subjects. Each verse in this book is identified by its chapter and number as it appears in the original and almost all other books on Cāṇakya Nīti.

These chapters need not be read sequentially. Although the verses within each chapter are related to a single subject, they are independent of each other and are self- contained for their grammar and meaning.

As stated earlier, many Saṃskṛta words do not have English equivalents, like the word, Dharma (धर्म) or Mokṣa (मोक्ष) or Karma (कर्म). We have explained them in detail whenever they appear first and then used them by the actual Saṃskṛta word in later Subhāṣitas. However, their meanings may differ contextually with a particular Subhāṣita.

The format for each Subhāṣita is to first analyze its logical and grammatical connection of words in prose format, called anvay (अन्वय), and followed by its English translation. The English translation is as close to the anvay (अन्वय) as possible. Alternate words are stated as पाठ भेद.

Any additional explanation or commentary, if needed, is provided in *italics*, followed by detailed grammar and the meaning of each word. Each Subhāṣita grammar is stand -alone. That means that one does not have to refer to some another Subhāṣita grammar for similar words.

This book should be of interest to all readers of Hindu Philosophy as expressed in Cāṇakya Nīti and especially to Saṃskṛta lovers. If one does not want to read the grammar, one can just read the English translations and understand the wisdom of one of the most reputed scholars in Indian History.

I am thankful to Shri P.R.Kanan, Shri Chary Tamirisa, Shri Nat Tembe, Shrimati Gopi Advani and Shri Nandu Kulkarni for their valuable suggestions and editing of the manuscript.

Padmakar Gangatirkar September 15, 2023

★★★★★★

# Brief Saṃskṛta Grammar (संक्षिप्त व्याकरण)

Following is a brief primer for Saṃskṛta grammar and a list of the various grammar terms and their abbreviations utilized in this book.

**लिङ्ग (Gender)**
पु.- पुल्लिंगी - Masculine - राम, नर, जन, गुरु, पितृ ,हरि, कवि etc
स्त्री.- स्त्रीलिंगी- Feminine - कन्या, नदी, प्रजा, शाला,धेनु, मातृ etc.
न.पु.- नपुन्सकलिङ्गी- Neutral - कमल, जल,मित्र, वारि etc.

**वचन: (Number)**
ए.व.- एक वचन- Singular, द्वि. व.- द्वि वचन-Dual, two,  ब.व - बहु वचन -Plural

**विभक्ति: (Case of a Noun)**
प्र.- प्रथमा- कर्ता- Subject, द्वि.- द्वितीया-कर्म -Object/Nominative, तृ.-तृतीया- करण- instrumental-Via, how, च.-चतुर्थी-संप्रदान-Dative To, For, पं.-पंचमी-अपादान Ablative-from, thru, because, than ष.-षष्ठी- संबन्ध - Genitive, Possessive, स.- सप्तमी-अधिकरण- Locative, In, सं -संबोधन- -Vocative- Addressing

**पुरुष: (Person)**
प्र. पु.- प्रथम पुरुष -He, She, It, They, म. पु.- मध्यम पुरुष- You, You, उ. पु.- उत्तम पुरुष- I, We

| English Grammar | Panini Grammar(Used in this book) |
|---|---|
| प्रथम  (1st person) | उत्तम |
| द्वितीय  (2nd person) | मध्यम |
| तृतीय  (3rd person) | प्रथम |

**धातु (**Verb)
आ.प.-आत्मने पद, प.प.-परस्मै पद, उ.प- उभय पद.  ग.-गण –१ - १०
All verbs are given with  वर्त.प्र.पु.ए.व. (Present tense Third Person singular): e.g. भू-भवति -१. प. - to be

**Examples: All कर्तरि:**
नी - नयति , पत् -पतति, भू -भवति - **१** प.प. प्र. पु. ए.  व
ईक्ष् -ईक्षते, वन्द् - वन्दते, रुच् - रोचते, **१** आ.प. प्र. पु. ए.  व
या - याति, अस् - अस्ति- **२** प.प. प्र. पु. ए.  व
शी-शेते, नु-नौति - **२** आ.प. प्र. पु. ए.  व

धा - दधाति, हा - जहाति **- ३** प.प. प्र. पु. ए. व
धा- धत्ते **३** आ.प. प्र. पु. ए. व
नश् -नश्यति , पुष् -पुष्यति, मुह् -मुह्यति - **४** प.प. प्र. पु. ए. व
जन् - जायते - **४** आ.प. प्र. पु. ए. व
चि - चिनोति, आप् - आप्नोति- **५** प.प. प्र. पु. ए. व
चि -चिनुते - **५** आ.प. प्र. पु. ए. व
इष् - इच्छति, विश्- विशति, मुच् - मुञ्चति- **६** प.प. प्र. पु. ए. व
मृ -म्रियते - **६**आ. प.प. प्र. पु. ए. व
युज्- युनक्ति, युंक्ते: **७** उ.प. प्र. पु. ए. व
तन् - तनोति,तनुते; कृ - करोति, कुरुते- ८ उ.प. प्र. पु. ए. व
क्री - क्रीणाति, क्रीणीते - ९ उ.प. प्र. पु. ए. व
कथ् -कथयति, कथयते - १० उ.प. प्र. पु. ए. व

**धातु लकार (**Verb Tense) Example : भू-१. प. - to be
वर्त.-वर्तमान काल (Present) - भवति
सा. भविष्य - सामान्य भविष्य काल -लृट् (Simple Future) - भविष्यति
अन.भूत.- अनद्यतन भूत काल- लङ् (Past Imperfect) - अभवत्
वि. - विध्यर्थ - लिङ् (Potential) - भवेत्
आ. - आज्ञार्थ - लोट् (Imperative) - भवतु

**कर्मणि प्रयोग -** object <->subject with तृतीया विभक्ति. **(भाव कर्मणि लट्लकार)**
धातु+य -> त्यज्-त्यज्यते, Mostly आत्मनेपद

**प्रयोजक** -Causative form of Verb- - e.g. गम्- to go, गच्छति- goes, गमयति- causes to go **(णिजन्ते लट्लकार:)**
कृ- to do, करोति-does, कारयति-causes to do etc.प्रयोजक धातु उभयपदी सन्ति :

**धातुसाधित अव्यय (**Indeclinable derived from Verb)
तु. हे. धा.-तुमन्त-हेत्वर्थक धातुसाधित अव्यय - गम्- गन्तुम्, कृ- कर्तुम्
पू का.वा. त्वान्त धा.सा. अव्यय -पूर्वकालवाचक त्वान्त धातुसाधित अव्यय - गम्-गत्वा, कृ-कृत्वा
पू.का.वा.ल्यबन्त धा.सा.अव्यय -पूर्वकालवाचक ल्यबन्त धातुसाधित अव्यय -with उपसर्ग धातु -आ+गम्- आगम्य

**भूतकालवाचक धातुसाधित विशेषण** ( Past Participle Adjectives derived from verbs)
कर्तरि भू.का.धा. वि -कर्तरि भूतकालवाचक धातुसाधित विशेषण - तवत् प्रत्यय - कृतवत्
क.भू. धा. वि -कर्मणि भूतकालवाचक धातुसाधित विशेषण - त प्रत्यय- गम्-गत, कृ-कृत

**वर्तमानकालवाचक धातुसाधित विशेषण** ( Present Participle Adjectives derived from verbs)
वर्त. धा.सा. वि.- वर्तमान काल धातुसाधित विशेषण

कर्तरि (वर्त.धा.सा.वि.)- परस्मै पद -अत् प्रत्यय- गच्छत्, वदत्, यच्छत्
कर्तरि (वर्त.धा.सा.वि.)- आत्मने पद (१,४,६,१०)- मान प्रत्यय - खन्यमान
कर्तरि (वर्त.धा.सा.वि.)- आत्मने पद (२,३,५,७,८,9) - आन प्रत्यय-
कर्मणि (वर्त. धा. सा. वि.)- य+मान प्रत्यय

**कर्मणि विध्यर्थ धातुसाधित विशेषण** ( Potential Adjectives derived from verbs)
क. वि. धा. वि- कर्मणि विध्यर्थ धातुसाधित विशेषण - गम्-गन्तव्य, गमनीय & गम्य, कृ-कर्तव्य, करणीय, कार्य-कृत्य.
**प्रत्यय** - an affix or suffix, **विसर्ग** (:), **उपसर्ग** -अति, अनु, अभि, आ, उद्
**सर्व नाम**: (Pronoun): अहं, युष्मद, इदम्,अदस्, etc.
A word used instead of noun.-अस्मद्-I, we, युष्मद्-you etc

**सर्वनाम विशेषण :** Pronominal Adjective
एतद्- this, इदम्- this, here etc

**विशेषण** (वि.)-Adjective - A word describing a noun

**अव्यय - Indeclinable-** (ind.) or (अ)
e.g. अपि- also, and, एव- just or just so किन्तु - but च --and इति - like this

**धातुसाधित नाम - A Noun derived from Verb**
स्वेदन - स्विद्- स्विद्यति ४ ग. प. प. to sweat, perspire
उद्यम- effort, business धा.सा. नाम of उद्+यम् -to strive hard, elevate, raise (यम्-यच्छति १ ग. प. प. To curb, restrain, stretch out)
कर्मणि विध्यर्थ धातुसाधित विशेषण -क. वि. धा. वि- Potential Passive Participle- e. g. गम्-गन्तव्य, गमनीय & गम्य, कृ-कर्तव्य, करणीय, कार्य-कृत्य; साध्य- of साध्- साध्नोति ५ ग. प. प , सेव्य: - सेव्-सेवते १ ग. आ. प. to serve, attend upon

**क्रिया-विशेषण अव्यय - Adverb-**
अतस, इतस् (both mean “from this, than this, hence”), कुतः कालात्- “since what time? **;** अत्र (“here”), तत्र (“there”), यत्र (“where” relative), कुत्र (“where?” interrogative), तथा (“in that manner, thus”), यथा (“in which manner, just as”), यदा (“when” relative), कदा (“when?” interrogative),

**समास -Compounds:**

**द्वंद्व समास-** द्वंद्व स.-उभय पदप्रधान -compounding of two or more words
इतरेतर योग द्वंद्व स - रामः च लक्ष्मणः च -रामलक्ष्मणौ
समाहार द्वंद्व स. -Grouping of similar objects - पाणिपादमुखं -पाणी च पादौ च मुखं च समाहार: - न.पु.ए.व.

**द्विगु समास -** First word is numeric (Typically न.पु.ए.व. )

एकवद्भावी -सप्तफली - सप्तानां फलानां समाहार:
अनेकवद्भावी -सप्तर्षय: - सप्त च ते ऋषय: च

**तत्पुरुष समास**- तत्पु. स.-उत्तरपद प्रधान :needs a specific case
प्रथमा तत्पु. - मध्यान्ह: - मध्य: अन्ह: - same as कर्मधारय समास
द्वितीया तत्पु.-ग्रामगत: - ग्रामं गत:
तृतीय तत्पु.- मातृसदृश:- मात्रा सदृश:
चतुर्थी तत्पु. - युपदारु-यूपाय दारु
पञ्चमी तत्पु. - सिंहभयं -सिंहात् भयं
षष्ठी तत्पु.- राजपुरुष:- राद्न्य: पुरुष:
सप्तमि तत्पु.- विद्याप्रवीण: - विद्यां प्रवीण:

**नञ् तत्पु**. - अविद्वान् - न विद्वान्

**उपपद तत्पु**.- उत्तरपद - Verb form -धनद: - धनं ददाति इति, भूपाल: - भुवं पालयति इति, विद्याम् अर्थयति इति-विद्यार्थी

**कर्मधारय समास** (कर्म.) - Both have same प्रथमा विभक्ति
विशेषण पूर्व पद - नीलवस्त्रं - नीलं च तत् वस्त्रं च
विशेष्य पूर्वपद - वीरभीत: - वीर: च असौ भीत: च
विशेषण उभयपद - शीतोष्ण - शीतं च तत् उष्णं च
उपमान पूर्व पद - घनश्याम - घन: इव श्याम:
उपमान उत्तरपद - नरसिंह- नर: सिंह इव
सम्भावना पूर्व पद - गुणबुद्धि: - गुण इति बुद्धि:
अवधारणा पूर्वपद - विद्याधनं - विद्या एव धनं
उपमेय पूर्वपद - मुखचन्द्र:- मुखं एव चन्द्र:
प्रादि - (प्रथम पद अव्यय- प्र, परा, अप, दूर, सु, वि etc) - प्राचार्य: - प्रगत: आचार्य:, विचेतन- विगत: चेतन:

**बहुव्रीहि समास** (बहु.स.) -अन्यपद प्रधान
विशेषण विशेष्य भाव नाम plus indicating third person
महाबाहु: - महान् बाहु: यस्य , पीतांबर: - पीतं यस्य अम्बर अस्ति
नीलः कण्ठः यस्य सः -नीलकण्ठः-शिवः
प्रादि - विचेतन- यस्य चेतन: विगत: अस्ति स:

**अव्ययी भाव समास** (अव्ययी स.)
अव्यय पूर्व - यथाक्रम - क्रमम् अनतिक्रम्य इति
**मध्यम पदलोप समास -**
देवब्राह्मण: - देवपूजक: ब्राह्मण:

**संधी**

१) सवर्णदीर्घ- अ+अ -आ, इ+इ-ई etc.
२) गुण- न इति-नेति, महा ऋषि- महर्षि
३) वृद्धि- तेन एव- तेनैव
४) यण्- दासी एव-दासैव, तु इति- त्विति
५) अयवायाव- (अय्, अव्, आय्, आव्)- वर्तते एषः - वर्ततयेषः or वर्तत एषः

## *Prosody (छन्द)*

Most of the Subhāṣitas are in Anuṣṭubha meter (अनुष्टुभ छन्द). If otherwise, the meter of that specific verse is identified at the end of that Subhāṣita.

| **Meter** | **छन्द** | **Syllable structure** |
|---|---|---|
| Gāyatrī | गायत्री | 8 8 8 |
| Anuṣṭubh | अनुष्टुभ | 8 8 8 8 |
| Triṣṭubha | त्रिष्टुभ | 11 11 11 11 |
| Jagatī | जगति | 12 12 12 12 |
| Aīt Jagatī | अतिजगति | 13 13 13 13 |
| Shakvarī | शक्करी | 14 14 14 14 |
| Ati Shakvarī | अतिशक्करी | 15 15 15 15 |
| Mandākraantā | मन्दाक्रान्ता | 17 17 17 17 |
| Śārdula Vikrīdita | शार्दूल विक्रीडित | 19,19,19,19 -> 12,7 |
| Kritī | क्रिती | 20 20 20 20 |
| Āryaa | आर्या | 21 21 21 21 |

## *International Alphabet of Saṃskṛta Transliteration*

| **Devanāgarī** | **IAST** | **Devanāgarī** | **IAST** |
|---|---|---|---|
| अ | a | क | ka |
| आ | ā | ख | kha |
| इ | i | ग | ga |

| | | | |
|---|---|---|---|
| ई | ī | घ | gha |
| उ | u | ङ | ṅa |
| ऊ | ū | च | ca |
| ए | e | छ | cha |
| ऐ | ai | ज | ja |
| ओ | o | झ | jha |
| औ | au | ञ | ña |
| ऋ | ṛ | ट | ṭa |
| ॠ | ṝ | ठ | ṭha |
| ऌ | ḷ | ड | ḍa |
| ॡ | ḹ | ढ | ḍha |
| अं | ṃ | ण | ṇa |
| अः | ḥ | त | ta |
| अँ | | थ | tha |
| ऽ | ' | द | da |
| | | ध | dha |
| व | va | न | na |
| श | śa | प | pa |
| ष | ṣa | फ | pha |
| स | sa | ब | ba |
| ह | ha | भ | bha |
| क्ष | kṣa | म | ma |
| त्र | tra | य | ya |
| ज्ञ | jña | र | ra |
| श्र | śra | ल | la |

★★★★★★

# Chapter 1- On Hindu Philosophy (तत्वज्ञान)

In his opening statement, Ācārya Cāṇakya stated that he compiled this book to describe the ethical and moral principles and the dos and don'ts for personal and social behaviour of individuals based on well-known teachings of Dharma as described in previous literature.

Here Dharma refers to "Sanātana Dharma" (सनातन धर्म), an eternal way of life that has been practiced by the residents of India over thousands of years.

The most important scriptures on Hinduism that preceded Cāṇakya were the Vedas (वेद), Upanishads, (उपनिषद), Rāmāyaṇa (रामायण), Mahābhārata (महाभारत) and various associated works. The tenets of Sanātana Dharma are an amalgamation of many different philosophies. There are six āstika (आस्तिक -orthodox) schools of thought; each called a Darśana (दर्शन), a viewpoint. Each darśana accepts the Vedas (वेद) as authority and the premise that Ātman (आत्मन्- eternal self) exists.

Ācārya Cāṇakya compiled many verses from these sources related to the philosophies of Hinduism. He focused on subjects like Dharma (धर्म), Mokṣa (मोक्ष), Karma (कर्म), Destiny (नियति), Concept of God, Truth (सत्य) etc. This chapter analyzes these Subhāṣitas, which are written in a lucid manner that is easy to understand and practical to implement in our daily lives.

## *1.1 Life Objectives: Puruṣārtha (पुरुषार्थः)*

According to Hindu philosophy, a successful life requires the pursuit of four objectives or Puruṣārthas, called Dharma (धर्म), Artha (अर्थ), Kāma (काम) and Mokṣa (मोक्ष).

The word *dharma* has roots in the Sanskrit dhr- धृ, which means to hold or to support. It takes the meaning of "what is established or firm", and hence "law". It is derived from dharman, धर्मन् -with a literal meaning of "bearer, supporter", an aspect of Ṛta (ऋत), the principle of natural order which regulates and coordinates the operation of the universe and

everything within it. It is the eternal and inherent nature of reality, regarded in Hinduism as a cosmic law underlying right behaviour and social order.

Dharma enables one to strive for stability and order, for a life that is lawful and harmonious, to do the right thing, be good, be virtuous, earn good Karma, be helpful to others, interact successfully with society and do your part to uphold the Natural and Cosmic laws. There is no equivalent word in English that describes these concepts associated with word "Dharma". Therefore, we have kept this word धर्म as is, in the translation of the Subhāṣita.

Artha is to have money, food, shelter, power, security, material wealth, etc. Kāma is to fulfill your natural desires, acquire emotional & physical fulfilment and procreate.

Artha and Kāma are common to all living beings. What separates us human beings from rest of the animals is the pursuit of Dharma and Mokṣa!

Mokṣa is the liberation from all problems in this life and from life-rebirth cycles. It is also called Self-Realization, which is merging of Ātman (आत्मन्) - the self in every living being- and Brahman (ब्रह्मन्), the Universal Self. There are multiple ways to achieve Mokṣa in Hindu philosophy. Mokṣa is different from Salvation, which means freedom from sin or Nirvana, which means freedom from suffering.

Cāṇakya has compiled many verses to describe the essence of these objectives of life.

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।**
**अजागलस्तनस्येव तस्य जन्म निरर्थकम्**॥१३.९॥

यस्य धर्मार्थकाममोक्षाणां एकः अपि न विद्यते, तस्य जन्म, अजागलस्तनस्य इव, निरर्थकं (भवति)॥

The life of a person, devoid of even one (of the four objectives of life), namely, Artha (अर्थ), Kāma (काम), Dharma (धर्म ) and Mokṣa (मोक्ष) - has no meaning, like a nipple hanging from a goat's neck.

यस्य-whose, तस्य- his & अजागलस्तनस्य- of a nipple like projection hanging down from the neck of a goat -पु/न. लिं. ष. वि. ए. व. of यद्-who, तद्-he, it & अजा- a she-goat, गल-- neck, throat, स्तन- breast, udder of female animal- अजायाः गलः -अजागलः & अजागलस्य स्तनः -अजागलस्तनः - both ष. तत्पुरुष स., धर्मार्थकाममोक्षाणाम् -न. लिं. ष. वि. ब. व. of धर्मार्थकाममोक्ष- धर्म- right code of conduct, अर्थ- wealth, worldly possession, काम- sensual enjoyment मोक्ष-

Self realization- धर्मः च अर्थः च कामः च मोक्षः च-द्वंद्व स., एकः & जन्म- प्र. वि. ए. व. of एक (पु. लिं.) -one, single & जन्मन्-(न. लिं.)- birth, life, living, अपि-अव्यय- even, also, and, न -no, not, विद्यते- वर्त. प्र. पु. ए. व. of विद्- ४ ग. आ. प. to be, exist, इव-अव्यय-like, similar to, निरर्थकम्- useless,निर्+अर्थकम् -निर्- अव्यय- sense of without, away from, free from, अर्थकम्- of value, of use

## *1.2 Dharma (धर्मः)*

**चला लक्ष्मीश्चलाः प्राणाश्चले जीवितमन्दिरे।**
**चलाचले च संसारे धर्म एको हि निश्चलः**॥५.२०॥

लक्ष्मीः चला (अस्ति)। प्राणाः चलाः (सन्ति)। जीवितमन्दिरे (जीवितयौवने)चले (स्तः)।
चलाचले संसारे च धर्मः एकः हि निश्चलः (अस्ति)॥

Wealth is unstable. Breath of life does not last. Life and youth are not permanent. In this static and dynamic worldly life, Dharma alone is unchangeable.

*This verse reiterates that Dharma is based on the unchangeable Cosmic and Natural laws.*

लक्ष्मीः- goddess of wealth, wealth, prosperity, riches & चला- (चल- adjctv)- moveable, unsteady, mobile- both in स्त्री. लिं. प्र. वि. ए. व., प्राणाः & चलाः- both in पु. लिं. प्र. वि. ब. व. of प्राणः- breath of life, life & चलः- see above, जीवितमन्दिरे, जीवितयौवने & चले- all in न. लिं. प्र. वि. द्वि. व. of जीवितमन्दिरम्- life and places of dwelling- जीवितम्- existence, living, life- जीवित- क. भू. धा. वि. of जीव्- जीवति १ ग. प. प. to live, be alive, मन्दिरम्- mansion, habitation, house- जीवितम् च मन्दिरम् च- द्वंद्व स., जीवितयौवनम्- life and youth- यौवनम्- youth, prime period of life- जीवितम् च यौवनम् च- द्वंद्व स.& चलम्- moveable, चलाचले & संसारे- both in पु. लिं. स. वि. ए. व. of चलाचलः- static and mobile- चलः- moving, न चलः- अचलः- नञ् तत्पुरुष स. & चलः च अचलः च- चलाचलः- द्वंद स. & संसारः- worldly life, mundane existence, life, एकः - One,. निश्चलः- unchangeable.

**शान्तितुल्यं तपो नास्ति संतोषान्न परं सुखम्।**
**नास्ति तृष्णापरो व्याधिर्न च धर्मो दयापरः**॥८.१३॥

शान्ति-तुल्यं तपः न अस्ति। संतोषात् परं सुखं न (अस्ति)। तृष्णा-परः व्याधिः न अस्ति।दया-परः धर्मः न च (अस्ति)॥

There is no penance or an austerity like being peaceful. There is no happiness like contentment. There is no disease like greed. Moreover, there is no Dharma like compassion.

शान्तिः- peace, tranquillity, तुल्य-कर्मणि विध्यर्थ धा. सा. वि. of तुल्- तोलति-१ ग. प. प.& १० उ. प. तोलयति-ते- to weigh, compare, तुल्यम्-in like manner, equally, शान्ति-तुल्यं - equivalent to peace, शान्तितुल्यम्, तपः- penance, religious austerity- प्र. वि. ए. व of तपस्- न. लिं., अस्ति- प्र.. पु. ए. व. of अस्- २ ग. प. प.-to be, संतोषात् - पं. वि. ए. व. of संतोषः - satisfaction, contentment, परम्, परः - (adjctv)-other, सुखम्- happiness, तृष्णा- thirst, desire, greed, दया-mercy; व्याधिः - physical ailment.

**अनित्यानि शरीराणि वैभवं नैव शाश्वतम्।**
**नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः**॥१२.१२॥

शरीराणि अनित्यानि (सन्ति)। वैभवम् एव न शाश्वतम् (अस्ति)। मृत्युः नित्यं सत् निहित: (भवति)। (तद् कारणात्, मनुष्यस्य) कर्तव्यः धर्मसङ्ग्रहः (एव अस्ति)॥

Bodies of the living beings are not eternal. Anybody's wealth or power is not permanent. One's death exists always close by. (Therefore), one should (constantly) collect meritorious deeds according to Dharma.

*धर्मः एव शाश्वतः अस्ति - Because the fundamental definition of धर्मः is that which supports the Natural and Cosmic Laws which are permanent. One must consistently perform his duties, work, behaviour etc at his personal level-स्वधर्म - that ultimately support the Laws of Nature*

शरीराणि & अनित्यानि- both in न. लि. प्र. वि. ए. व. of शरीरम्- body & अनित्यम्- transient, perishable, not eternal- नित्य- adjctv- perpetual, eternal, constant- न नित्य- अनित्य- नञ् तत्पुरुष स., वैभवम्- न. लिं. - wealth, riches, glory, power, शाश्वतम् /शाश्वतः- permanent, eternal, everlasting- all in प्र. वि. ए. व., मृत्युः- death, सन्निहितः- lying close by, proximately, near- सत् - existing निहित:- क. भू. धा. वि. of नि+ हि- (हि- हिनोति ५ ग. प. प. to send forth, cast, discharge), धर्मसङ्ग्रहः- accumulation of meritorious deeds- धर्मः- meritorious deed, सङ्ग्रहः- collection, gathering- धर्मस्य सङ्ग्रहः- ष. तत्पुरुष स., कर्तव्यः- that ought to be done, duty- कर्तव्य (also करणीय, कार्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do- all in पु. लिं. प्र. वि. ए. व., न- no, not, एव- just, only, नित्यम्- daily, always, constantly- all अव्यय

**नाहारं चिन्तयेत्प्राज्ञो धर्ममेकं हि चिन्तयेत्।**
**आहारो हि मनुष्याणां जन्मना सह जायते**॥१२.२०॥

प्राज्ञः आहारं न चिन्तयेत्। (सः) धर्मम् एकम् हि चिन्तयेत्। मनुष्याणाम् आहारः जन्मना सह हि जायते॥

A wise man should not worry about his food but should think only about holding on to his righteous conduct and duties of Dharma. Indeed, food for the people is produced along with their births!

*This is an example ofअतिशयोक्ति, a form of exaggeration, to make people follow their Dharma. Yes, one needs to worry about getting his next meal but if he follows hisधर्म, that is, doing the right things and doing his duty, food will come to him. We know there is enough food on this Earth to feed all living beings. If one still does not get it even after following धर्म, then it must be his कर्म!*

आहारम्, धर्मम् & एकम्- one, alone- all in पु. लिं. द्वि. वि. ए. व. of आहारः- food, diet & धर्मः- right codes of conduct, duty- 'Dharma', प्राज्ञः- a wise or sensible man & आहारः- both in पु. लिं. प्र. वि. ए. व., चिन्तयेत्- विध्यर्थ प्र. पु. ए. व. of चिन्त्- चिन्तयति- ते १० ग. उ. प. to think, consider, ponder over, मनुष्याणाम्- in पु. लिं. ष. वि. ब. व. of मनुष्यः- a man, person, जन्मना- in न. लिं. तृ. वि. ए. व. of जन्मन्- birth, जायते- वर्त. प्र. पु. ए. व. of जन्- ४ ग. आ. प. to be born, produced, न-no, not, हि- indeed, certainly, सह- with, together- all अव्यय

**जीवन्तं मृतवन्मन्ये देहिनं धर्मवर्जितम्।**
**मृतो धर्मेण संयुक्तो दीर्घजीवी न संशयः**॥१३. ८॥

(अहं) धर्मवर्जितं देहिनं जीवन्तं मृतवत् मन्ये। मृतः धर्मेण संयुक्तः दीर्घजीवी (भवति। (अत्र) न संशयः (अस्ति) ॥

Cāṇakya says- "I consider a living person, who does not follow his Dharma, is as good as dead. There is no doubt that a dead person, who has strictly followed his Dharma, lives for a long time (even after his death)."

जीवन्तम्, धर्मवर्जितम् & देहिनम्- all in पु. लि. द्वि. वि. ए. व. of जीवन्तः- living, alive, धर्मवर्जितः- one who does not follow righteous way of life (Dharma)- धर्मः- right codes of conduct- 'Dharma', वर्जितः- devoid of, absence of- वर्जित- क. भू. धा. वि. of वृज्- वर्जति १ ग. प. प. to give up, abandon- धर्मेण वर्जितः- तृ. तत्पुरुष स. & देहिन्- a living being, man, मृतवत्- as good as dead- in न. लिं. प्र. वि. ए. व.- मृतः- dead person- मृत- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die, decease, वत्- suffix implies quality, nature, मन्ये- उ. पु. ए. व. of मन्- मन्यते ४ ग. आ. प. to think, consider, मृतः- a dead, संयुक्तः- accompanied by, possessed

of- संयुक्त- क. भू. धा. वि. of सं+ युज्- to be with- (युज्- युनक्ति- युंक्ते ७ ग. उ. प. to join, deploy, to be with), दीर्घजीवी-one with a long life- दीर्घ- adjctv- long, extended, जीविन्- adjctv- living, alive, existing- दीर्घः जीविन्- वि. उ. प. कर्मधारय स., संशयः- doubt, uncertainty- all in पु. लिं. प्र. वि. ए. व., धर्मेण- in पु. लि. तृ. वि. ए. व. of धर्मः- see above, न- no, not- अव्यय

**स जीवति गुणा यस्य यस्य धर्मः स जीवति।**
**गुणधर्मविहीनस्य जीवितं निष्प्रयोजनम्**॥१४.१३॥

यस्य गुणाः (सन्ति), सः जीवति, (तथा) यस्य धर्मः (अस्ति) सः जीवति। गुणधर्मविहीनस्य जीवितं निष्प्रयोजनम् (अस्ति)॥

He alone lives a real life who has (good) virtues. He alone lives a real life who follows his own Dharma. The life of a person devoid of any virtue or Dharma has no purpose.

गुणाः- in पु. लिं. प्र. वि. ब. व. of गुणः- virtue, quality, good habit, सः (तद्)- he & धर्मः- right conduct- 'Dharma'- both in पु. लिं. प्र. वि. ए. व., यस्य- whose & गुणधर्मविहीनस्य- in पु. लिं. ष. वि. ए. व. of यद्- who & गुणधर्मविहीनः- one who is devoid of any virtue and Dharma- गुणः च धर्मः च- गुणधर्मौ- द्वन्द स. विहीनः- devoid of, absence of- विहीन- क. भू. धा. वि. of वि+ हा- totally devoid of- (हा- जहाति २ ग. प. प. to leave, abandon)-
गुणधर्माभ्याम् विहीनः- पञ्चमी तत्पुरुष स., जीवति- वर्त. प्र. पु. ए. व. of जीव्- १ ग. प. प. to live, to be alive, जीवितम्- life, survival- जीवित- क. भू. धा. वि. of जीव्- १ ग. प. प. to live & निष्प्रयोजनम्- useless, causeless, of no purpose- both in न. लिं. प्र. वि. ए. व.

**धर्मं धनं च धान्यं च गुरोर्वचनमौषधम्।**
**सुगृहीतं च कर्तव्यमन्यथा तु न जीवति**॥१४.१९॥

धर्मं, धनं च धान्यं च गुरोः वचनम्, औषधम् च (इति मनुष्यस्य) सुगृहीतं कर्तव्यम् (अस्ति)। अन्यथा तु (सः) न जीवति।(तस्य जीवनं दुष्करम् भवति)॥

A man should carefully preserve his Dharma (धर्म), wealth, food, preceptor's teachings and medicines. Otherwise, he will not live. (His survival will be difficult.)

धर्मम्- right codes of conduct, धनम्- wealth, money, धान्यम्- grain, वचनम्- advice, teaching, औषधम्- medicine, सुगृहीतम्- well possessed, stored- सु- अव्यय- suffix implies good, well, गृहीत- held, possessed, controlled- क. भू. धा. वि. of ग्रह्- गृह्णाति- गृह्णीते ९ ग. उ. प. प. to seize, hold, take hold of, कर्तव्यम्-

required to be done- (कर्तव्य- also करणीय, कार्य & कृत्य- कर्मणि वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make)- all in न. लिं. प्र. वि. ए. व., गुरोः- पु. लिं. ष. वि. ए. व. of गुरु- teacher, father, elder, जीवति- वर्त. प्र. पु. ए. व. of जीव्- १ ग. प. प. to be alive, live, अन्यथा- otherwise, or else, तु- but, as to, on the contrary, च- and, न- no, not- all अव्यय

**आहारनिद्राभयमैथुनं च,**
**सामान्यमेतद् पशुभि: नराणाम्।**
**धर्मोहि तेषाम् अधिकोविशेषो,**
**धर्मेणहीना: पशुभि: समाना:**॥१७.१७॥ -त्रिष्टुभ

आहार-निद्रा-भय-मैथुनं च, एतद् पशुभि: नराणां (च) सामान्यम् (अस्ति)। धर्मः हि तेषाम् अधिकः विशेष: (अस्ति)। धर्मेण-हीना: (नरा:) पशुभि: समाना: (सन्ति)॥

Food, sleep, fear and sex are common between human beings and animals. Dharma is a special objective of the human beings alone. Without Dharma, they are as good as the animals.

आहार-food, (also taking, fetching), निद्रा- sleep, भय-fear, मैथुनम्- copulation, sexual union, एतद्- ( pron.adjctv) this, this here, पशुभि: - पु. लिं. तृ. वि. ए. व. of पशुः -animal in general, & नराणाम् - पु. लिं. ष. वि. ब. व. of नरः man, male, human,सामान्यम् -(adjctv) common, general, धर्मम्- धर्मः virtue, righteousness, practice, religion, आहारनिद्राभयमैथुनं - आहार: च निद्रा च भयं च मैथुनं च एतेषां समाहार: - समाहार द्वन्द्व स. धर्मेण- तृ.वि. ए. व. of धर्म, हि -(अव्यय) indeed, surely, तेषाम् –of them ष. वि. ब. व. of तद्- they, this, अधिकः (adjctv) more, addional, greater, विशेष: ( adjctv) special, distinct, हीना: deprived, abandoned- प्र. वि. ब.व. of हीन- क. भू. धा. वि. of हा-जहाति २ प. प., समाना: -प्र. वि. ब..व. of समान-(adjctv) equal, like, similar

## *1.3 Mokṣa (मोक्ष:)*

**यावत्स्वस्थो ह्ययं देहो यावन्मृत्युश्च दूरतः।**
**तावदात्महितं कुर्यात् प्राणान्ते किं करिष्यति**॥४.४॥

अयं देहः यावत् स्वस्थः हि, यावत् मृत्युः च दूरतः (भवति), तावत् (मनुष्यः) आत्महितं कुर्यात्। प्राणान्ते (सः) किं करिष्यति?

One should do all necessary things for the benefit of the inner Self when he is healthy and when death is far away. What can he really do after

death?

*One should try to realize the आत्मन् in this life, understanding of which will eventually lead him to मोक्ष.*

अयम् (इदम्)- this, देहः- body, स्वस्थः- healthy, fit- (सु- अव्यय- good, fit, proper- सुखेन तिष्ठति इति स्वस्थ- उपपद तत्पुरुष स), मृत्युः- death- all in पु. लिं. प्र. वि. ए. व., दूरतः- at a distance, long away- दूर- adjctv- long distance far away- तः (तस्)- suffix implies पं. वि. from, by, आत्महितम्- in पु. लिं. द्वि. वि. ए. व. of आत्महितः- beneficial thing for oneself, good for the Self- आत्मन्- oneself, soul, one's ownself, हित- adjctv- fit, proper,, suitable, advantageous, beneficial thing- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, please, urge- आत्मनः हितः- आत्महितः- ष. तत्पुरुष स., प्राणान्ते- in पु. लिं. स. वि. ए. व. of प्राणान्तः- end of a life, end of the last breathe- प्राणः- breath of life, vital air, अन्त- adjctv- end, termination- प्राणानाम् अन्तः- प्राणान्तः- ष. तत्पुरुष स., करिष्यति- सामान्य भविष्य. (द्वि) प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make & कुर्यात्- विध्यर्थ प्र. पु. ए. व. of कृ- करोति, किम्- a particle of interrogation: what, which, why, च- and, हि- a particle used to express- indeed, surely, for instance, only, यावत्- till which, so long as, तावत्- till then- all अव्यय

**श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम्।**
**श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षमवाप्नुयात्**॥६.१॥

(मनुष्यः) श्रुत्वा धर्मं विजानाति। (सः) श्रुत्वा दुर्मतिं त्यजति। (सः) श्रुत्वा ज्ञानम् अवाप्नोति (तथा सः) श्रुत्वा मोक्षम् अवाप्नुयात्॥

After listening (to Vedas and Upanishads), one comprehends "Sanātana Dharma" (सनातन धर्म). By further studying them thoroughly, he discards evil thoughts and acquires true knowledge. By continously contemplating on that knowledge, he attains Mokṣa.

श्रुत्वा- after having heard, studying, attentively listening- पू. का. वा. त्वान्त धा. सा. अव्यय of श्रु- शृणोति ५ ग. प. प. to listen, hear, learn, study, obey, धर्मम्, दुर्मतिम्, ज्ञानम् & मोक्षम्- all in द्वि. वि. ए. व. of धर्मः- पु. लिं.- right codes of conduct, virtue, righteousness- (Dharma), दुर्मतिः- wicked thinking, evil or sinful thought- मतिः- स्त्री. लिं.- understanding judgement, mind, thinking, दुर्- अव्यय- prefix implies- bad, evil, wicked- दुष्टा मतिः- दुर्मतिः- प्रादि कर्मधारय स., ज्ञानम्- न. लिं- knowledge, consciousness & मोक्षः- पु. लिं.- liberation, deliverance from cycle of birth and death, विजानाति, त्यजति & अवाप्नोति- वर्त. प्र. पु. ए. व. of वि +ज्ञा- to be aware of, comprehend- (ज्ञा- जानाति- जानीते ९ ग. उ. प. to know, understand), त्यज्- १ ग. प. प. to avoid, leave, abandon & अव+ आप्-

to get, attain, secure- (आप्- आप्नोति ५ ग. प. प. to get, obtain), अवाप्नुयात्- विध्यर्थ प्र. पु. ए. व. of अव+ आप्- see above.

**स्वयं कर्म करोत्यात्मा स्वयं तत्फलमश्नुते।**
**स्वयं भ्रमति संसारे स्वयं तस्माद्विमुच्यते**॥६.९॥

आत्मा स्वयं कर्म करोति। (सः) स्वयं तत्फलम् अश्नुते। (सः) स्वयं संसारे भ्रमति (तथा सः) स्वयं तस्मात् विमुच्यते॥

The "Ātman" (self) of a person alone performs all his actions and it alone faces all consequences of such actions. It alone wanders this circuit of worldly life and it alone liberates itself from the birth and death cycles.

*Some translate "Ātman" as "Soul" but they are not the same. In Hindu philosophy, Atman is the fraction of Brahman and is qualitatively same as Brahman. It exists in all living beings. It is eternal, indestructible and a form of energy (Chetana) and pure consciousness. These attributes are not associated with the "Soul".*

आत्मा- पु. लिं. प्र. वि. ए. व. of आत्मन्- Self, oneself, करोति, अश्नुते & भ्रमति-वर्त. प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, अश्- ५ ग. आ. प. to enjoy, get, experience & भ्रम्- १ ग. प. प. to roam, wander about, विमुच्यते- कर्मणि प्रयोग प्र. पु. ए. व. of वि+ मुच्- to liberate, let go- (मुच्- मुंचति- ते ६ ग. उ. प. to set free, release), कर्म (कर्मन्)-performance, action, work, deed & तत्फलम्- fruit of that, consequence of that- तद्-that, it, फलम्- fruit, result- तस्य फलम्- तत्फलम्- ष. तत्पुरुष स.- both in न. लिं. द्वि. वि. ए. व., संसारे- पु. लिं. स. वि. ए. व. of संसारः- circuit of worldly life, the world, तस्मात्- from that, out of it- पु. लिं. पं. वि. ए. व. of तद्- he, स्वयम्- by oneself- अव्यय

**मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज।**
**क्षमार्जवं दयां शौचं सत्यं पीयूषवत्पिब**॥९.१॥

तात, मुक्तिम् इच्छसि चेत् (तर्हि) विषयान् विषवत् त्यज। क्षमार्जवं दयां शौचं (तथा) सत्यं पीयूषवत् पिब॥

Oh, my friend! If you wish to be free, then get rid of the poisonous sensory pleasures. Adopt these nectar like qualities such as forbearance, uprightness, compassion, purity and truthfulness.

तात- Oh my friend, brother- in पु. लिं. सं. वि. ए. व., मुक्तिम् & दयाम्- both in स्त्री. लिं. द्वि. वि. ए. व. of मुक्तिः- liberation, salvation deliverance- (from cycles of life and death) & दया- compassion mercy, tenderness, इच्छसि- वर्त. म. पु. ए.

व. of इष्- इच्छति ६ ग. प. प. to desire, wish, want, विषयान्- in पु. लिं. द्वि. वि. ब. व. of विषयः- object of sensory pleasure (five senses- रूप, रस, गंध, स्पर्श & शब्द), विषवत्- like that of poison- विषम्- poison & पीयूषवत्- like that of nectar- पीयूषः, पीयूषम्- nectar, ambrosia, milk in general- वत्- अव्यय- an affix to noun or adjctv denotes 'likeness', resemblance, त्यज & पिब- both in आज्ञार्थ म. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, quit & पा- पिबति १ ग. प. प. to drink, क्षमार्जवम्- forbearance & uprightness- क्षमा- forbearance, forgiveness & आर्जवम्- uprightness, straightforwardness- क्षमा च आर्जवम् च- क्षमार्जवम्- द्वंद्व स., शौचम्- purity, cleanliness & सत्यम्- truth, honesty- all in न. लिं. द्वि. वि. ए. व., चेत्- if, in case, -अव्यय

**बन्धाय विषयाऽऽसक्तं मुक्त्यै निर्विषयं मनः।**
**मन एव मनुष्याणां कारणं बन्धमोक्षयोः**॥१३.११॥

मनुष्याणां बन्धमोक्षयोः मनः एव कारणम् (अस्ति)। विषयाऽऽसक्तं मनः बन्धाय (नयति)। निर्विषयं (मनः) मुक्त्यै (नयति)॥

Human mind is the sole reason for the bondage and liberation. A mind perpetually attached to sensory pleasures leads to bondage. Detachment from sensory pleasures leads to liberation.

मनुष्याणाम्- पु. लिं. ष. वि. ब. व. of मनुष्य- man, person, human, बन्धमोक्षयोः - पु/न. लिं. ष. वि. द्वि. व. Of बन्धमोक्षः- entanglement, bondage and liberation, freedom- बन्धः च
मोक्षः च - द्वंद्व स, मनः (मनस्)- mind, heart; कारणम्- cause, reason, विषयाऽऽसक्तम्- perpetually attached to sensory pleasures- विषय- sensory pleasure, subject, आसक्तम्- perpetually attached- आसक्त- क. भू. धा. वि. of आ+ संज्- to get involved, interested- संज्- सजति- १ ग. प. प. to stick, cling- विषये आसक्तः- विषयाऽऽसक्तः - स. तत्पुरुष स. & निर्विषयम्- free from sensory pleasures; निर्गतम् विषयम्- निर्विषयम्- प्रादि कर्मधारय स.- all in न. लिं. प्र. वि. ए. व., बन्धाय & मुक्त्यै- च. वि. ए. व. of बन्ध- पु/न. लिं.- entanglement, confinement, tie & मुक्ति- स्त्री. लिं.- Liberation, freedom, deliverance, एव-अव्यय- just, alone, only.

**देहाभिमाने गलिते विज्ञाते परमात्मनि।**
**यत्र यत्र मनो याति तत्र तत्र समाधयः**॥१३.१२॥

देहाभिमाने गलिते, परमात्मनि विज्ञाते, यत्र यत्र (मनुष्यस्य) मनः याति, तत्र तत्र समाधयः (वर्तन्ते)॥

Shedding the attachment to the body and realizing the Supreme Spirit, wherever one's mind wanders, he finds total bliss.

देहाभिमाने, गलिते, परमात्मनि & विज्ञाते- पु. लिं. स. वि. ए. व. of देहाभिमानः- attachment towards the body- देहः/देहम्- body, अभिमानः- pride, attachment- देहस्य अभिमानः- ष. तत्पुरुष स., गलितः- vanished dropped, lost, loosened- गलित- क. भू. धा. वि. of गल्- गलति १ ग. प. प. to drop, fall, परमात्मन्- Supreme-spirit, God Almighty- परमात्मन्- परम- adjctv- Supreme, the highest, best,आत्मन्- soul, self, spirit- परमः आत्मा- परमात्मा- वि. पू. प. कर्मधारय स. & विज्ञातः- realised, understood, known- विज्ञात- क. भू. धा. वि. of वि+ ज्ञा- to realise, comprehend- (ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand), मनः- in न. लिं. प्र. वि. ए. व. of मनस्- mind, thought, याति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, reach, समाधयः- in पु. लिं. प्र. वि. ब. व. of समाधिः- concentration/ composing of mind, perfect absorption of thought into Supreme Spirit, यत्र- where at which place- यत्र यत्र- wherever, तत्र- there, in that place- तत्र तत्र- at all those places, everywhere- both अव्यय

**धर्माख्याने श्मशाने च रोगिणां या मतिर्भवेत्।**
**सा सर्वदैव तिष्ठेच्चेत् को न मुच्येत बन्धनात्**॥१४.६॥

या मतिः धर्म-आख्याने, श्मशाने, रोगिणां च भवेत् (यदि), सा (मतिः) सर्वदा एव तिष्ठेत् चेत्, कः न बन्धनात् मुच्येत ?

If the intellect aroused by hearing a religious discourse or at a crematory or during an illness,  remains (with that person) forever, would he not be liberated from (life's ) bondage?

*When one is sick or sees death of a dear one, he understands the transient nature and uncertainty of life. By listening to spiritual discussions, he gets rid of all worldly attachments. Then he becomes free from the life's bondage.*

आख्यानम्- discourse, lecture, धर्मस्य आख्यानम्- धर्माख्यानम्-षष्ठी तत्पुरुष स., श्मशान**-** crematory धर्माख्याने, श्मशाने - both स. वि ए वचन, रोगः- illness, रोगिः- ill person, रोगिणाम्- पु.लिं. षष्ठी. वि., ब.वचन, मतिः -mind, belief, thought ( also means, Intellect,, knowledge, idea etc), भवेत्- भू-भवति १ ग. प.प. to be, happen, exist- स्था-तिष्ठति-१ ग. प.प.- stay, stand, abide, मुच्-मुंचति-ते ६ ग. उ.प- set free, liberate, भवेत्, तिष्ठेत्, मुच्येत- विद्यर्थ प्र.पु. ए.व., सर्व-pronominal adjective-whole, entire, complete- सर्वदा- at all times, always, for ever,चेद्- if, provided ( both indeclinable), कः - who- पु. लिं & सा- she- स्त्री.लिं- both प्र. वि. ए. व. of pronoun- किम् and तद् respectively.

**यस्य चित्तं द्रवीभूतं कृपया सर्वजन्तुषु।**
**तस्य ज्ञानेन मोक्षेण किं जटाभस्मलेपनैः**॥१५.१॥

यस्य चित्तं सर्वजन्तुषु कृपया द्रवीभूतम् (अस्ति), तस्य ज्ञानेन, मोक्षेण (तथा) जटाभस्मलेपनैः किं (प्रयोजनम् अस्ति)?

For a noble person whose heart melts with compassion for all living beings, what more can he achieve by any extra knowledge, Self realization or having matted hair and holy ash all over the body?

यस्य- whose & तस्य- his, to him पु. लिं. ष. वि. ए. व. of यद्-who & तद्- he, चित्तम्- mind, heart & द्रवीभूतम्- melted, softened- (द्रव- fluid, wet, oozing- द्रवीभू-च्वि रूप- to melt, melted -as with pity- द्रवीभूत- क. भू. धा. वि. of द्रवीभू- भू-भवति १ ग. प. प. to be, to exist)- both in न. लिं. प्र. वि. ए. व., सर्वजन्तुषु- पु. लिं. स. वि. ब. व. of सर्वजन्तु- entire living beings- सर्व- all, entire & जन्तु- living being, creature, सर्वाः जन्तवः -सर्व जन्तवः - कर्मधारय स., कृपया- स्त्री. लिं. तृ. वि. ए. व. of कृपा- compassion, pity, tenderness, ज्ञानेन & मोक्षेण- न. लिं. तृ. वि. ए. व. of ज्ञान- & मोक्ष- liberation, deliverance, emancipation, जटाभस्मलेपनैः- न. लिं. तृ. वि. ब. व. of जटाभस्मलेपन- matted hair and anointment of holy ash over the body- जटा- matted hair, भस्म- holy ash, लेपन- anointment- भस्मस्य लेपनम्- भस्मलेपनम्- ष. तत्पुरुष स. & जटा च भस्मलेपनम् च- जटाभस्मलेपनम्-द्वंद्व स., किम्- a particle of interrogation- what use, what purpose.

**दानेन पाणिर्न तु कङ्कणेन,**
**स्नानेन शुद्धिर्न तु चन्दनेन।**
**मानेन तृप्तिर्न तु भोजनेन,**
**ज्ञानेन मुक्तिर्न तु मण्डनेन**॥१७.१२॥ - त्रिष्टुभ

पाणिः दानेन (विभाति) न तु कङ्कणेन। शुद्धिः स्नानेन (भवति) न तु चन्दनेन। तृप्तिः मानेन (भवति) न तु भोजनेन। मुक्तिः ज्ञानेन आप्नोति न तु मण्डनेन॥

A hand is decorated by (giving to) charity, not by a bracelet. Purification of the body is done by a good bath and not by anointing only sandalwood-paste. A satisfaction is achieved by self respect and not by a good meal. Liberation is achieved by acquiring knowledge and not by mere ornaments.

दानेन, कङ्कणेन, स्नानेन, चन्दनेन, मानेन, भोजनेन, ज्ञानेन & मण्डनेन- all in तृ. वि. ए. व. of दानम्- giving, gifting, कङ्कणः/णम्- a bracelet, स्नानम्- bathing, washing, चन्दनः/नम्- sandal-paste, मानः- respect, honour, regard, भोजनम्- food,

eating, object of enjoyment, ज्ञानम्- knowledge, learning, understanding, मण्डनम्- decoration, an
ornament, act of adorning, पाणिः- hand- in पु. लिं. प्र. वि. ए. व., शुद्धिः- purification, cleanness, sanctity, तृप्तिः- satisfaction, happiness & मुक्तिः- deliverance, freedom, liberation, न- no, not, तु- but, on the other hand, न तु- just not by- अव्यय

**अधना धनमिच्छन्ति वाचं चैव चतुष्पदाः।**
**मानवाः स्वर्गमिच्छन्ति मोक्षमिच्छन्तिदेवताः**॥५.१८॥

अधनाः धनम् इच्छन्ति। चतुष्पदाः च वाचम् एव (इच्छन्ति)। मानवाः स्वर्गम् इच्छन्ति (तथा) देवताः मोक्षम् इच्छन्ति॥

Poor people desire wealth and four legged (animals) want power of expression. Humans desire (to ascend to) heaven and deities want to attain Mokṣa.

*It is interesting to note that the deities too long for Mokṣa. The deities or people, who have reached the divine status, are only temporary residents of heaven until their Karma runs out! They go thru the birth-death cycle until they liberate themselves from this cycle.*

अधनाः, चतुष्पदाः, मानवाः & देवताः- पु. लिं. प्र. वि. ब. व. of अधनः- a poor man, a pauper- धनम्- न. लिं- wealth, money- अविद्यमानं धनं यस्य सः- अधनः- नञ्बहुव्रीहि स., चतुष्पदः- a quadruped, an animal- चतुर्- numerical adjctv- four, पदम्- a foot- चत्वारि पदानि यस्य सः- चतुष्पदः- बहुव्रीहि स., मानवः- a man, human- (मानव- adjctv- descended from Manu) & देवता- divine dignity, deity, God, धनम्, वाचम्, स्वर्गम् & मोक्षम्- all in द्वि. वि. ए. व. of धनम्- न. लिं- wealth, money, वाच्- स्त्री. लिं.- voice, ability to talk, power of expression, a word, स्वर्गः- पु. लिं- heaven & मोक्षः- पु. लिं- liberation, salvation, deliverance from recurring birth and death, इच्छन्ति- वर्त. प्र. पु. ब. व. of इष्- इच्छति- ६ ग. प. प. to desire, long for, want, च- and & एव- just, merely- both अव्यय.

## *1.4 Karma (कर्म)*

Karma (कर्म) means an action, work or deed and its consequences or effects. In Hindu philosophy, the term refers to the principle of Cause and Effect, wherein intent and actions of an individual (cause) influence his or her future (effect). Good intent and good deeds contribute to good Karma while bad intent and bad deeds contribute to bad Karma.

Rebirth and Karma are related to each other in the following sense. Ātmā (आत्मा) can be considered as the eternal energy within a living being that cannot be created or destroyed. Thus, Rebirth is the result of the Law of Conservation of Energy. However, the Karma decides the quality of that new life based on past deeds.

Thus Hinduism believes in continuous cyclic life because Ātmā (आत्मा) is a conserved entity. After death, जीवात्मा may live temporarily in स्वर्ग (Heavan) or नरक (Hell) depending upon net Karma before it is reborn.Some people mistakenly equate Karma to law of action and reaction which is immediate and opposite. But the consequence of Karma follows according to good or bad cause and may happen immediately, later or even in the next birth.

Here are some verses on Karma.

**यथा धेनुसहस्रेषु वत्सो गच्छति मातरम्।**
**तथा यच्च कृतं कर्म कर्तारमनुगच्छति**॥१३.१४॥

वत्सः यथा धेनुसहस्रेषु मातरं गच्छति, तथा यद् च कर्म कृतं (तद्) कर्तारं अनुगच्छति॥

A calf goes (only) to its (own) mother among thousands of cows. Similarly, a prior action (karma) follows its doer (eventually).

धेनुसहस्रेषु - स. वि. ब. व. of धेनुसहस्र-सहस्राः धेनवः -कर्मधारय स.- thousands of cows, वत्सः, कर्म & कृतम् all प्र. वि. ए. व. of वत्स-पु. लिं. calf, the younger animal, child, son, कर्मन् -न. लिं-deed, doing & कृत- न. लिं done-क. भू. धा. वि. of कृ करोति-कुरुते ८ ग. उ. प. to do, यथा-like, similar to & तथा- in the same way, like that- both अव्यय. मातरम् & कर्तारम्- both द्वि. वि. ए. व. of मातृ-स्त्री. लिं- mother & कतृ-पु. लिं-doer गच्छति, अनुगच्छति & विन्दति-वर्त. प्र. पु. ए. व. of गम् -१ ग. प. प. to go, अनु+गम्- to follow & विद्-६ ग उ. प. to find, discover, recognise, यद् -which, what, च-and.

**कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी।**
**तथापि सुधियश्चार्याः सुविचार्यैव कुर्वते**॥१३.१७॥.

फलम् कर्मायत्तं (भवति)। पुंसां बुद्धिः कर्मानुसारिणी (अस्ति)। तथा अपि सुधियः च आर्याः सुविचार्य एव (कर्म) कुर्वते॥

The fruit (of a deed) is dependent on one's own Karma. Men's intellect (also) follows their Karma. Even (after knowing that), the wise and great men perform (any work) only after careful consideration.

कर्मायत्तम्, फलम्, बुद्धिः & अनुसारिणी- all प्र. वि. ए. व of कर्मायत्त (न. लिं)- depending on action, कर्मणा आयत्त-तृ. तत्पुरुष स., कर्मन्- action, effort, आयत्त- being in, resting on, dependent on (धातु. सा. नाम of आ+यत्- १ ग. आ. प. to strive, attempt), फल- (न. लिं) -result, fruit, बुद्धि (स्त्री. लिं) -intellect, knowledge, अनुसारिन् (स्त्री. लिं) - follower, पुंसाम्-ष. वि. ब. व. of पुंस्- man, तथापि- तथा+अपि still, even then, सुधियः & आर्याः -पु. लिं. प्र. वि. ब. व of सुधी - wise, intelligent & आर्य- venerable, respectable, honourable, noble, सुविचार्य- पूर्व. का. वा. ल्यबन्त धा. सा. अव्यय of सु+वि+चर्- to take into account or to consider thoroughly, (चर् चरति- १. ग. प. प. to walk, move), एव-अव्यय just, exactly, only, कुर्वते-वर्त. प्र. पु. ब. व. of कृ करोति-कुरुते ८ ग. उ. प. to do

**आत्मापराधवृक्षस्य फलान्येतानि देहिनाम्।**
**दारिद्र्यरोगदुःखानि बन्धनव्यसनानि च॥१४.२॥**

दारिद्र्य-रोग-दुःखानि, बन्धन-व्यसनानि च, एतानि देहिनाम् आत्मापराधवृक्षस्य फलानि (भवन्ति)॥

Poverty, diseases, unhappiness, bondages and misfortunes are results of living beings' self-grown tree of misdeeds.

दारिद्रयरोगदुःखानि, बन्धनव्यसनानि, एतानि & फलानि -न. लिं. प्र. वि. ब. व. of- दारिद्रयरोगदुःख-दारिद्र्य- poverty, रोग-disease, दुःख-difficulties,ordeals, unhappiness दारिद्र्यम् च रोगम् च दुःखम् च- द्वंद्व स., बन्धनव्यसन- बन्धन- bondage, व्यसन- destruction/ loss, misfortune बन्धनम् च व्यसनम् च -द्वंद्व स., च-and, एतद्-this & फलम्- fruit, result, consequence, देहिनाम्-पु. लिं. ष. वि. ब. व. of देहिन्- living being, a man, human, आत्मापराधवृक्षस्य -न. लिं. ष. वि. ए. व. of आत्मापराधवृक्ष- Self grown tree of misdeeds- आत्मन्-self, own, soul, अपराध- misdeed, sin, वृक्ष-tree आत्मनः अपराधः -आत्मापराधः -ष. तत्पुरुष स., वृक्षम् इव आत्मापराधम्- आत्मापराधवृक्षम्-उपमानोत्तरपदकर्मधारय स.

**जन्मजन्मनि चाभ्यस्तं दानमध्ययनं तपः।**
**तेनैवाभ्यासयोगेन देही वाऽभ्यस्यते॥१६.१९॥**

जन्मजन्मनि (बहुजन्मसु) अभ्यस्तं दानम् अध्ययनं तपः च, तेन देही, अभ्यासयोगेन एव वा (तद् एव पुनः) अभ्यस्यते॥

As consequence of practiced charities, studies and penances done in his previous births (birth after births), a man practices the same again (during his current birth).

*By doing good deeds, Karma, in previous births, a human being is reborn as a human being again and continues to do the same deeds. A man who does not do the right deeds may be reborn as human being but at a much lower level.*

*The Hindu philosophy says that one can be reborn as a lower species. However, the theory of evolution suggests that, once a human being, always a human being! A person with good Karma will be reborn in a better family than before and vice versa.*

बहुजन्मसु- in न. लिं. स. वि. ब. व. of बहुजन्मन्- many births, birth after birth- बहु- adjctv- many, numerous, repeated, जन्मन्- birth- वि. पू. प. कर्मधारय स., जन्मजन्मनि- in न. लिं. स. वि. ए. व. of जन्मजन्मन्- repeated births- जन्मन् च जन्मन् च- द्वन्द्व स., अभ्यस्तम्- practiced exercised, repeated, studied- अभ्यस्त-क. भू. ध. वि. of अभि+ अस्- to practice, exercise- (अस्- अस्यति ४ ग. प. प. to cast, to discharge), दानम्- charity, donation, अध्ययनम्- study, learning- (अधि+ इ- to study, learn- इ- एति to go), तपः (तपस्)- penance, religious austerity & तद्- that, it- all in न. लिं. द्वि. वि. ए. व., तेन & अभ्यासयोगेन- पु. लिं. तृ. वि. ए. व. of तद्- that, it & अभ्यासयोगः- अभ्यासः- practice, study, exercise, योगः- application, employment- अभ्यासस्य योगः- ष. तत्पुरुष स., देही- (देहिन्)- a living being, man, human- in पु. लिं. प्र. वि. ए. व.,अभ्यस्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of अभि+ अस्- to practice- (see above), च-and, एव- just, merely, only, पुनः (पुनर्)- again, once more- all अव्यय.

## *1.5 Destiny: Niyati (नियतिः)*

Destiny or Fate refers to a future outcome which results from a predetermined or inevitable course of events. A person's destiny is everything that happens to him/her during or beyond his/her life, especially if controlled by someone or something else. We alone are not necessarily masters of our own destiny.

Karma (कर्म) is based on our own thoughts and actions with no external influence whereas Niyati (नियतिः) suggests an external influence. Let us see what Cāṇakya Nīti says about destiny.

**रङ्कं करोति राजानं राजानं रङ्कमेव च।**
**धनिनं निर्धनं चैव निर्धनं धनिनं विधिः** ॥१०.५॥

विधिः रङ्कं राजानं करोति। राजानं रङ्कम् एव च (करोति)। (सः) धनिनं निर्धनं (करोति)। (तथा) निर्धनं धनिनं च एव (करोति)॥

The destiny turns a beggar into a King and a King into a beggar. It also turns a wealthy rich man into a poor man and a poor man into a wealthy person.

विधिः- destiny, fate, luck- in पु. लि. प्र. वि. ए. व., रङ्कम्, राजानम्, निर्धनम् & धनिनम्- all in पु. लि. द्वि. वि. ए. व. of रङ्कः- a beggar, wretch, राजन्- a King, निर्धनः- a poor man, धनम्- wealth, money, riches- निर्गतम् धनम् यस्मात् सः- नञ् बहुव्रीहि स. & धनिन्- a wealthy man, एव-only, just, च- and- both अव्ययs, कृ- करोति, कुरुते ८ ग. उ. प. to do

**पिता रत्नाकरो यस्य लक्ष्मीर्यस्य सहोदरी।**
**शङ्खो रोदिति भिक्षार्थं फलं भाग्यानुसारतः** ॥१७.५॥
पाठभेद - शङ्खो भिक्षाटनं कुर्यान्नादत्तमुपतिष्ठते॥

यस्य पिता रत्नाकरः(अस्ति), यस्य सहोदरी लक्ष्मीः(अस्ति), (असौ ) शङ्खः भिक्षार्थं रोदिति। फलं भाग्यानुसारतः (लभते)॥ (असौ) शङ्खः भिक्षाटनं कुर्यात् ।अदत्तं न उपतिष्ठते॥

The father of the Conch shell is the big mine of jewels (the mighty ocean). His sister is Lakṣmī (the Goddess of wealth). Still he cries (roams around) begging for alms. Whatever is not given does not stay. (Only his destiny prevails.)

*This has reference to the churning of the ocean-समुद्र मन्थन -in which 14 precious items were obtained by देवाs & दानवाs. शङ्खः- conch-shell & लक्ष्मीः- Goddess of wealth were part of them. Hence they are brother and sister, with ocean as their father. शङ्खः was used to ask for alms in olden days.*

रत्नाकरः- treasure house of jewels, ocean- रत्न-jewel, आकरः-mine, big source- रत्नानाम् आकरः, रत्नाकरः- ष. तत्पुरुष स., पिता (पितृ)- father, शङ्खः- Conch-shell & भाग्यानुसारतः- according to destiny- भाग्य- fortune, fate, destiny, अनुसारः- going after, following- भाग्यं अनुसरति इति - उपपद तत्पुरुष स.- तः (तस्)- suffix implies towards, according to- all in पु. लिं. प्र. वि. ए. व., यस्य- whose- पु. लिं. ष. वि. ए. व. of यद्- who, लक्ष्मीः- Lakṣmī, Goddess of wealth & सहोदरी- sister- (सह- अव्यय- together, with, उदर- belly, stomach- समानम् उदरं यस्य सः - सह बहुव्रीहि स - सहोदरम्- born from the same belly, same mother)- both in स्त्री. लिं. प्र. वि. ए. व., भिक्षार्थम्- न. लिं. प्र. वि. ए. व.- for the sake of alms- भिक्षा- alms, अर्थम्- for the sake of, for the purpose- भिक्षायाः अर्थम्- भिक्षार्थम्- ष. तत्पुरुष स., भिक्षाटनम्- न. लिं. द्वि. वि. ए. व.- roaming around for begging- अटनम्- wandering, reaming- (अट्- अटति १ ग. प. प. to roam)- भिक्षार्थे अटनम्- तृतीया तत्पुरुष स., कुर्यात्- विध्यर्थ प. प. प्र. पु. ए. व. of कृ-करोति- कुरुते ८ ग. उ. प. to do, make, रोदिति- वर्त. प्रथम पु. ए. व. of रुद्- २ ग. प. प. to cry, weep, अदत्तम्- न. लिं. द्वि. वि. ए. व.- not given, improperly given- न दत्तम्- अदत्तम्- नञ् तत्पुरुष स.- दत्त-

given, granted- क. भू. धा. वि. of दा-ददाति- दत्ते-३ ग. उ. प. to give, grant, अदत्तम् न - Given, उपतिष्ठते-आ. प. वर्त. प्रथम पु. ए. व. of उप+ स्था- to get, reach, obtain- (स्था-तिष्ठति १ ग. प. प. to stand, stay), फलम्- fruit, result, success- न. लिं. प्र. वि. ए. व., न- no, not

**आयुः कर्म च वित्तं च विद्या निधनमेव च।**
**पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः**॥४.१॥

देहिनः आयुः, कर्म च वित्तं च विद्या, निधनम् एव च एतानि पञ्च गर्भस्थस्य एव हि सृज्यन्ते॥

These five are determined for a living being while it is in the womb of its mother- its life span, work, wealth, education and death.

देहिनः & गर्भस्थस्य- पु. लिं. ष. वि. ए. व. of देहिन्- living being, man, human & गर्भस्थः- while in the womb गर्भ- womb, act of conception- गर्भे तिष्ठति इति- गर्भस्थः- उपपद तत्पुरुष स., आयुः (आयुस्)- life, duration of life, कर्म (कर्मन्)- work, duty, वित्तम्- wealth, money & निधनम्- death, destruction- all in न. लिं. प्र. वि. ए. व., विद्या- knowledge, education, learning- in स्त्री. लिं. प्र. वि. ए. व., एतानि & पञ्च- both in न. लिं. प्र. वि. ब. व. of एतद्- this, it & पञ्चन्- five, सृज्यन्ते & विलिख्यन्ते- both कर्मणी प्रयोग प्र. पु. ब. व. of सृज्- सृजति ६. ग. प. प. to create, make & वि+ लिख्- to inscribe, implant- (लिख्- लिखति- ६ ग. प. प. to write) एव- just,,only, च- and, हि- indeed, all अव्यय

**जन्ममृत्युं हि यात्येको भुनक्त्येकः शुभाशुभम्।**
**नरकेषु पतत्येक एको याति परां गतिम्**॥५.१२॥

एकः जन्ममृत्युं हि याति। एकः शुभाशुभं भुनक्ति। एकः नरकेषु पतति। (तथा) एकः परां गतिं याति॥

One alone goes through the cycle of life and death. One alone enjoys happiness and suffers miseries. (After death), one alone either goes to hell or achieves Mokṣa.

*A person alone, all by himself or herself, goes thru various aspects of life, in the eternal life cycles, per his Karma or destiny; nobody else is a partner in those actions or accompanies him/her along the way.*

एकः- one, single, an individual- in पु. लि. प्र. वि. ए. व., जन्ममृत्युम् & शुभाऽशुभम्- both in पु/न. लि. द्वि. वि. ए. व. जन्ममृत्युः- life and death- जन्मन्- न. लिं- birth, life, मृत्युः- death- जन्म च मृत्युः च- जन्ममृत्युः & शुभाऽशुभः/भम्- good and bad, auspicious and inauspicious- शुभ- adjctv- auspicious, splendid, good- न शुभः- अशुभः- नञ् तत्पुरुष स., शुभः च अशुभः च- शुभाऽशुभः- both द्वंद स., नरकेषु- in

पु/न. लि. स. वि. ब. व. of नरकः/कम्- hell, याति, भुनक्ति & पतति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, to come to, to arrive, march towards, भुज्- भुनक्ति भुङ्क्ते ७ ग. उ. प. to eat, enjoy, experience, endure, suffer & पत्- १ ग. प. प. प. to fall, drop down, पराम् & गतिम्- both in स्त्री. लि. द्वि. वि. ए. व. of परा- highest, greatest, ultimate, final & गतिः- state, destination, movement, हि- indeed, surely, certainly- अव्यय

**तादृशी जायते बुद्धिर्व्यवसायोऽपि तादृशः।**
**सहायास्तादृशा एव यादृशी भवितव्यता** ॥६.६॥

यादृशी भवितव्यता (अस्ति), बुद्धिः तादृशी जायते। व्यवसायः अपि तादृशः (भवति तथा), सहायाः तादृशाः एव (वर्तन्ते)॥

The mind of a person acts according to his destiny. His profession is consistent with his destiny. He receives help accordingly.

यादृशी (यादृश्/यादृक्ष)- of which sort or nature, what like, भवितव्यता- destiny, things that are bound to happen, inevitable necessity- भवितव्य- that is about to happen, likely to be- (also भवनीय, भव्य & भाव्य)- क. वि. धा. सा. वि. of भू- भवति १ ग. प. प. to happen, exist, to be & ता- suffix implies: quality, nature, बुद्धिः- understanding, talent, intellect, knowledge, comprehension & तादृशी (तादृश्/तादृक्ष)- like that, accordingly- all in स्त्री. लिं. प्र. वि. ए. व., जायते- वर्त. प्र. पु. ए. व. of जन्- ४ ग. आ. प. to be born, produced, to happen, व्यवसायः- effort, business, resolve, performance, exertion & तादृशः (तादृश्/तादृक्ष)- both in पु. लिं. प्र. वि. ए. व., सहायाः & तादृशाः- both in पु. लिं. प्र. वि. ब. व. of सहाय- help, assistance & तादृश्, अपि- also, even & एव- just, merely, only- both अव्यय

**कालः पचति भूतानि कालः संहरते प्रजाः।**
**कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः** ॥६.७॥

कालः भूतानि पचति। कालः प्रजाः संहरते। कालः सुप्तेषु जागर्ति। कालः दुरतिक्रमः हि (अस्ति)॥

Time (eventually) swallows all living beings. Time destroys an entire population. Time is awake (still continues) when all are sleeping. Time is impossible to overcome.

कालः- time, an opportune moment, occasion, the supreme spirit regarded as destroyer of the universe, destiny, fate & दुरतिक्रमः- very difficult to overcome, transgress- दुर्- अव्यय- prefix implies: hard, difficult, bad, अतिक्रमः- transgression, violation, trespass, overcoming- दुःखेन अतिक्रम्यते

इति- दुरतिक्रमः- उपपद तत्पुरुष स. (अति+ क्रम्- to surpass, go beyond, trespass- क्रम्- क्रामति- क्रमते /क्रम्यते- १ ग. उ. प. & क्राम्यति- ४ ग. प. प., to go, step approach), भूतानि- in न. लिं. द्वि. वि. ब. व. of भूतम्- living being, creature, प्रजाः- in स्त्री. लिं. द्वि. वि. ब. व. of प्रजा- subjects, people, पचति, संहरते & जागर्ति- all in वर्त. प्र. पु. ए. व. of पच्- पचति- ते १ ग. उ. प. to cook, digest (as food), सं+ हृ- to destroy, annihilate, (हृ- हरति- ते to carry, take) & जागृ- २ ग. प. प.- to be awake, to be roused from sleep, सुप्तेषु- पु. लिं. स. वि. ब. व. of सुप्तः-slept, asleep- सुप्त- क.भू. धा. वि. of स्वप्- स्वपिति-२ ग. प. प. to sleep, हि- indeed- अव्यय.

**पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्?**
**नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्?**
**धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम्?**
**यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः**॥१२.६॥-शा.वि.

यदा करीरविटपे पत्रं न एव (अस्ति, तदा) वसन्तस्य किं दोषः? उलूकः यदि दिवा अपि न अवलोकते (तत्र) सूर्यस्य किं दूषणम्? मेघस्य धाराः चातकमुखे न एव पतन्ति (तर्हि मेघस्य) किं दूषणम्? विधिना यत् पूर्वं ललाटलिखितम्, तद् मार्जितुं कः क्षमः (भवति)?

If there is no new sprout on a Bamboo branch, is that the fault of the spring season? If an owl sees nothing even during the daytime, is that the fault of the Sun? If streams of rain do not fall in the mouth of a Chātaka bird, is that the fault of the cloud? Who is capable of undoing that which is written on the forehead by the destiny?

करीरविटपे & चातकमुखे- both in पु/न. लिं. स. वि. ए. व. of करीरविटपः- a new sprout or shoot of bamboo- करीरः- shoot of a bamboo, विटपः- branch, a new sprout or shoot- करीरस्य विटपः- करीरविटपः & चातकमुख- mouth of a Chātaka bird- चातकः- a bird supposed to be surviving only by drinking water of falling rain, मुखम्- mouth चातकस्य मुखम्- चातकमुखम्- both ष. तत्पुरुष स., पत्रम्- a leaf, न. लिं. प्र. वि. ए. व., वसन्तस्य, सूर्यस्य & मेघस्य- all in पु. लिं. ष. वि. ए. व. of वसन्तः- the spring, vernal season, सूर्यः- the Sun & मेघः- cloud, दोषः- blame, fault, shortcoming, उलूकः- an owl, कः (किम्)- क्षमः- capable, competent appropriate- all in पु. लिं. प्र. वि. ए. व., अवलोकते- वर्त प्र. पु. ए. व. of अव+ लोक्- to behold, see- (लोक्- लोकते- १ ग. आ. प. to see, view), दूषणम्- a fault, offense, defect- in न. लिं. प्र. वि. ए. व., यद्- which, what, पूर्वम्- adjctv- before, earlier, ललाटलिखितम्- written on the forehead- ललाटम्- forehead & लिखितम्- writing- ललाटे लिखितम्- स. तत्पुरुष स., तद्- that, it- all in न. लिं. द्वि. वि. ए. व., धाराः- in स्त्री. लिं. प्र. वि. ब. व. of धारा- a line of descending fluid, पतन्ति- वर्त. प्र. पु. ब. व. of पत्- पतति १ ग. प. प. to fall, drop, विधिना- in पु. लिं. तृ. वि. ए. व. of विधिः- destiny, fate, मार्जितुम्-to wipe off, cleanse- पू. का. वा. हेत्वर्थक तुमन्त

धा. सा. अव्यय of मृज्- मार्ष्टि- २ ग. प. प. to wipe or wash off, cleanse, यदा- when, at which time, यदि- in case, when, if, अपि- even, also, न- no not, किम्- interrogative particle: what, which, how, दिवा- in the day time, एव- just, only merely- all अव्यय

**अलिरयं नलिनीदलमध्यगः,**
**कमलिनीमकरन्दमदालसः।**
**विधिवशात्परदेशमुपागतः,**
**कुरजपुष्परसं बहु मन्यते**॥१५.१५॥ -जगति

अयम् अलिः नलिनीदलमध्यगः, कमलिनीमकरन्दमदालसः, विधिवशात् परदेशम् उपागतः, कुटजपुष्परसं बहु मन्यते॥

This black bee goes inside the lotus petals and feels slothful after getting intoxicated with the honey of lotus flowers. Then, after going to an unknown place (full of only Kutaja flowers), by chance of destiny, it considers the juice of Kutaja flowers to be a great thing (even though it is very bitter).*This Subhāṣita is an example of an "Anyokti" (अन्योक्ति). By giving an example of a bee, it refers to people who are used to an easy life in their own place. However, when faced with hardship, they must satisfy themselves with whatever little is available. This is destiny.*

अयम्- (इदम्)- this, अलिः- black bee, bee in general, नलिनीदलमध्यगः- one who used to frequent inside petals of lotus- नलिनी- lotus, दलः- petal, मध्य- within, inside, central part- मध्ये गच्छति इति- मध्यगः- उपपद तत्पुरुष स., नलिन्याः दलः- नलिनीदलः & नलिनीदलस्य मध्यगः- नलिनीदलमध्यगः- both ष. तत्पुरुष स., कमलिनीमकरन्दमदालसः- कमलिनी- lotus, मकरन्द- honey of flowers, मदः- intoxication, inebriety, drunkenness- आलस- adjctv- idle, slothful- कमलिन्याः मकरन्दः- कमलिनीमकरन्दः- ष. तत्पुरुष स., मदेन आलसः- मदालसः & कमलिनीमकरन्देन मदालसः- कमलिनीमकरन्दमदालसः- both तृ. तत्पुरुष स. & उपागतः- arrived, visited- उपागत- क. भू. धा. वि. of उप+आ+ गम्- to come to, approach, to go to- (गम्- गच्छति १ ग. प. प. to go)- all in- पु. लिं. प्र. वि. ए. व., परदेशम् & कुटजपुष्परसम्- both in- पु. लिं. द्वि. वि. ए. व. of परदेशः- foreign place, unknown place- - adjctv- the other, another, देशः- place, country- परस्य देशः- ष. तत्पुरुष स. & कुटजपुष्परसः- कुटज- (वानस्पतिक नाम : Wrightia antidysenterica- a medicinal plant- कुटजारिष्ट- is an Ayurvedic medicine commonly used for stomach upset)- पुष्प- flower रसः- juice, liquor, taste- कुटजस्य पुष्पम्- कुटजपुष्पम् & कुटजपुष्पस्य रसः- कुटजपुष्परसः- both ष. तत्पुरुष स., विधिवशात्- in पु. लिं. पं. वि. ए. व. of विधिवशः- under influence of destiny, fate- विधिः- पु. लिं- fate, destiny, वश- adjctv- influenced by, subject to, under

control of- विधेः वशः- विधिवशः- ष. तत्पुरुष. स.  मन्यते- वर्त. प्र. पु. ए. व. of मन्- ४ ग. आ. प. to think, consider, believe, बहु- adverb- very much, plentiful

**न निर्मितः केन न दृष्टपूर्वः,**
**न श्रूयते हेममयः कुरङ्गः।**
**तथापि तृष्णा रघुनन्दनस्य,**
**विनाशकाले विपरीत बुद्धिः** ॥१६.३॥ - त्रिष्टुभ

हेममयः कुरङ्ग न श्रूयते। (एतद्) न निर्मितः, केन न दृष्टपूर्वः (च अस्ति)। तथा अपि, रघुनन्दनस्य तृष्णा (अभूत्)। विनाशकाले विपरीत-बुद्धिः (भवति)॥

No one had ever heard of a golden deer. It had not been created by anyone nor had it been seen before by anyone. Despite this, a strong desire of the prince of Raghu dynasty, Rāma, made him go after it. Alas! One's mind thinks in the wrong direction at imminent disaster.

*This story is from Rāmāyana. While Rāma and Sītā were exiled to the forest, Sītā was excited to see a golden deer, which was really a demon sent by King Rāvana. She asked Rāma to get it for her. When Rāma left the cottage, Rāvana kidnapped her. Destiny will prevail, one way or other!*

हेममयः- one that is golden, made of gold- हेमन्- न. लिं.- gold, मय- adjctv- an affix used to imply 'made of', 'consisting of', कुरङ्गः- deer, निर्मितः- produced, manufactured, created- निर्मित- क. भू. धा. वि. of निस्+ मा- to make, create- (मा- माति २ ग. प. प. to measure, limit), दृष्टपूर्वः- seen before- दृष्ट- adjctv- seen, perceived- दृश्- पश्यति १ ग. प. प. to see, perceive, पूर्व- adjctv- before, earlier, former, previous- दृष्टः पूर्वः - वि. पू. प. कर्मधारय स.- all in पु. लिं. प्र. वि. ए. व., केन- by whom- in पु/न. लिं. तृ. वि. ए. व. of किम्- who, रघुनन्दनस्य- in पु. लिं. ष. वि. ए. व. of रघुनन्दनः- an epithet of Rama- रघुः- celebrated King of the solar-race, नन्दनः- a son, progeny- रघोः नन्दनः- ष. तत्पुरुष स., श्रूयते- getting heard- कर्मणि प्रयोग प्र. पु. ए. व. of श्रु- शृणोति ५ ग. प. प. to hear, listen विनाशकाले- in पु. लिं. स. वि. ए. व. of विनाशकालः- the time of destruction, total failure- विनाशः- ruin, destruction, utter loss,  कालः- time, period- विनाशस्य कालः- ष. तत्पुरुष स., विपरीतबुद्धिः- wrong understanding, acting in an opposite manner- विपरीत- adjctv- reversed, contrary, false, adverse, inverse- क. भू. धा. वि. of वि+परि + इ- (इ- एति- २ ग. प. प. to go, to arrive at), बुद्धिः- स्त्री. लिं- intellect, perception,knowledge- विपरीता बुद्धिः- वि. पू. प. कर्मधारय स. & तृष्णा- thirst, desire, greed- (तृष्- तृष्यति ४ ग. प. प. to be thirsty, to wish)- both in स्त्री. लिं. प्र. वि. ए. व.,  न- not, तथा- like that, अपि- also, तथा अपि- even then - all अव्यय

**अयममृतनिधानं नायकोऽप्योषधीनां**
**शतभिषगनुयातः शम्भुमूर्ध्नोऽवतंसः।**
**विरहयति न चैनं राजयक्ष्मा शशाङ्कं**
**हतविधिपरिपाकः केन वा लङ्घनीयः**॥१३.१६॥- अतिशक्करी

अयम् अमृतनिधानं, शतभिषगनुयातः, ओषधीनां नायकः अपि (भवति)। (सः) शम्भुमूर्ध्नः अवतंसः (अस्ति)। एनं शशाङ्कं राजयक्ष्मा न च विरहयति। हतविधिपरिपाकः केन वा लङ्घनीयः (भवति)॥

This moon is a reservoir of nectar. He is followed by hundreds of physicians. He is the leader of all medicines and is also a crescent shape ornament on Lord Shiva's head. (Still) The disease of tuberculosis (gradual decay) does not leave him. Who can escape the onslaught of misfortune?

*शतभिषज्- 100 stars- name of 25th of the 27 constellations that are home to the Moon on each day of its orbit around the Earth.*

अयम् (इदम्)- this, शतभिषगनुयातः- followed by hundreds of physicians (followed by शतभिषज्- star)- शत- hundred, भिषज्- physician, अनुयातः- followed by- क. भू. धा. वि. of अनु+या- (या- याति २ ग. प. प. to go)- शतानां भिषजः समाहारः- शतभिषज्- द्विगुसमास & शतभिषजः अनुयातः- शतभिषगनुयातः - ष. तत्पुरुष स., नायकः - leader, chief, अवतंसः- ring-shaped ornament, राजयक्ष्मा (राजयक्ष्मन्)- consumption of the moon, pulmonary consumption- राजन्-king, यक्ष्मन्- pulmonary disease- राज्ञः यक्ष्मा- ष. तत्पुरुष स., हतविधिपरिपाकः- one who is stricken by combinations of ill-luck- हत- stricken, destroyed- क. भू. धा. वि. of हन्- हन्ति २ ग. प. प. to strike, kill, विधि- पु. लिं.- misfortune, fate, destiny, परिपाकः- result, consequence, लङ्घनीयः (लङ्घितव्य & लङ्घ्य)- to be crossed, transgressed- कर्मणि वि. धा. वि. of लङ्घ्- लङ्घति-ते १ ग. उ. प. प. to leap, transgress -all in पु. लिं. प्र. वि. ए. व., अमृतनिधानम्- reservior of nectar- अमृत- nectar, ambrosia, drink of immortality, निधानम्- reservior, treasure- अमृतस्य निधानम्- ष. तत्पुरुष स.- न. लिं. प्र. वि. ए. व., ओषधीनाम्- पु/स्त्री. लिं. ष. वि. ब. व. of ओषधिः-धी- herb, medicinal plant, शम्भुमूर्ध्नः -पु. लिं. ष. वि. ए. व. of शम्भुमूर्धन्- Shiva's head- शम्भु- Śiva, मूर्धन्- head, forehead- शम्भोः मूर्ध- ष. तत्पुरुष स., एनम् & शशाङ्कम्- both in पु. लिं. द्व. वि. ए. व. of एतद्- this & शशाङ्क- moon- शशः- rabit, अङ्क- lap- शशः यस्य अङ्के सः- बहुव्रीहि स., केन- by whom- -पु. लिं. तृ. वि. ए. व. of किम्-who, विरहयति- प्रयोजक वर्त. तृ. पु. ए. व. of वि+ रह्- to get rid of, to overcome- (रह्- रहति १ ग. प. प. to quit, leave), वा- or न-no, not, च- and, अपि- also, even- all अव्यय

## *1.6 Other Sanātana Dharma Concepts*

The concepts of the Universal Self (ब्रह्मन्), Individual self (आत्मन्), their identitical nature, pursuit of Truth and qualities like forgiveness, compassion, charity, self control etc are well established in Hindu teachings. Some of those appear in following verses.

**अग्निर्देवो द्विजातीनां मुनीनां हृदि दैवतम्।**
**प्रतिमा स्वल्पबुद्धीनां सर्वत्र समदर्शिनाम्**॥४.१९॥

द्विजातीनाम् अग्निः देवः (भवति)। मुनीनां दैवतम् हृदि (भवति)। स्वल्पबुद्धीनां प्रतिमा (एव दैवतं (भवति)। समदर्शिनां (दैवतं) सर्वत्र (भवति)॥

Fire (अग्निहोत्र) is the God (an object of worship) for upper three classes. God is in the heart of the sages. An image or an idol itself is a God for the ignorant people. However, Self-realised people see God everywhere.

द्विजातीनाम्, मुनीनाम्, स्वल्पबुद्धीनाम् & समदर्शिनाम्- all in पु. लिं. ष. वि. ब. व. of द्विजाती - a person with two births, a man from the first three Varṇa, namely Brāhmaṇa, Kṣtriya and Vaiśa, who undergo upanayan-sanskar- द्वे जाती - द्विगु स. मुनिः- a sage, ascetic, saint, स्वल्पबुद्धिः- one with little intelligence- स्वल्प- adjctv- very small, little, बुद्धिः- स्त्री.लिं.- intellect, knowledge, understanding- स्वल्पा बुद्धिः यस्य सः- स्वल्पबुद्धिः- बहुव्रीहि स., & समदर्शिन्- self-realised impartial person- सम- adjctv- same, equal, identical, दर्शिन्- adjctv- seeing, perceiving, - समः दर्शी यः सः- समदर्शिन्- बहुव्रीहि स., अग्निः- fire, देवः- god, deity- both in पु. लिं. प्र. वि. ए. व., दैवतम्- God, deity- in न. लिं. प्र. वि. ए. व., प्रतिमा- an image, idol, figure- in स्त्री. लिं. स. वि. ए. व., हृदि- in न. लिं. प्र. वि. ए. व. of हृद्- mind, heart, सर्वत्र- everywhere, -अव्यय

**सत्येन धार्यते पृथ्वी सत्येन तपते रविः।**
**सत्येन वायवो वान्ति सर्वं सत्ये प्रतिष्ठितम्**॥५.१९॥

पृथ्वी सत्येन धार्यते। रविः सत्येन तपते। वायवः सत्येन वान्ति। सर्वं सत्ये प्रतिष्ठितम् (अस्ति)॥

This Earth is supported by Truth. The Sun radiates due to Truth. Winds blow due to Truth. Everything rests upon the Truth.

*In this particular verse, सत्य - Truth is "Brahman" -ब्रह्मन्- the Ultimate Reality or धर्म - Cosmic Laws of Nature. Everything in this Universe happens due to the Creator's design or by the Natural or Cosmic laws of the Universe.*

पृथ्वी- the Earth-in स्त्री. लिं. प्र. वि. ए. व., रविः-the Sun -in पु. लिं. प्र. वि. ए. व., वायवः - Winds- पु. लिं. प्र. वि. ब. व. of वायु, सत्येन- तृ. वि. ए. व. of सत्य- truth, धार्यते- gets supported -कर्मणि प्रयोग प्र. वि. ए. व. of धृ-धरति १ ग. प. प. to hold, carry, तपते-आ. प. वर्त. प्र. पु. ए. व.-(Normally तप्-तपति १ ग..प. प. to blaze, shine, to be hot), वान्ति-वर्त. प्र. पु. ब. व. of वा-वाति २ ग. प. प. to blow, cause to blow, सर्वम् & प्रतिष्ठितम्- न. लिं. प्र. वि. ए. व. of सर्व-pronominal adjctv-all, entire & प्रतिष्ठित-established, resting upon- क.भू. धा.वि. of प्र+स्था- (स्था- तिष्ठति १ ग. प. प. to stand ), सत्ये-स. वि. ए. व. of सत्य

**वाचा शौचं च मनसः शौचमिन्द्रियनिग्रहः।**
**सर्वभूते दया शौचमेतच्छौचं परार्थिनाम्**॥७.२०॥

वाचा शौचं, मनसः शौचं, इन्द्रियनिग्रहः, सर्व-भूते दया च, एतत् परार्थिनाम् शौचम् (नयति)॥

Purity in speech and of mind, control of sense organs and compassion towards all creatures lead to the (real) purification for the seekers of ultimate liberation.

वाचा– तृ. वि. ए.व. of वाच्- स्त्री. लि- talk, speech & , मनसः - षष्ठी वि. ए.व of मनस्- न. लि.- heart, mind, शौचम् - न. लि.- purity, cleansing, honesty, इन्द्रियनिग्रहः - इन्द्रियाणाम् निग्रहः - षष्ठी तत्पुरुष स.- restraint of sense organs, सर्वभूते - स.वि.ए.व. of सर्वभूतम्- सर्वम् ( all) भूतम् (being, living, animal )- कर्मधारय स., दया- compassion, एतत् -न. लिं. प्र. वि. ए. व of एतद्- this, परार्थिनाम् - पु. लिं. षष्ठी वि. ब.व. of परार्थिन्- परस्य अर्थिन्- षष्ठी तत्पुरुष स. पर - other, higher, superior, अर्थ्- १० ग.आ.प. अर्थयते- long, desire. अर्थिन् - one who longs for, desires

**न देवो विद्यते काष्ठे न पाषाणे न मृण्मये।**
**भावे हि विद्यते देवस्तस्माद्भावो हि कारणम्**॥८.११॥

देवः न काष्ठे, न पाषाणे, न मृण्मये (विद्यते। देवः भावे हि विद्यते। तस्मात् भावः हि कारणम् (अस्ति)॥

God does not exist in (idols made of) wood, stone or clay. God exists only if we believe (in Him). Hence, only the belief matters (not the material from which the statue of God is made).

*In Hinduism and some other religions as well, God is symbolized by statues made of various materials. In fact, we worship them as if those statues themselves are Gods. What is important is the firm belief in Ultimate Reality.*

काष्ठे, पाषाणे, मृण्मये, भावे- all in स. वि. ए. व. of काष्ठ- wood, पाषाण-stone, मृण्मय- made of mud (मृद्-स्त्री. लिं.-clay, mud - मय-adjctv- a affix used to indicate 'made of' 'full of'), भाव- belief, feeling , न- no, not, विद्यते- वर्त. प्र. पु. ए. व. of विद् -४ ग. आ. प. to be, to exist, देवः -God & भावः -feeling, belief; पु. लिं & कारणम्-purpose, that which matters-न. लिं. all in प्र. वि. ए. व., हि- अव्यय- indeed, surely, तस्मात् - that is why, from that,-पं. वि. ए. व. of तद् -that

**येषां न विद्या न तपो न दानं,**
**ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुविभारभूता,**
**मनुष्यरूपेण मृगाश्चरन्ति**॥१०.७॥ - त्रिष्टुभ

येषां न विद्या न तपः न दानं, ज्ञानं न शीलं न गुणः न धर्मः (अस्ति), ते मर्त्य-लोके भुविभारभूताः, मृगाः मनुष्यरूपेण चरन्ति॥

Those who do not have education ( knowledge), do not practice austerity, do not donate to charity, do not have any wisdom or character, do not have any good quality, nor follow their Dharma, are indeed burden on this Earth, They are animals, in the form of human beings, that graze (aimlessly).

येषां -for those पु. लिं. ष. वि. ब. व. of यद्-who, what, which, न -no, not, विद्या- (स्त्री. लिं), education तपः austerity, गुणः -quality, धर्मः - right code of conduct (Dharma) all (पु. लिं), दानम्-charity, ज्ञानम् -wisdom, शीलम्- character- all ( न. लिं), all प्र. वि. ए. व., ते , मृगाः, भुविभारभूताः - all पु. लिं. प्र. वि. ब. व. of तद् -he, मृग- animal, भुविभारभूत- beings as burden on the earth-भुवि-स. वि. ए. व. of भूः - earth, भार- load, burden-भुवः भारम् -भुविभारम्- ष. तत्पुरुष स., भुविभारम् भवति इति- भुविभारभूत-उपपद तत्पुरुष स. मर्त्यलोके- स. वि ए. व. of मर्त्यलोक- world of mortals, मर्त्य- mortal, लोक-world मर्त्यानां लोकः - ष. तत्पुरुष स., मनुष्यरूपेण- तृ. वि. ए. व. of मनुष्यरूप- human form- मनुषस्य रूपः - ष. तत्पुरुष स., चरन्ति- प्र.. पु. ब. व. of चर् चरति-१ ग. प. प. to graze, move, walk

**विप्रो वृक्षस्तस्य मूलं च सन्ध्या,**
**वेदाः शाखा धर्मकर्माणि पत्रम् ।**
**तस्मान्मूलं यत्नतो रक्षणीयं,**
**छिन्ने मूले नैव शाखा न पत्रम्**॥१०.१३॥- त्रिष्टुभ

विप्रः वृक्षः (इव अस्ति)। तस्य मूलं सन्ध्या, वेदाः च शाखाः, धर्मकर्माणि च पत्रं (सन्ति)। तस्मात् मूलं यत्नतः रक्षणीयम् (भवति)। मूले छिन्ने न एव शाखा न पत्रं (वर्तन्ते)॥

A wise man is like a tree. His prayers are the roots of that tree. Vedas are its branches and deeds of Dharma are its leaves. Therefore, the root must

be protected with all efforts. If the root were cut off, there would be neither a branch nor even a leaf.

*In contemporary society, one can think of good education as the root and various sciences as the branches of that tree.*

विप्रः- a wise person (knowledgeable in scriptures) & वृक्षः- a tree- both in पु. लिं. प्र. वि. ए. व., सन्ध्या- the morning, noon and evening prayers - in स्त्री. लिं. प्र. वि. ए. व., तस्य- its- in पु. लिं. ष. वि. ए. व. of तद्- that, it, he, मूलम्- root, base, origin & पत्रम्- a leaf- both in न. लिं. प्र. वि. ए. व., वेदाः- in पु. लिं. प्र. वि. ब. व. of वेदः- Veda- scripture, धर्मकर्माणि-in न. लिं. प्र. वि. ब. व. of धर्मकर्मन्- धर्मः- पु. लिं.- right codes of conduct- Dharma & कर्मन्- न. लिं- duty, work, action- धर्मः च कर्मन् च- धर्मकर्मन्- द्वंद्व स., मूलम्- root & रक्षणीयम्-to be protected, guarded- रक्षणीय- (also रक्षितव्य )- क. वि. धा. सा. वि. of रक्ष्- रक्षति १ ग. प. प. to guard, protect, save- both in न. लिं. प्र. वि. द्वि. व., यत्नतः -(यत्नतस्)- with effort, exertion- यत्नः- effort, exertion- तस्- suffix implies: by, with, from (like पं. वि.), शाखा & शाखाः- in स्त्री. लिं. प्र. वि. ए. व. & ब. व.- a branch (of a tree, an institute etc), छिन्ने & मूले- both in न. लिं. स. वि. ए. व. of छिन्नम्- cut, lop off, break asunder- छिन्न- क. भू. धा. वि. of छिद्- छिनत्ति /छिन्ते ७ ग. उ. प. to cut & मूलम्- root, च- and, न- no, not, एव-just, only & तस्मात्- therefore, for this reason- all अव्यय

**देहाभिमाने गलिते विज्ञाते परमात्मनि।**
**यत्र यत्र मनो याति तत्र तत्र समाधयः॥१३.१२॥**

(मनुष्यस्य) देहाभिमाने गलिते, (तस्य) परमात्मनि विज्ञाते, यत्र यत्र (तस्य) मनः याति, तत्र तत्र समाधयः (वर्तन्ते) ॥

When one sheds his attachment to his body and realises the Supreme Self, he finds total bliss wherever his mind wanders.

देहाभिमाने, गलिते, परमात्मनि & विज्ञाते- पु. लिं. स. वि. ए. व. of देहाभिमानः- attachment towards the body- देहः/देहम्- body, अभिमानः- pride, attachment- देहस्य अभिमानः- ष. तत्पुरुष स., गलितः- vanished dropped, lost, loosened- गलित- क. भू. धा. वि. of गल्-
गलति १ ग. प. प. to drop, fall, परमात्मन्- Supreme Self, God Almighty- परमात्मन्- परम- adjctv- Supreme, the highest, best,आत्मन्- soul, self, spirit- परमः आत्मा- परमात्मा- वि. पू. प. कर्मधारय स. & विज्ञातः- realised, understood, known- विज्ञात- क. भू. धा. वि. of वि+ ज्ञा- to realise, comprehend- (ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand), मनः- in न. लिं. प्र. वि. ए. व. of मनस्- mind, thought, याति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, reach, समाधयः- in पु. लिं. प्र. वि. ब. व. of समाधिः- concentration/ composing of mind, perfect absorption of thought into Supreme Spirit, यत्र- where at which place- यत्र

यत्र- wherever, तत्र- there, in that place- तत्र तत्र- at all those places, everywhere- both अव्यय

**पठन्ति चतुरो वेदान् धर्मशास्त्राण्यनेकशः।**
**आत्मानं नैव जानन्ति दर्वी पाकरसं यथा**॥१५.१२॥

(ते) चतुरः वेदान् पठन्ति, अनेकशः धर्मशास्त्राणि (पठन्ति), (तथापि) (ते) आत्मानम् एव न जानन्ति, यथा दर्वी पाकरसं (न जानाति) ॥

They read all four Vedas (ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद) and many Dharma scriptures frequently but do not understand the Self (आत्मन्). This is like a spoon not knowing the taste of delicacies it serves.

*Here, the analogy is between one's mind as the spoon and आत्मन् as the food. After reading all sacred scriptures, if one does not understand आत्मन् and its identity with ब्रह्मन्, then the study of the sacred scriptures is useless.*

चतुरः & वेदान् -पु. लि. द्वि. वि. ब. व. of चतुर्- four & वेद- Veda- Sacred knowledge, पठन्ति & जानन्ति- वर्त. प्र. पु. ब. व. of पठ्- पठति १ ग. प. प. to read, recite, study & ज्ञा- जानाति- जानीते- ९ ग. उ. प. to know, understand, धर्मशास्त्राणि- न. लि. द्वि. वि. ब. व. of धर्मशास्त्र- religious scriptures, a code of laws, jurisprudence- धर्म- a code of conduct, शास्त्र- scriptural injection, any department of science or knowledge- धर्मस्य शास्त्रम्- ष. तत्पुरुष स., अनेकशः - अव्यय- frequently, in various ways or manners, आत्मानम्- पु. लि. द्वि. वि. ए. व. of आत्मन् - self, individual soul, oneself, एव- अव्यय- just, only, न- no, not, यथा- अव्यय- like, in which way, दर्वी-(दर्वि)- स्त्री. लिं.- ladle, spoon, पाकरसम्- पु. लि. द्वि. वि. ए. व. of पाकरस- taste of cooking- पाक- cooking, ripeness, maturity, रस- taste, juice, essence- पाकस्य रसः- ष. तत्पुरुष स.

**लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः**
**सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।**
**सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मण्डनैः**
**सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना**॥१७.४॥शा.वि.

(यदि) लोभः (अस्ति), चेद् अगुणेन किम्? यदि पिशुनता अस्ति, पातकैः किम्? (यदि) सत्यम् (अस्ति), चेत् तपसा च किम्? यदि शुचि मनः अस्ति, तीर्थेन किम्? यदि सौजन्यम् (अस्ति), गुणैः किम्? यदि सुमहिमा अस्ति, मण्डनैः किम्? यदि सद्विद्या (अस्ति), धनैः किम्? यदि अपयशः अस्ति, मृत्युना किम्?

If one is greedy, what is the need of any other bad quality? If one is cruel, what is the need of other sins? If one is honest, why do any penance? If one has a pure mind, why go on a pilgrimage? If one is kind, what is the need of other good qualities? If one has excellent reputation, is there a need for other decorations? If one is well educated, why does he need other wealth? If one is a disgraced, why worry about death?

*This* Subhāṣita *defines good qualities as being honest, kind, having purity of mind, being educated and having a good reputation. Being greedy, cruel and disreputed are bad qualities.*

लोभः- greed, covetousness- in पु. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र.. पु. ए. व. of अस्- २ ग. प. प. to be, exist, अगुणेन & मृत्युना- both in पु. लिं. तृ. वि. ए. व. of अगुणः- bad quality- गुणः- quality, virtue, merit- न गुणः- अगुणः- नञ् तत्पुरुष स. & मृत्युः- death, God of death, पिशुन- adjctv- slanderous or backbiting- पिशुनता- backbiting, cruelty, wickedness, महिमा- greatness, glory, शोभना महिमा- सुमहिमा- प्रादि कर्मधारय स.- Exalted success, fame & सद्विद्या- excellent education, knowledge- सत्- adjctv- good, noble, virtuous, विद्या- education- सती विद्या- सद्विद्या- वि. पू. प. कर्मधारय स.- all in स्त्री. लिं. प्र. वि. ए. व., पातकैः & गुणैः- पु/न. लिं. तृ. वि. ब. व. of पातक- sin, crime & गुण- virtue quality, सत्यम्- honesty, truth, शुचि- adjctv- pure, clear, virtuous (मनस्)- mind, heart, अपयशः- failure, disgrace- अप- अव्यय- as a prefix it implies: bad, unworthy, without, यशः (यशस्)- fame, glory- यशः अपकृत्य- अपयशस्- अव्ययीभाव स. & सौजन्यम्- generosity, kindness- all in न. लिं. प्र. वि. ए. व., तपसा & तीर्थेन both- न. लिं. तृ. वि. ए. व. of तपस्- penance, religious austerity, तीर्थम्- holy water, place of pilgrimage, मण्डनैः & धनैः-both in न. लिं. तृ. वि. ब. व. of मण्डनम्- decoration, ornamenting, adorning & धनम्- wealth, money, चेद्- if, in case, च- and, किम्- a particle of interrogation- why, what for, of what use, यदि- if, in case- all अव्यय

**नान्नोदकसमं दानं न तिथिर्द्वादशी समा।**
**न गायत्र्याः परो मन्त्रो न मातुः परं दैवतम्**॥१७.७॥

अन्नोदकसमं दानं न (अस्ति)। द्वादशी समा तिथिः न (अस्ति)। गायत्र्याः परः मन्त्रः न (अस्ति)। (तथा) मातुः परं दैवतं न (अस्ति)॥

There is no gift comparable to food and water (to a needy person). There is no day holier than twelfth day of a lunar fortnight. There is no hymn more sacred than the Gayatri Mantra. There is no divinity superior to one's own mother.

*It is not clear why द्वादशी तिथिः is the most important तिथि. If at all, it has to be कृष्ण द्वादशी. A crescent moon is respected in many cultures and is the crescent moon on Shiva's head.*

अन्नोदकसमम्- one that is comparable to food and water- अन्नम्- food, उदकम्- water, सम- adjctv- same, identical, equal, like, similar to, comparable to- अन्नम् च उदकम् च- अन्नोदकम्- द्वंद्व स. & अन्नोदकस्य समम्- ष. तत्पुरुष स., दानम्- giving, granting, पर- adjctv- beyond, higher or superior to, greatest, दैवतम्- divinity, deity, god- all in न. लिं. प्र. वि. ए. व., तिथिः- a lunar day, द्वादशी- twelfth day of a lunar fortnight, समा (सम- adjctv)- see above- द्वादश्याः समा- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., गायत्र्याः & मातुः- both in स्त्री. लिं. ष. वि. ए. व. of गायत्री- name of a very sacred Mantra from ऋग्वेद & मातृ- mother, परः- adjctv- see above & मन्त्रः- vedic hymn, sacred prayer, न- no, not अव्यय

★★★★★★

# Chapter 2- About Family & Friends (कुटुम्ब: च मित्राणि)

Most of the verses in चाणक्य नीति are directed towards males and heads of the household, गृहस्थ. In this chapter, चाणक्य addresses qualities and characteristics of other members of his family, relatives and friends.

## *2.1 Family (कुटुम्बः)*

**वरयेत् कुलजां प्राज्ञो विरूपामपि कन्यकाम्।**
**रूपशीलां न नीचस्य विवाहः सदृशे कुले**॥१.१४॥

प्राज्ञः, कुलजां, विरूपाम् अपि कन्यकां वरयेत्। नीचस्य (कुलस्य) रूपशीलां (कन्यकां) न (वरयेत्)। विवाह: सदृशे कुले (कर्तव्यः भवति)॥

An intelligent man should choose a girl (for marriage) from a good family, even if she is not good looking. One should not opt for a beautiful girl born in a family of low background. Marriage alliance should be done between families of equal status.

*This verse gives more importance to the family background and general compatibility in all respects rather than the beauty of the girl. Beauty may not last long but the reputation of the family does.*

प्राज्ञः- a wise or learned/ clever man, कुलजाम्, विरूपाम्, कन्यकाम्, रूपशीलाम् & रूपवतीम्- स्त्री. लिं. द्वि. वि. ए. व. of कुलजा- well born, of high decent, good family background- कुलम्- race, family- सुकुले जायते इति - उपपद तत्पुरुष स., विरूपा- ugly, one having deformity- रूपम्- figure, appearance, beauty- विना रूपा -प्रादि कर्मधारय स., कन्यका- a girl, maiden, रूपशीला- रूपम् एव शीलम् यस्या सा-बहुव्रीहि स. रूपवती- beautiful, वत्- (वती)- suffix implies possession, quality, वरयेत्- विध्यर्थ प्र. पु. ए. व. of वृ- १,५,९ ग. उ. प.-वरति- ते, वृणोति- वृणुते, वृणाति- वृणीते- to choose, to court or select for marriage, नीचस्य- in पु. लिं. ष. वि. ए. व. of नीचः- a mean or low-born person, विवाह:- a marriage- in पु. लिं. प्र. वि. ए. व., सदृशे & कुले- in न. लिं. स. वि. ए. व. of सदृशम्- adjctv- comparable, of same status, similar & कुलम्- family, race, अपि- also, even, न- no, not- both अव्यय

**यस्य पुत्रो वशीभूतो भार्या छन्दानुगामिनी।**
**विभवे यस्य सन्तुष्टिस्तस्य स्वर्ग इहैव हि**॥२.३॥

यस्य पुत्रः वशीभूतः (अस्ति), (यस्य) भार्या छन्दानुगामिनी (अस्ति), यस्य विभवे सन्तुष्टिः (यः च सन्तुष्टः), (अस्ति), तस्य स्वर्गः इह एव हि (भवति)॥

One whose son is very compliant, whose wife follows his wishes and who is satisfied with his wealth lives in this world, as if he is heaven.

यस्य- whose, for whom & तस्य- his, for him both in पु. लिं. ष. वि. ए. व. of यद्- who & तद्- he, पुत्रः- son, वशीभूतः- under control, obedient- वश- adjctv- obedient, compliant, भूतः- happened- वशिन्- one under control- वशी भूतः - कर्मधारय स., यः (यद्)- सन्तुष्टः- fully satisfied, happy, contented- सन्तुष्ट- क. भू. धा. वि. of सं+ तुष्- to be fully satisfied- (तुष्- तुष्यति ४ ग. प. प. to be happy) & स्वर्गः- heaven- all in पु. लिं. प्र. वि. ए. व., भार्या- wife, छन्दानुगामिनी- छन्दः (छन्दस्)- न. लिं- desire, wish, conduct, अनुगामिन्- follower, companion- अनु- अव्यय- as prefix to verbs implies: along, after, following, गामिन्- goer, छन्दसाम् अनुगामिनी - ष. तत्पु. स. & सन्तुष्टिः- happiness- all in स्त्री. लिं. प्र. वि. ए. व., विभवे- in पु. लिं. स. वि. ए. व. of विभवः- wealth, prosperity, च- and, इह- here, in this world, एव- just, only, हि- indeed, surely- all अव्यय

**ते पुत्रा ये पितुर्भक्ताः स पिता यस्तु पोषकः।**
**तन्मित्रं यत्र विश्वासः सा भार्या यत्र निर्वृतिः**॥२.४॥

ये (पुत्राः) पितुर्भक्ताः (सन्ति), ते (वै) पुत्राः (भवन्ति)। यः पोषकः (अस्ति) सः तु पिता (भवति)। यत्र विश्वासः (अस्ति), तद् मित्रं (भवति)। यत्र निर्वृतिः (अस्ति),सा (खलु) भार्या (अस्ति)॥

They are the (real) sons, who are devoted to their father. He is the (real) father who nourishes (his children). He is the (real) friend, whom one can trust. She is the (real) wife (in whose company, one feels truly) blessed.

ये, पितुर्भक्ताः, ते & पुत्राः- all in पु. लिं. प्र. वि. ब. व. of यद्- who, पितुर्भक्तः- one who is attached or devoted to a father- पितृ (पिता)- father, भक्तः- faithful, attached or devoted to- भक्त- क. भू. धा. वि. of भज्- भजति- ते १ ग. उ. प. to adore, to be attached or devoted to- पितुः भक्तः- ष. तत्पुरुष स., तद्- he, पुत्रः- son, यः (यद्)- पोषकः- one who nourishes, fosters, supports- पोषः- growth, fostering, supporting (पुष्- पोषति, पुष्यति & पुष्णाति १, ४ & ९ ग. प. प.)- पोषम् करोति इति - पोषकः- उपपद तत्पुरुष स., सः (तद्)- he, पिता (पितृ)- father & विश्वासः- trust, reliance, confidence- ( वि+ श्वस्- to confide in- श्वसिति-२ ग. प. प. to

breathe)- all in पु. लिं. प्र. वि. ए. व., तद्-he, it & मित्रम्- a friend- both in न. लिं. प्र. वि. ए. व., निर्वृतिः- happiness, satisfaction, bliss- (निस्+ वृ- वरति-ते, वृणोति-वृणुते, वृणाति- वृणीते), सा (तद्)- she & भार्या- wife- all in स्त्री. लिं. प्र. वि. ए. व., तु-but, on the other hand & यत्र- where, in which place or case- both अव्यय

**पुत्राश्च विविधैः शीलैर्नियोज्याः सततं बुधैः।**
**नीतिज्ञाः शीलसम्पन्ना भवन्ति कुलपूजिताः**॥२. १०॥

बुधैः, पुत्राः सततं विविधैः शीलैः च नियोज्याः (क्रियन्ते)। नीतिज्ञाः शीलसम्पन्नाः (पुत्राः) कुलपूजिताः भवन्ति॥

Wise people continuously bring up their children with various virtues of good character. Children with knowledge of ethical behaviour and endowed with moral character are well respected by the (entire) family.

पुत्राः, नियोज्याः, नीतिज्ञाः शीलसम्पन्नाः & कुलपूजिताः- all in पु. लिं. प्र. वि. ब. व. of पुत्रः-son, child, नियोज्यः- to be empowered with, charged with- नियोज्य (also नियोजनीय & नियोजितव्य)- क. वि. धा. सा. वि. of नि+ यज्- to deploy, ordain, endow with- (यज्- युनक्ति युंक्ते ७ ग. उ. प. to join, unite, attach), नीतिज्ञः-knowledgeable in manner of conducting oneself- नीतिः- स्त्री. लिं.- conduct, manner of conducting oneself, right course, policy, ज्ञः-wise, learned, knowledgeable man- नीतिम् जानाति इति- नीतिज्ञः- उपपद तत्पुरुष स., शीलसम्पन्नः-one with good moral character- शीलम्- न. लिं.- character, disposition, good nature, virtue, सम्पन्नः- endowed with, equipped with- सम्पन्न- क. भू. धा. वि. of सं+ पद्- to be possessed of, furnished with- (पद्- पद्यते ४ ग. आ. प. to go, approach)- शीलेन सम्पन्नः - तृ.तत्पुरुष स., कुलेन पूजितः- तृ.तत्पुरुष स., कुलपूजितः-one who is honoured or respected by the family- कुलम्- family, race, पूजितः-honoured, respected- पूजित- क. भू. धा. वि. of पूज्- पूजयति-ते १० ग. उ. प. to worship, honour, revere, विविधैः & शीलैः- both in न. लिं. तृ. वि. ब. व. of विविध-adjctv- diverse, varieties of, multiple & शीलम्- (see above), बुधैः- in पु. लिं. तृ. वि. ब. व. of बुधः- a wise, knowledgeable or learned man, भवन्ति- वर्त. प्र. पु. ए. व. of भू- भवति १ ग. प. प. to be to exist, happen, च-and & सततम्- regularly, always- both अव्यय

**माता शत्रुः पिता वैरी येन बालो न पाठितः।**
**न शोभते सभामध्ये हंसमध्ये बको यथा**॥२.११॥

येन बालः न पाठितः (अस्ति), (सा) माता शत्रुः (तथा) पिता वैरी (एव भवति)। सभामध्ये ( सः बालः), यथा हंसमध्ये बकः (तथा) न शोभते॥

The mother is an enemy and the father is a foe if (their) child is not educated. Such a child does not shine in an assembly (of learned people), like a crane (is out of place) amidst a flock of swans.

येन-in पु. लिं. तृ. वि. ए. व. of यद्- who, बालः- child, पाठितः- educated, taught- प्रयोजक क. भू. धा. वि. of पठ्- पाठयति- ते- to cause to teach, instruct- (पठ्- पठति १ ग. प. प. to read, learn, study), पिता (पितृ)- father, बकः- Indian crane, a white coloured bird with long neck and long legs, शत्रुः- enemy, adversary, foe, वैरी (वैरिन्)- an enemy-all in पु. लिं. प्र. वि. ए. व., माता (मातृ)- mother- in स्त्री. लिं. प्र. वि. ए. व., शोभते- वर्त. प्र. पु. ए. व. of शुभ्- १ ग. आ. प. to shine, be splendid, look beautiful, सभामध्ये & हंसमध्ये- both in पु. लिं. स. वि. ए. व. सभामध्यम्- amidst an assembly- सभा- स्त्री. लिं.- an assembly, meeting, मध्यम्- adjctv- middle, amidst- सभे मध्यम् & हंसमध्यम्- हंसः- a swan- हन्सेषु मध्यम्- both स. तत्पुरुष स., यथा- in which manner, way, न- no, not- both अव्यय

**लालनाद् बहवो दोषास्ताडनाद् बहवो गुणाः।**
**तस्मात्पुत्रं च शिष्यं च ताडयेन्न तु लालयेत्॥२.१२॥**

पुत्रं च शिष्यं च लालनाद् बहवः दोषाः (भवन्ति तथा तयोः) ताडनात् बहवः गुणाः (वर्तन्ते)। तस्मात् (तौ) ताडयेत् न तु लालयेत्॥

Over-indulging a child or a student creates many faults (in them). Punishing (them when needed) produces many virtues. Therefore, one should not over-indulge, but punish them (as needed when they commit a mistake).

लालनाद् & ताडनात्- both न. लिं. पं. वि. ए. व. and लालने & ताडने- both न. लिं. स. वि. ए. व. of लालनम्- over fondling, over indulging & ताडनम्- beating, flogging, बहवः, दोषाः & गुणाः- all in पु. लिं. प्र. वि. ब. व. of बहु- adjctv- many, various, multiple, दोषः- fault, mistake, wrong doing & गुणः- virtue, advantage, quality, पुत्रम् & शिष्यम्- both in पु. लिं. द्वि. वि. ए. व. of पुत्रः- son, child & शिष्यः- student, disciple, तस्मात्- therefore, for that reason, च- and, न- no, not, तु- but, on the other hand- all अव्ययs ताडयेत्- प्र पु ए व विध्यर्थ of तड्-ताडयति-ते १० उ प.- to beat लालयेत्- प्र पु ए व विध्यर्थ of लल् - लालयति- ते १०. उ. प.- to fondle

**एकेन हि सुवृक्षेण पुष्पितेन सुगंधिना।**
**वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा॥३.१४॥**

**एकेन शुष्कवृक्षेण दह्यमानेन वह्निना।**
**दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा॥३.१५॥**

(३.१४) यथा एकेन हि सुगंधिना पुष्पितेन सुवृक्षेण तद् वनं सर्वं वासितम् (भवति तथा एकेन हि), सुपुत्रेण कुलं (ख्यातिम् आप्नोति)॥

(३.१५) यथा वह्निना दह्यमानेन एकेन (हि) शुष्कवृक्षेण तद् वनं सर्वं दह्यते, (तथा एकेन) कुपुत्रेण कुलं (विनाशम् प्राप्नोति)॥

(3.14) Just as a single beautiful tree with fragrant flowers makes an entire forest full of scent, a good son brings good reputation to his entire family.

(3.15) Just as a single flaming dry tree burns out an entire forest, a bad son brings disgrace to his entire family.

तद्- that, वनम्- forest, सर्वम्- pron. adjctv- all, entire, कुलम्- family, race & वासितम्- scented, fragrant ,perfumed- (वासित- क. भू. धा. वि. of वास्- वासयति-ते १० ग. उ. प. to scent, make fragrant)- all in न. लिं. प्र. वि. ए. व., एकेन, सुवृक्षेण, पुष्पितेन, सुगंधिना,शुष्कवृक्षेण & दह्यमानेन- all in न. लिं. तृ. वि. ए. व. of एकम्- one, single, सुवृक्षम्- a beautiful tree- वृक्षम्- tree- - शोभनम् गन्धम्- सुगन्धम्, सुन्दरम् वृक्षम्- सुवृक्षम्- both प्रादि कर्मधारय स., पुष्पितम्- bloomed, flowered- क. भू. धा. वि. of पुष्प्- पुष्प्यति ४ ग. प. प. to bloom, open, सुगंधिन्- one which is fragrant, शुष्कवृक्षम्- parched up dry tree,शुष्क- parched, dried up- क. भू. धा. वि. of शुष्- शुष्यति ४ ग. प. प. to be dry, parched up, शुष्कम् वृक्षम्- वि. पू. प. क. स. & दह्यमानम्- burning- दह्यमान- वर्त. का. वा. धा. सा. वि. of दह्- दहति १ ग. प. प. to burn, सुपुत्रेण, कुपुत्रेण- & वह्निना- all in पु. लिं. तृ. वि. ए. व. of सुपुत्रः- a good son- शोभनः पुत्रः- सुपुत्रः & कुपुत्रः- a bad son- कुत्सितः पुत्रः- कुपुत्रः- both प्रादि कर्मधारय स. & वह्निः- fire, दह्यते- कर्मणि प्रयोग प्र. पु. ए. व. of दह्- see above, यथा- like which, how & हि- surely, indeed, both अव्यय

**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।**
**आल्हादितं कुलं सर्वं यथा चन्द्रेण शर्वरी**॥३.१६॥

विद्यायुक्तेन, साधुना एकेन सुपुत्रेण अपि सर्वं कुलम् आह्लादितम् (भवति), यथा ( एकेन) चन्द्रेण शर्वरी (आह्लादिता भवति)॥

The whole family rejoices by even a single, well educated and well behaved son, just like the whole night turns delightful just by a single moon.

विद्यायुक्तेन, साधुना, एकेन, सुपुत्रेण & चन्द्रेण- all in पु. लिं. तृ. वि. ए. व. of विद्यायुक्तः- one who is educated, endowed with knowledge- विद्या- स्त्री. लिं.- education, knowledge, युक्तः- furnished or endowed with, fit, proper- युक्त- क. भू. धा. वि. of युज्- युनक्ति युंक्ते ७ ग. उ. प. to furnish, endow, join- विद्यया युक्तः- तृ. तत्पुरुष स., साधुः- noble, virtuous, well-behaved, एकः- one, single, सुपुत्रः- excellent

son- सु- अव्यय- suffix implies good, best, very, पुत्रः- son, child- सुभगः पुत्रः- प्रादि कर्मधारय स. & चन्द्रः- the moon, सर्वम्- all, whole, entire, कुलम्- race, family & आह्लादितम्- happy, pleased, rejoiced- आह्लादित- क. भू. धा. वि. of आ+ ह्लाद्- to rejoice, to be delighted- (ह्लाद्- ह्लादते १ ग. आ. प. to be glad, happy)- all in न. लिं. प्र. वि. ए. व., शर्वरी- night- in स्त्री. लिं. प्र. वि. ए. व.,अपि- even, also, यथा- like which, as- both अव्यय

**किं जातैर्बहुभिः पुत्रैः शोकसन्तापकारकैः।**
**वरमेकः कुलालम्बी यत्र विश्राम्यते कुलम्**॥३.१७॥

बहुभिः शोकसन्तापकारकैः पुत्रैः जातैः किम् (प्रयोजनम् अस्ति)? एकः कुलालम्बी (पुत्रः), यत्र कुलं विश्राम्यते, वरं (भवति)॥

What is the purpose of having born many sons who create (only) sorrow and torment (for the family)? A single, dependable son with whom the family can settle down (in happiness), is much preferred.

बहुभिः, शोकसन्तापकारकैः, पुत्रैः, जातैः- all in पु. लि. तृ. वि. ब. व. of बहु- adjctv- many, very much, large number, शोकसन्तापकारकः- one that creates sorrow and torture- शोकः-sorrow, distress, anguish, सन्तापः -torture, torment, suffering, कारकः- adjctv- producing, generating, doing- शोकः च सन्तापः च- शोकसन्तापः- द्वंद स. & शोकसन्तापस्य कारकः- शोकसन्तापकारकः- ष. तत्पुरुष स., पुत्रः- son, child, जातः- born, one who has taken birth- जात- क. भू. धा. वि. of जन्- जायते ४ ग. आ. प. to be born, produced, एकः- one, single & कुलालम्बी- one who is maintaining the family, family- supporting- both in , कुलम्- race, family, आलम्बिन्- one who is maintaining, one who is dependable- कुलम् आलम्बते इति - कुलालम्बिन्- उपपद स.-both in पु. लि. प्र. वि. ए. व., विश्राम्यते- आ. प. वर्त. प्र. पु. ए. व. of वि+ श्रम्- to settle down, repose, take rest- (श्रम्- श्राम्यति ४ ग. प. प. to exert, take pains, toil, वरम्- preferred, excells, the best, यत्र- in which place, where & किम्- a particle of interrogation: what, which-all अव्यय

**लालयेत् पंच वर्षाणि, दश वर्षाणि ताडयेत्।**
**प्राप्ते तु षोडशे वर्षे, पुत्रे मित्रवदाचरेत्**॥३.१८॥

(पुत्रं) पंच वर्षाणि लालयेत्, दश वर्षाणि ताडयेत्, षोडशे वर्षे प्राप्ते तु पुत्रे मित्रवत् आचरेत्॥

A son (child) is to be pampered until he becomes five years old. He is to be disciplined for next 10 years, but when he attains 16th year, he is to be treated like a friend.

पञ्च, दश & वर्षाणि- प्र. वि. ब. व. of पञ्चन् -five, दशन् -ten & वर्ष-year, लालयेत्, ताडयेत्, आचरेत्-all विध्यर्थ प. प. प्र. पु. ए. व. of लल्- १० ग. उ. प.-लालयति-ते- to fondle, play, caress, तड्-ताडयति-ते १० ग. उ. प. to beat, punish, discipline & आ+चर्- to observe, behave, practice-चर्-चरति १ ग. प. प. to walk, move, षोडशे, वर्षे, प्राप्ते, पुत्रे, all स. वि. ए. व. of षोडशन्-16, वर्ष-year, प्राप्त-reach, obtain-क. भू. धा. वि. of प्र+आप्-(आप्-आप्नोति ५ ग. प. प. to obtain, attain), पुत्र-son, child, मित्रवत्-like a friend- मित्र- a friend-वत्-adjctv- a prefix to noun indicates possession, similiarity

**वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।**
**एकश्चन्द्रस्तमो हन्ति न तु तारागणस्तथा**॥४.६॥

पाठभेद: वरमेको गुणी पुत्रो निर्गुणैश्च शतैरपि। एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि॥

एकः गुणी पुत्रः वरं (भवति)। मूर्खशतानि अपि न च (वरानि भवन्ति)।(शतैः निर्गुणैः च अपि)। एकः चन्द्रः तमः हन्ति, तथा तारागणः (तमः) तु न (हन्ति)॥

One intelligent son is worth more than even a hundred foolish sons! One Moon is adequate to disperse the darkness, but not the multitude of stars.

एकः- one, single, गुणी (गुणिन्-adjctv)- meritorious, well-behaved, पुत्रः- son, child, चन्द्रः- Moon, तारागणः- multitude of stars- तारा- स्त्री. लिं.- star, गण- पु/न. लिं- multitude, collection, group- ताराणाम् गणः - ष. तत्पुरुष स.-all in पु. लि. प्र. वि. ए. व., वरम्- adjctv- better than, preferable, तमः (तमस्)- darkness- in न. लिं. द्वि. वि. ए. व., मूर्खशतानि- in न. लिं. प्र. वि. ब. व. of- मूर्खशतम्- foolish-hundred- मूर्ख- fool, stupid, शतम्- hundred- शतानि मूर्खाणि- मूर्खशतम्- वि. उ. प. कर्मधारय स., हन्ति- वर्त. प्र. पु. ए. व. of हन्-२ ग. प. प. to kill, strike, निर्गुणैः, तारागणैः & शतैः- all in तृ. वि. ब. व. of निर्गुणः- पु. लिं- one without any quality, virtue- गुणः- virtue, quality- निर्गताः गुणाः यस्मात् सः- बहुव्रीहि स., तारागणः- see above & शतम्- hundred- न. लिं., अपि- even, also, and, न- no, not, च- and, तथा- like that, thus, तु- but, on the contrary- all अव्यय

**किं तया क्रियते धेन्वा या न दोग्ध्री न गर्भिणी।**
**कोऽर्थः पुत्रेण जातेन यो न विद्वान् न भक्तिमान्**॥४.९॥

या (धेनुः) न दोग्ध्री न गर्भिणी (अस्ति), तया धेन्वा किम् क्रियते? यः (पुत्रः) न विद्वान् न भक्तिमान् (अस्ति), कः अर्थः (अस्ति तादृक्षेण) पुत्रेण जातेन?

What is the use of a cow that does not give milk nor ever gets pregnant? What is the purpose of a born son who is neither learned nor devoted (to his parents / God)?

या (यद्)- which, दोग्ध्री- one which yields milk, गर्भिणी- a pregnant female of human or animal- all in स्त्री. लिं. प्र. वि. ए. व., तया & धेन्वा- both in स्त्री. लिं. तृ. वि. ए. व. of तद्- that, it & धेनुः- cow, क्रियते- कर्मणि प्रयोग प्र. पु. ए. व. of कृ- करोति-कुरुते ८ ग. उ. प. to do, make, यः (यद्)- who, विद्वान् (विद्वस्)- a wise or learned person, भक्तिमान् (भक्तिमत्)- one who is devout, attached, loyal- (भक्तिः- devotion, loyalty, attachment & मत्- suffix implies quality, nature), कः (किम्)- what, which, अर्थः- meaning, purpose, use- all in पु. लिं. प्र. वि. ए. व., पुत्रेण & जातेन- both in पु. लिं. तृ. वि. ए. व. of पुत्रः- son & जातः- born, taken birth- जात- क. भू. धा. वि. of जन्-जायते ४ ग. आ. प. to be born, produced, न-no, not, किम्- what, wherefore- both अव्यय

**संसारतापदग्धानां त्रयो विश्रान्तिहेतवः।**
**अपत्यं च कलत्रं च सतां सङ्गतिरेव च**॥ ४.१०॥.

संसार-ताप-दग्धानाम् अपत्यं च कलत्रं च सतां सङ्गतिः एव च, त्रयः विश्रान्ति-हेतवः (सन्ति)॥

For the people burnt with miseries of worldly life, a child, a wife and company of noble people are good sources of relaxation.

संसारतापदग्धानाम् & सताम्- both in- पु. लि. ष. वि. ब. व. of संसारतापदग्धः- one who is tormented with miseries of day-to-day worldly life- संसारः- worldly life, mundane existence, तापः- torment, misery, agony, दग्धः- burnt, scorched- दग्ध- क. भू. धा. वि. of दह्- दहति १ ग. प. प. to burn, scorch, torment- संसारस्य तापः- संसारतापः- ष. तत्पुरुष स. & संसारतापेन दग्धः- संसारतापदग्धः- तृ. तत्पुरुष स. & सत्- a noble or saintly person, अपत्यम्- offspring, child, progeny & कलत्रम्- wife- both in न. लि. प्र. वि. ए. व., सङ्गतिः- company, contact, meeting- स्त्री. लि. प्र. वि. ए. व., त्रयः & विश्रान्तिहेतवः- both in पु. लि. प्र. वि. ब. व. of त्रि- three & विश्रान्तिहेतुः- a source of relaxation- विश्रान्ति- स्त्री. लिं.- rest, relaxation, tranquility & हेतुः- पु. लिं.- source, object, means, motive- विश्रान्तेः हेतुः- विश्रान्तिहेतुः- ष. तत्पुरुष स., च- and & एव- just, mere, both अव्यय

**किं कुलेन विशालेन शीलमेवात्र कारणम्।**
**कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु**॥८.१९॥

विशालेन कुलेन किं (प्रयोजनम् अस्ति)? शीलम् एव अत्र कारणं ( भवति)। किं सुगन्धिषु कुसुमेषु कृमयः न जायन्ते?

What is the use of (birth in) a great family? Only a good character is of utmost value. Are not insects found in fragrant flowers?

*The author compares a bad son with an insect on a beautiful flower. Only a colorful butterfly makes the flower look more beautiful.*

विशालेन & कुलेन - न. लिं. तृ. वि. ए. व. of विशाल-great, broad, large & कुल-family, race, किम् - what, which (interrogative), शीलम् & कारणम् -न. लिं. प्र. वि. ए. व. of शील- character, nature, conduct & कारण- object, ground, basis, एव- अव्यय-only, just, just so, अत्र- अव्यय-here, in this place, सुगन्धिषु & कुसुमेषु- न. लिं. स. वि. ब. व. of सुगन्ध- fragrance & कुसुम- flower कृमयः- पु. लिं. प्र. वि. ब. व. of कृमिः; जायन्ते-वर्त. तृ. पु. ब. व. of जन्-जायते ४ ग. आ. प. to be born, take birth, happen

**माता च कमला देवी पिता देवो जनार्दनः।**
**बान्धवा विष्णुभक्ताश्च स्वदेशो भुवनत्रयम्**॥१०.१४॥

पाठभेद: माता च पार्वती देवी पिता देवो महेश्वरः। बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम्॥-आदिशंकरविरचित अन्नपूर्णास्तोतम्

(यस्य) माता च कमला वा पार्वती देवी (अस्ति), पिता देवः जनार्दनः वा महेश्वरः देवः(अस्ति), बान्धवाः विष्णुभक्ताः वा शिवभक्ताः च (सन्ति), (तस्य) स्वदेशः भुवनत्रयम् (अस्ति)॥
His/Her own country is equal to all the three worlds for a person if his/her mother is like Goddess Lakṣmī and/or P ā rvati, whose father is like Lord Viṣṇu and/or Śiva and whose relatives are the devotees of Lord Viṣṇu and/or Śiva.

माता (मातृ)- कमला- an epithet of Goddess Lakṣmī, देवी- Goddess, पार्वती- goddess Pārvati- all in स्त्री. लिं. प्र. वि. ए. व., पिता (पितृ)- देवः- god, जनार्दनः- an epithet of god Vishnu, महेश्वरः- महान् ईश्वरः- वि. पू. प. कर्मधारय स- god Shiva स्वदेशः- one's own country- स्व- one's own, self, देशः- place, country- स्वस्य देशः- ष.तत्पुरुष स. -all in पु. लिं. प्र. वि. ए. व., बान्धवाः, विष्णुभक्ताः & शिवभक्ताः- all in पु. लिं. प्र. वि. ब. व. of बान्धवः- kinsman, relationship, विष्णुभक्तः- a devotee of Lord Viṣṇu - विष्णोः भक्तः & शिवभक्तः- a devotee of Lord Śiva - शिवस्य भक्तः- both ष. तत्पुरुष स., भुवनत्रयम्- all three worlds- earth, heaven and lower region- भुवनम्- world- त्रयम्- a triad, a group or collection of three- in न. लिं. प्र. वि. ए. व. भुवनानाम् त्रयम्- भुवनत्रयम्-ष. तत्पु.स.

**सानन्दं सदनं सुताश्च सुधियः कान्ता प्रियालापिनी**
**इच्छापूर्तिधनं स्वयोषिति रतिः स्वाज्ञापराः सेवकाः**
**आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे,**
**साधोः संगमुपासते च सततं धन्यो गृहस्थाश्रमः**॥१२.१॥ - शा.वि.
पाठभेद: इच्छापूर्तिधनं = सन्मित्रं सुधनं

(यस्य) सदनं सानन्दं, सुताः च सुधियः, कान्ता प्रियालापिनी (अस्ति), (यत्र) इच्छापूर्तिधनम् {अस्ति}), ({यस्य} सन्मित्रं सुधनं {भवति}), (यस्य) रतिः स्वयोषिति (अस्ति), सेवकाः स्वाज्ञापराः (सन्ति), (यस्य) गृहे आतिथ्यं, शिवपूजनं, प्रतिदिनं मिष्टान्नपानं, सततं साधोः संगम् उपासते च (तस्य) गृहस्थाश्रमः धन्यः (अस्ति)॥

The life of that householder is indeed a blessed one when his house is full of happiness, his children are intelligent and his wife is pleasant speaking. He has sufficient wealth to meet his wants (who has a noble friend), he loves his wife, his servants are all very obedient and he is very hospitable. Further, he worships God Śiva, enjoys sweet-meals in his house and honours noble people regularly.

सदनम्- house, mansion, सानन्दम्- full of joy, happiness- आनन्दः- joy, happiness- आनन्देन सह यद् तद्- सहबहुव्रीहि स., आतिथ्यम्- hospitality, reception, शिवपूजनम्- worship of Śiva, शिवः- God Śiva, पूजनम्- worship- शिवस्य पूजनम्- ष. तत्पुरुष स., प्रतिदिनम्- every day- दिनम्- a day, दिने दिने- अव्ययीभाव स., मिष्टान्नपानम्- मिष्ट- adjctv- sweet, अन्नम्- food, पानम्- drinking, eating, मिष्टम् अन्नम्- मिष्टान्नम्- a sweet-meat, मिष्टान्नस्य पानम्- ष. तत्पुरुष स., इच्छापूर्तिधनम्- wealth adequate to fulfill all desires- इच्छा- desire, wants & पूर्तिः- fulfilment- both स्त्री. लिं, धनम्- न. लिं- wealth, money- इच्छायाः पूर्तिः- इच्छापूर्तिः- ष. तत्पुरुष स., संगम्- association, company & इच्छापूर्तिपर्यन्तम् धनम्- इच्छापूर्तिधनम्- म. प. लोपी स. सन्मित्रम्- noble friend- सत्- good noble, मित्रम्- friend- वि. पू. प. कर्मधारय स., सुधनं -शोभनम् धनं- प्रादि कर्मधारय स. - well earned money, सधनम्- a wealthy, one with wealth- धनेन सह- सहबहुव्रीहि स.- all in न. लिं. प्र. वि. ए. व., सुताः, सुधियः, सेवकाः, स्वाज्ञापराः,- all in पु. लिं. प्र. वि. ब. व. of सुतः- son, सुधीः- धीः- स्त्री. लिं- intellect, understanding, सु- अव्यय- prefix implies good, great- सुभगा धीः यस्य सः- सुधीः- बहुव्रीहि स., सेवकः- servant, स्वाज्ञापरः- obedient to one's command- स्व- one's own, आज्ञा- command, order, परम्- very much, in high degree, in line with- स्वस्य आज्ञा- स्वाज्ञा- ष. तत्पुरुष स. & स्वाज्ञासु परः यः सः- बहुव्रीहि स., कान्ता- wife, beloved & प्रियालापिनी- प्रिय- adjctv- likable, sweet, आलापिनी- talking, speaking- प्रियम् आलापयति इति- प्रियालापिनी (प्रियालापिन्)- उपपद तत्पुरुष स. & रतिः- love, affection- all in स्त्री. लिं. प्र. वि. ए. व., स्वयोषिति- in स्त्री. लिं. स. वि. ए. व. of स्वयोषित्- one's own woman, wife- स्व- one's own, योषित्- woman, girl wife, साधोः- in पु. लिं. ष. वि. ए. व. of साधुः- a noble, saintly person, उपासते- वर्त. प्र. पु. ए. व. of उप+ आस्- serve, wait upon, worship, गृहे- न. लिं. स. वि. ए. व. of गृहम्- house, धन्यः- fortunate, blessed, lucky & गृहस्थाश्रमः- a life of a householder- गृहम्- house, गृहे तिष्ठति इति- गृहस्थः- a householder- उपपद तत्पुरुष स. & गृहस्थस्य आश्रमः- गृहस्थाश्रमः- ष. तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., च-and, सततम्- always, constantly- both अव्यय

**न विप्रपादोदककर्दमानि**
**न वेदशास्त्रध्वनिगर्जितानि।**
**स्वाहास्वधास्वस्तिविवर्जितानि**
**श्मशानतुल्यानि गृहाणि तानि**॥१२.१०॥ -त्रिष्टुभ

न विप्र-पादोदक-कर्दमानि, न वेद-शास्त्र-ध्वनि- गर्जितानि, स्वाहा-स्वधा-स्वस्ति-विवर्जितानि, तानि गृहाणि श्मशान-तुल्यानि (भवन्ति)॥

The houses, where there is no hospitality for learned men, where one does not hear echoes of sounds of Vedas (scriptures) and where there is no worship of Gods and of Pitrus (Manes) or no auspicious invocations, are like cremation grounds.

विप्रपादोदककर्दमानि, वेदशास्त्रध्वनिगर्जितानि, स्वाहास्वधास्वस्तिविवर्जितानि, तानि, गृहाणि, श्मशानतुल्यानि- all in न. लिं. प्र. पु. ब. व. of विप्रपादोदककर्दमम्- slush of water of feet-wash of learned men (implying hospitality of learned men')- विप्रः- a member of a priestly class, learned man, पादः-foot, उदकम्- water, कर्दमम्- slush- विप्रस्य पादस्य उदकस्य कर्दमम्- compound ष. तत्पुरुष स., वेदशास्त्रध्वनिगर्जितम्- one that is resounding with echoes of injunctions of Vedas- वेद- sacred scripture- Veda, शास्त्र- scripture, treatise, precept, ध्वनि- sound, गर्जितम्- roared, resounding- गर्जित- क. भू. धा. वि. of गर्ज्- गर्जति १ ग. प. प. to roar- वेदस्य शास्त्रस्य ध्वनिः- वेदशास्त्रध्वनिः - ष. तत्पुरुष स. & वेदशास्त्रध्वनिना गर्जितम् यद् तद्- बहुव्रीहि स., स्वाहास्वधास्वस्तिविवर्जितम्- one that is devoid of worship of Gods, Pitrus- (Manes) or invoking of blessings for well-being- स्वाहा, स्वधा & स्वस्ति- all अव्ययs- first two are exclamations used in offering oblation to the Gods & Manes (पितृs) & the last one is exclamation of Well-being, 'May well be with (one)- विवर्जितम्- devoid of, absence of- विवर्जित- क. भू. धा. वि. of वि+ वृज्- to shun, avoid- (वृज्- वर्जति १ ग. प. प. to give up, abandon), तद्- that, गृहम्- house, residence & श्मशानतुल्यम्- comparable to cremation ground- श्मशानम्- cremation ground, तुल्यम्- similar, like, resembling- श्मशानतुल्यम्- श्मशानाय तुल्यम् -चतुर्थी तत्पु. स., न- no, not-अव्यय , स्वाहा च स्वधा च स्वस्ति च- स्वाहास्वधास्वतयः- द्वंद्व स. स्वाहास्वधास्वस्तिभ्य: विवर्जितम् -पञ्चमी तत्पु or स्वाहास्वधास्वस्तीनां ध्वनिभ्यः विवर्जितम् -मध्यम पद लोपी स.

## *2.2 Friends and Relatives (मित्राणि च बान्धवाः)*

**उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः**॥१.१२॥
पाठभेदः - आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे।

(प्राप्ते) उत्सवे (आतुरे) व्यसने च एव दुर्भिक्षे, राष्ट्रविप्लवे (शत्रुसंकटे), राजद्वारे, श्मशाने, च यः तिष्ठति सः बान्धवः (अस्ति)॥

One who stands by you in good and bad times, during famine, during national calamity (enemy danger), when summoned at royal court as well as at cremation grounds is the real relative.

आतुरे, उत्सवे, व्यसने, दुर्भिक्षे, राष्ट्रविप्लवे, (शत्रुसंकटे), राजद्वारे and श्मशाने all-स. वि. ए. व. of आतुर-sick उत्सव- festival, happy time, व्यसन- tragedy, bad time, दुर्भिक्ष- famine, scarcity, राष्ट्रविप्लव -national calamity- राष्ट्रस्य विप्लव, राजद्वार- at royal gate (court)- राज्ञः द्वारः-both ष. तत्पुरुष स., शत्रुसंकट- Attack from enemies-शत्रुभ्य: संकटः- पञ्चमी तत्पुरुष स, श्मशान- crematorium, च- and, एव-अव्यय- just so, quite, यः & सः both पु. लिं. प्र. वि. ए. व. of यद्- who, what, which & तद्-he, she, it, बान्धवः- पु. लिं. प्र. वि. ब. व बन्धु - relative, brother, kinsman, तिष्ठति- प्र. पु. ए. व. of स्था- १ ग. प. प. to stand, stay

**परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।**
**वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्**॥२.५॥

परोक्षे कार्यहन्तारं, प्रत्यक्षे प्रियवादिनं, तादृशम् मित्रं, विषकुम्भं पयोमुखम् (इव) वर्जयेत्॥

One should avoid a friend who talks pleasantly in front of you and but plots to spoil your work behind you. He is like a pot full of poison with milk only at the top.

परोक्षे & प्रत्यक्षे- स. वि. ए. व. of परोक्ष-परस्- (परः)-अव्यय- beyond, further, away from, with exception of, अक्षः - knowledge- अक्षणो: परः -परोक्षः - without knowledge-(also -अक्षम्- an organ of sense- behind the eye) अव्ययीभाव स., प्रत्यक्ष- openly, in person, publicly-प्रति-अव्यय- prefix to noun indicates 'in front', 'towards', 'in the direction of'- अक्षणो: प्रति -प्रत्यक्ष-अव्ययीभाव स., कार्यहन्तारम्, प्रियवादिनम्, तादृशम्, विषकुम्भम्, पयोमुखम् & मित्रम् --पु. लिं. द्वि. वि. ए. व. of कार्यहन्तृ -killer of the job, spoil sport-कार्य- (also करणीय, कर्तव्य, कृत्य) work, job -कर्मणि वि. धा. सा. वि. of कृ. -करोति-कुरुते ८ ग. उ. प. to do, work, हन्तृ- adjectv- one who kills, strikes, destroys- कार्यस्य हन्ता-ष. तत्पुरुष स., प्रियवादिन्-sweet talker- प्रिय- pleasant, likable, वादिन्-speaker, प्रिय: वादिन् - कर्मधारय स., तादृश्-adjctv- such like, like that, विषकुम्भ- pot of poison- विष-poison, कुम्भ- pot- विषस्य कुम्भः-ष. तत्पुरुष स., पयोमुख- milk topped- पयस्- milk, मुख- face, top, यस्य मुखे पयः तद् -पयोमुख- बहुव्रीहि स. & मित्र- friend, वर्जयेत्-विध्यर्थ प्र.. पु. ए. व. of वृज् -वर्जति १ ग. प. प. & वर्जयति-ते १० ग. उ. प. to shun, avoid.

**न विश्वसेत्कुमित्रे च मित्रे चाति न विश्वसेत्।**
**कदाचित्कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत्**॥२.६॥

(जनः) कुमित्रे च न विश्वसेत् (तथा) मित्रे च (अपि) न अति विश्वसेत्। कदाचित् कुपिपितं मित्रं सर्वं गुह्यं प्रकाशयेत् ॥

One should not trust a bad friend. One should also not trust a (good) friend too much. Sometimes, (even that good) friend, when angry, may disclose all (your) secrets.

मित्रे & कुमित्रे- both in न. लिं. स. वि. ए. व. of मित्रम्- a friend & कुमित्रम्- a bad friend- कुत्सितम् मित्रम्- प्रादि कर्मधारय स., विश्वसेत् & प्रकाशयेत्- both विध्यर्थ प्र. पु. ए. व. of वि+ श्वस्- to confide, trust- (श्वस्-श्वसिति -२ ग. प. प. to breathe) & प्रयोजक of प्र+ काश्- प्रकाशयति- ते to reveal, disclose, bring to light (काश्- काशते, काश्यते- १ , ४ ग. आ. प. to shine, look brilliant), कुपितम्- one who is angry- कुपित- क. भू. धा. वि. of कुप्- कुप्यति ४ ग. प. प. to be angry, excited, मित्रम्- friend- both in न. लिं. प्र. वि. ए. व., सर्वम्- all, entire, whole & गुह्यम्- secret, that to be concealed, hidden- गुह्य (also गूहितव्य-गोढव्य, गूहनीय & गोह्य)- क. वि. धा. सा. वि. of गुह्- गूहति- ते १ ग. उ. प. to conceal, hide, cover- कदाचित्- sometimes

**साधुभ्यस्ते निवर्तन्ते पुत्रा मित्राणि बान्धवाः।**
**ये च तैः सह गन्तारस्तध्दर्मात्सुकृतं कुलम्**॥४.२॥

ते, पुत्राः, मित्राणि, बान्धवाः, साधुभ्यः निवर्तन्ते। ये (पुत्राः, मित्राणि, बान्धवाः) च तैः (साधुभिः) सह गन्तारः, तद् कुलं धर्मात् सुकृतं (भवति)॥

Many children, friends and relatives stay away from well-behaved noble people. However, the family of those, who do go with such (saintly) people, is benefited from their right deed-Dharma.

ते, ये, पुत्राः, बान्धवाः & गन्तारः- all in पु. लिं. प्र. वि. ब. व. of तद्- he, यद्- who, पुत्रः- son, बान्धवः- relative, kinsman & गन्तृ- one who goes with, मित्राणि- in न. लिं. प्र. वि. ब. व. of मित्रम्- a friend, साधुभ्यः- in पु. लिं. पं. वि. ब. व. of साधुः- noble, saintly, well-behaved person, निवर्तन्ते- वर्त. प्र. पु. ब. व. of नि+ वृत्- to turn away from, be averse to, abstain from- (वृत्- वर्तते १ ग. आ. प. to be, to exist, become), तैः- in पु. लिं. तृ. वि. ब. व. of तद्- he, तध्दर्मात्- in पु. लिं. पं. वि. ए. व. of तध्दर्मः- that meritorious deed- तद्- that & धर्मः- meritorious, righteous deed- सः धर्मः- तध्दर्मः- वि. पू. प. कर्मधारय स., कुलम्- race, family & सुकृतम्- well-benefitted, get accomplished, contented- कृत- क. भू. धा. वि. of कृ-करोति कुरुते ८ ग.उ.प. to do- both in न. लिं. प्र. वि. ए. व., सह-with,च- and- both अव्यय

**अपुत्रस्य गृहं शून्यं दिशः शून्यास्त्वबान्धवाः।**
**मूर्खस्य हृदयं शून्यं सर्वशून्या दरिद्रता॥४.१४॥**

अपुत्रस्य गृहं शून्यम् (अस्ति)। अबान्धवाः तु दिशः शून्याः (सन्ति)। मूर्खस्य हृदयं शून्यं (अस्ति)। दरिद्रता सर्वशून्या (भवति)॥

A householder's home is empty without a child. People without their own relatives are indeed without directions. Stupid person's mind is aimless. Poverty is devoid of everything.

*In this verse, Cāṇakya states that poverty is the worst among all the misfortunes.*

अपुत्रस्य & मूर्खस्य - पु. लिं. ष. वि. ए. व. of अपुत्र -childless ( न पुत्रः -नञ्तत्पुरुष स.) & मूर्ख stupid, गृहम्, शून्यम्, हृदयम्- न. लिं. प्र. वि. ए. व. of गृह- house, शून्य- empty, void, devoid of, barren, हृदय- mind, heart, अबान्धवाः & शून्याः - पु. लिं. प्र. वि. ब. व. of अबान्धव- friendless ( न बान्धवः नञ्तत्पुरुष स.), तु-अव्यय-indeed, surely, दिशः- directions-स्त्री. लिं. प्र. वि. ब. व. of दिश्, दरिद्रता-poverty & सर्वशून्या-devoid of everything - both स्त्री. लिं. प्र. वि. ए. व.

**राजपत्नी गुरोः पत्नी मित्रपत्नी तथैव च।**
**पत्नीमाता स्वमाता च पञ्चैता मातरः स्मृताः॥४.२०॥**

राजपत्नी, गुरोः पत्नी, मित्रपत्नी तथा एव च पत्नीमाता स्वमाता च एताः पञ्च मातरः स्मृताः (सन्ति)॥

A King's wife, a teacher's wife, a friend's wife, a wife's mother and one's own mother- these five have been declared as (ultimate) mothers (by the scriptures).

पत्नी- a wife, राजपत्नी- a King's wife- राजन्- a King- राज्ञः पत्नी, मित्रपत्नी- a friend's wife- मित्रम्- a friend- मित्रस्य पत्नी, पत्नीमाता- wife's mother, mother-in-law- माता (मातृ)- mother- पत्न्याः माता & स्वमाता- one's own mother- स्व- one's own, self- स्वस्य माता- all ष. तत्पुरुष स. -all in स्त्री. लिं. प्र. वि. ए. व., गुरोः- in पु. लिं. ष. वि. ए. व. of गुरुः- a teacher, preceptor, पञ्च, एताः, मातरः & स्मृताः- all in स्त्री. लिं. प्र. वि. ब. व. of पञ्चन्- five, एतद्- this, मातृ- mother & स्मृता- said to be, declared, regarded, considered- स्मृत- क. वि. धा. सा. वि. of स्मृ- स्मरति १ ग. प. प. to remember, keep in mind, regard, declare, तथा- and, as well as, similarly, एव- only, just, merely, च-and- all अव्यय

**विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च।**
**व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च॥५.१५॥**

प्रवासेषु (मनुष्यस्य) विद्या मित्रं (भवति)। गृहेषु च भार्या मित्रं (अस्ति)। व्याधितस्य औषधं मित्रं (भवति)। (तथा) मृतस्य मित्रं धर्मः च (भवति)॥

A person's knowledge becomes a friend during travels. His wife is his friend at home. Medicine becomes a friend for the sick. Moreover, for a dead person, his Dharma alone is his trustworthy companion.

*Hindus believe in rebirth. The kind and quality of the rebirth depends on past Karma. Therefore, as the soul alone travels on its journey after the body dies, only his own Dharma and Karma of good deeds remain his true friends.*

प्रवासेषु & गृहेषु- both in स. वि. ब. व. of प्रवासः- पु. लिं- journey, travel & गृहम्- न. लिं- house, home, dwelling, विद्या- knowledge, expertise, learning & भार्या- wife- both in स्त्री. लिं. प्र. वि. ए. व., मित्रम्- a friend, an ally & औषधम्- medicine- both in न. लिं. प्र. वि. ए. व., व्याधितस्य & मृतस्य- both in पु. लिं. ष. वि. ए. व. of व्याधितः- diseased, sick- an adjctv- (व्याधिः- sickness, ailment) & मृतः- a dead person, deceased- मृत- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die, perish, धर्मः- right conduct, Dharma- in पु. लिं. प्र. वि. ए. व., च- and-अव्यय

**जनिता चोपनेता च यश्च विद्यां प्रयच्छति।**
**अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः॥५.२२॥**

जनिता, उपनेता, यः च विद्यां प्रयच्छति, अन्नदाता च, भयत्राता च एते पञ्च पितरः स्मृताः॥

Following five people should always be remembered as your fathers.
One who gives birth to you, (plus) the one who conducts your thread-ceremony, the one who gives you knowledge, the one who provides you with food and the one who protects you from fear,

जनिता, उपनेता, यः, अन्नदाता & भयत्राता - all पु. लिं. प्र. वि. ए. व. of जनितृ -a father, (जनयितृ -a mother), उपनेतृ - conductor of thread-ceremony, अन्नदातृ- provider of food & भयत्रातृ- protector, पितरः, एते, पञ्च & स्मृताः - all पु. लिं. प्र. वि. ब. व. of पितृ-father, (पितरः- forefathers) एतद्- this & पञ्चन्-five & स्मृत-said, laid down, declared-क. भू. धा. वि. of स्मृ-स्मरति १ ग. प. प. to remember, to lay , declare, च-and विद्याम्-स्त्री. लिं. द्वि. वि. ए. व. of विद्या- education, knowledge, प्रयच्छति- प्र.पु. ए. व. of प्र+दा- to give, offer (दा-यच्छति १ ग. प. प. to give, grant)

**सत्यं माता पिता ज्ञानं धर्मो भ्राता दया स्वसा।**
**शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः॥१२.११॥**

(मम) माता सत्यं अस्ति। पिता ज्ञानं, धर्मः भ्राता, दया सखा (स्वसा), शान्तिः पत्नी (तथा) क्षमा (मम) पुत्रः ((सन्ति)। एते षड् मम बान्धवाः (सन्ति)॥

*A Yogi (योगी) replied when enquired about his family.*
Truthfulness is my mother, knowledge is my father, my Dharma is my brother, compassion is my sister, peace is my wife and forbearance is my son. All these six are my family.

सत्यम्- truth, honesty & ज्ञानम्- knowledge- both in न. लिं. प्र. वि. ए. व., understanding, intelligence, माता (मातृ)- mother, दया- compassion, mercy, sympathy, स्वसा- (स्वसृ)- sister, शान्तिः- tranquility, absence of passion, cessation of hostility, पत्नी- wife & क्षमा- forgiveness, tolerance- all in स्त्री. लिं. प्र. वि. ए. व., पिता (पितृ)- father, धर्मः- prescribed codes of conduct- Dharma, भ्राता (भातृ,)- bother, सखा (सखि)- a friend, companion, पुत्रः-son, child- all in पु. लिं. प्र. वि. ए. व., बान्धवाः, एते- these & षड्- all in पु. लिं. प्र. वि. ब. व. of बान्धवः- relative, kinsman, एतद्- this & षष्- six, मम- my- ष.वि. ए. व. of अस्मद्- ।

**यदि रामा यदि च रमा**
**यदि तनयो विनयगुणोपेतः।**
**तनये तनयोत्पत्तिः**
**सुरवरनगरे किमाधिक्यम्**॥१७.१६॥

यदि (मनुष्यस्य पत्नी) रामा (अस्ति), यदि (तस्य गृहे) च रमा (वसति), यदि (तस्य) तनयः विनयगुणोपेतः (भवति), (तथा तस्य) तनये तनयोत्पत्तिः (अपि भवति), (तदा) सुरवरनगरे सुखं किं आधिक्यम् (अस्ति) ?

If one has a beautiful wife, if there is goddess of wealth (in his house), if he has a polite and virtuous son and if that son is blessed with a son, then, is there more happiness in the heavens than this?

रामा- charming, beautiful, young woman, रमा- goddess of wealth, Lakṣmī & तनयोत्पत्तिः- birth of a male descendant- तनयः- पु. लिं.- a son, a male descendant, उत्पत्तिः- production, birth- तनयस्य उत्पत्तिः- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., तनयः,-son & विनयगुणोपेतः- one blessed with very polite disposition- विनय- adjctv- polite conduct decorum, decency, modesty, गुणः- quality, nature, उपेतः- endowed with, विनयः गुणः- विनयगुणः -वि. पू. प. कर्मधारय स. & विनयगुणेन उपेतः- तृ. तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., तनये & सुरवरनगरे - both in पु. लिं. स. वि. ए. व. of , सुखम्- happiness, satisfaction, joy & आधिक्यम्- excess, abundance- both in न. लिं. स. वि. ए. व., यदि- if, in case, च- and, किम्- interrogation: why? is it?, whether,-all अव्यय

# Chapter 3- People Charactristics (जनगुणा:)

According to Gīta (गीता), there are three inborn characteristics - Guṇa (गुण), present in all beings in the world. Those three gunas are called: sattva-सत्व (goodness, calmness, harmony), rajas- रजस (passion, activity, movement), and tamas-तमस (ignorance, inertia, laziness). The "good" people have more sattva guna, the "bad" people have more rajas and tamas and the "foolish" people have preponderance of tamas guṇa.

As a result of many roles that Cāṇakya played in his long life, he must have had great experience in describing who are the good, the bad and the foolish people in this world. Here are the characteristics of these people that he observed 2500 years back, which are true even today.

## *3.1 The Good People (सत्जना:)*

**शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।**
**साधवो न हि सर्वत्र चंदनं न वने वने**॥२.९॥

माणिक्यं शैले शैले न (लभते। मौक्तिकं गजे गजे न (लभते)। साधवः सर्वत्र हि न (सन्ति)। चंदनं वने वने न (अस्ति)॥

A precious stone is not found in every mountain. A pearl is not found in every elephant. Sandalwood is not found in every forest. Thus, noble people are not found everywhere

*It was believed that the celestial elephants in rut would develop a pearl in their forehead. However, it is very rare, just like finding a truly noble person.*

माणिक्यम् - a precious stone, gem, मौक्तिकम्-a pearl. चंदनम्- sandalwood- all in न. लिं. प्र. वि. ए.व., शैले & गजे- both पु. लिं.स.वि.ए. व. of शैल- mountain, गज-an elephant, साधवः- पु. लिं प्र. वि. ब. व. of साधु -noble or good person, sage, हि-अव्यय-, indeed, surely, सर्वत्र- अव्यय- everywhere, वने- न. लिं. स. वि. ए. व. of वनम्-forest

**को अतिभारः समर्थानां किं दूरं व्यवसायिनाम्।**
**को विदेशस्तु विदुषां कः परः प्रियवादिनाम्**॥३.१३॥

समर्थानां कः अतिभारः ? व्यवसायिनां किं दूरं? विदुषां तु कः विदेशः ? प्रियवादिनां कः परः?

What is impossible for a competent person? What (objective) is too far for an industrious person? What is (not known about) a foreign land for a learned person? Who is stranger for a pleasant talker?

समर्थानाम्, व्यवसायिनाम्, विदुषाम् & प्रियवादिनाम्- all in पु. लिं. ष. वि. ब. व. of समर्थः- strong, powerful, competent, व्यवसायिन्- industrious, enterprising, विद्वस्- intelligent, scholar, learned, knowledgeable & प्रियवादिन्- प्रिय- adjctv- pleasant, sweet, desirable, वादिन्- speaker, प्रियः वादिन् - प्रियवादिन्- वि. पु. प. कर्मधारय स., कः (किम्)- who, अतिभारः- too heavy- अति- अव्यय- very much, great, भारः- weight, burden- भारम् अतिक्रम्य- अतिभारः- अव्ययीभाव स., विदेशः- foreign land- देशः- country, place- विभिन्नः देशः- विदेशः- प्रादि कर्मधारय स., परः- stranger, outsider, the other- all in पु. लिं. प्र. वि. ए. व., किम्- what, which & दूरम्- a distant place, far off - both in न. लिं. प्र. वि. ए. व., तु- but,, only- अव्यय

**एतदर्थं कुलीनानां नृपाः कुर्वन्ति सङ्ग्रहम्।**
**आदिमध्यावसानेषु न त्यजन्ति च ते नृपम्**॥३.५॥

ते (कुलीनाः) आदि-मध्य-अवसानेषु च नृपं न त्यजन्ति। एतद् अर्थं, नृपाः कुलीनानां संग्रहं कुर्वन्ति॥

Noble people never abandon a King, either at the start or in the middle or at the end (of any activity or adversity). For this reason, Kings keep company of these noble men (in their courts).

ते- they & नृपाः- both in पु. लिं. प्र. वि. ब. व. of तद्- he & नृपः- a king- नृ- a man, नृणां पाति इति- नृपः- उपपद तत्पुरुष स., नृपम् & सङ्ग्रहम्- both in पु. लिं. द्वि. वि. ए. व. of नृपः & सङ्ग्रहः- collection, accumulation, आदिमध्यावसानेषु- in न. लिं. स. वि. ब. व. of आदिमध्यावसानम्- beginning, middle phase and the end- आदिः- beginning, commencement, मध्यः/ध्यम्- middle phase, intermediate, अवसानम्- end, death, termination, last phase- आदिः च मध्यः/ध्यम् च अवसानम् च- द्वंद स., एतद्- this & अर्थम्- purpose, reason- both in न. लिं. प्र. वि. ए. व., कुलीनानाम्- in पु. लिं. ष. वि. ब. व. of कुलीनः- Noble, high class, one from a good family background, high-born, well-bred, त्यजन्ति & कुर्वन्ति- both वर्त. प्र. पु. ब. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make & त्यज्- त्यजति १ ग. प. प. to leave, abandon, न- no, & च- and- both अव्यय

**प्रलये भिन्नमर्यादा भवन्ति किल सागराः।**
**सागरा भेदमिच्छन्ति प्रलयेऽपि न साधवः** ॥३.६॥

सागराः प्रलये भिन्नमर्यादा: किल भवन्ति। सागराः भेदम् इच्छन्ति, साधवः प्रलये अपि (भेदं) न (इच्छन्ति)॥

At the time of universal destruction, the oceans indeed transgress their boundaries. Oceans want to break out, but the virtuous people will never transgress (their good conduct boundaries) even during the total destruction. सागराः, भिन्नमर्यादाः & साधवः- all in पु. लिं. प्र. वि. ब. व. of सागरः- an ocean, sea, भिन्नमर्यादः- one who transgresses its boundaries, limits- भिन्न- adjctv- broken, deviated from, split- क. भू. धा. वि. of भिद्- भिनत्ति भिंत्ते ७ ग. उ. प. to break, cleave, split, मर्यादा- स्त्री. लिं.- limit, boundary- भिन्ना मर्यादा - वि. पु. प.कर्मधारय स. & साधुः- a noble person, a saintly man- प्रलये- in पु. लिं. स. वि. ए. व. of प्रलयः- universal destruction, total submergence of the earth, भवन्ति & इच्छन्ति- both वर्त. प्र. पु. ब. व. of भू- भवति १ ग. प. प. to be, to exist, to become & इष्- इच्छति ६ ग. प. प. to desire, wish, want, strive for, भेदम् - a break, a split, cleaving, separation, अपि- even, also, न- no,not, किल- indeed, certainly, surely- all अव्यय

**दर्शनध्यानसंस्पर्शैर्मत्सी कूर्मी च पक्षिणी।**
**शिशुं पालयते नित्यं तथा सज्जनसंगतिः** ॥४.३॥

मत्सी, कूर्मी च पक्षिणी (यथा) दर्शन-ध्यान-संस्पर्शै: शिशुं पालयते तथा सज्जनसंगतिः (जनम्) नित्यं (पालयते)॥

As a mother fish, a mother tortoise and a mother bird take care each of (their) young ones by watching it, by contemplating (for its welfare) and by physical touch, a company of good people constantly provides protection (for people around them.)

दर्शनध्यानसंस्पर्शै:- पु/न. लिं. तृ. वि. ब. व. of दर्शनध्यानसंस्पर्शम् - दर्शनम्- looking, seeing- (दृश्- पश्यति १ ग. प. प. to see, look at), ध्यान- thought, contemplation- (ध्यै- ध्यायति १ ग. प. प. to think, call to mind), संस्पर्शम् - bodily touch, contact - (स्पृश्- स्पृशति ६ ग. प. प. to touch)- दर्शनम् च ध्यानम् च संस्पशम् च- दर्शनध्यानसंस्पशम्- द्वंद्व स., मत्सी- a female fish, कूर्मी- a female tortoise, पक्षिणी- a female bird & सज्जनसंगतिः- a company of noble, saintly people- सत्- good, noble, जनः- people, संगतिः- company, contract, meeting- सत् जनः- सज्जनः- प्रादि कर्मधारय स.- सज्जनस्य संगतिः- सज्जनसंगतिः- ष. तत्पुरुष स., शिशुम्- पु. लिं. द्वि. वि. ए. व. of शिशुः- child, young one, पालयते- वर्त. प्र. पु. ए. व. of पाल्- पालयति- ते १० ग. उ. प. to protect, take care, च-and, तथा- like, similar to & नित्यम्- always, daily- all अव्यय

**यथा चतुर्भिः कनकं परीक्ष्यते,**
**निघर्षणच्छेदनतापताडनैः।**
**तथा चतुर्भिः पुरुषः परीक्ष्यते,**
**श्रुतेन शीलेन कुलेन कर्मणा**॥५.२॥ -जगति

यथा कनकं निघर्षण-च्छेदन-ताप-ताडनैः चतुर्भिः परीक्ष्यते, तथा पुरुषः श्रुतेन, शीलेन, कुलेन, कर्मणा (इति) चतुर्भिः परीक्ष्यते॥

The (quality of) gold is evaluated by four tests - scratching (against touchstone), cutting, heating and beating. Similarly, a man is tested four ways - education, character, family (upbringing) and his deeds.

यथा-as, like, namely, तथा-so, thus, likewise-both अव्यय, कनकम् -gold, निघर्षणम् ( scratching), च्छेदनम् (cutting) च तापम् (heat) च ताडनम् (beating, striking) च - निघर्षणच्छेदनतापताडनम् -द्वंद्व स.-निघर्षणच्छेदनतापताडनैः -तृ. वि. ब. व., चतुर्भिः- तृ. वि. ब. व., of चतुर्- न. लिं -four, परीक्ष्यते -कर्मणि वर्त. तृ. पु. ए. व. of परि+ईक्ष् -to examine, scrutinize (ईक्ष -ईक्षते १ ग. आ. प. to see, observe), पुरुषः- man, male, श्रुतेन, शीलेन, कुलेन, कर्मणा- all तृ. पु. ए. व. of श्रुत - education, learning- क. भू. धा. वि. of श्रु- ५ ग. प.प. to hear, listen, शील- character, कुल- family, कर्मन्- न. लिं.-work, deed

**अधमाः धनमिच्छन्ति धनं मानं च मध्यमाः।**
**उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्**॥५.१८॥

अधमाः धनम् इच्छन्ति। मध्यमाः धनं मानं च ( इच्छन्ति)। उत्तमाः मानम् इच्छन्ति। मानः हि महतां धनम् (अस्ति)॥

A lowly person desires money (only). An average person desires money and respect. A great person desires respect (only). Respect alone is the wealth of the great people.

अधमाः, मध्यमाः, उत्तमाः - all प्र वि. ब.व - अधम- the lowest, मध्यम- average, middle, moderate, उत्तम- the best, धनम्- wealth, मानः-respect, honour, इच्छन्ति- वर्त. प्र. पु. ब. व of इष्- इच्छति ६ ग. प. प.-desire, long for., महताम् -पु. लिं. षष्ठी वि. ब. व of महत् - great, mighty, हि- (अव्यय)- indeed, surely, for, as well as, only

**स्वर्गस्थितानामिह जीवलोके,**
**चत्वारि चिह्नानि वसन्ति देहे।**
**दानप्रसङ्गो मधुरा च वाणी,**
**देवार्चनं ब्राह्मणतर्पणं च**॥७.१६॥ -त्रिष्टुभ

स्वर्गस्थितानाम् (मानवानाम्), इह जीवलोके, दानप्रसङ्गः, मधुरा च वाणी देवार्चनं (तथा) ब्राह्मणतर्पणं च (इति) चत्वारि चिह्नानि देहे वसन्ति॥

These four signs are embodied in people, who had been in heaven before but now are in this mortal world-donating at every occasion, talking pleasantly, indulging in worship of God and attending to learned people.

स्वर्गस्थितानाम्- पु. लिं. ष. वि. ब. व. of स्वर्गस्थितः- one who had stayed in heaven- स्वर्गः- heaven, स्थितः- stayed, lived- स्थित- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, stand- स्वर्गे स्थितः.- स्वर्गस्थितः- स. तत्पुरुष स., जीवलोके & देहे- both in पु/न. लिं. स. वि. ए. व. of जीवलोक- living world, mortal world- जीवः- life, existence, living being, लोक- world- जीवानाम् लोकः- जीवलोकः- ष. तत्पुरुष स. & देह- body, चत्वारि & चिह्नानि- न. लिं. प्र. वि. ब. व. of चतुर्- four & चिह्नम्- a symbol, mark, sign वसन्ति- वर्त. प्र. पु. ब. व. of वस्- वसति १ ग. प. प. to dwell, inhabit, live, दानप्रसङ्गः- दानम्- giving, donation, प्रसङ्गः- intentness, occasion, addiction- दानस्य प्रसङ्गः- दानप्रसङ्गः- ष. तत्पुरुष स.- in पु. लिं. प्र. वि. ए. व., मधुरा- (मधुर- adjctv)- sweet melodious & वाणी- speech, words- both in स्त्री. लिं. प्र. वि. ए. व., देवार्चनम्- worshipping of the God- देवः- God, अर्चनम्- worshipping, respect- देवस्य (देवानाम्) अर्चनम्- देवार्चनम् & ब्राह्मणतर्पणम्- ब्राह्मणः- an educated person तर्पणम्- satisfying, pleasing- ब्राह्मणानाम् तर्पणम्- ब्राह्मणतर्पणम्- both ष. तत्पुरुष स & both in न. लिं. प्र. वि. ए. व., च-and, इह- here, both अव्यय

**दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता।**
**अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः॥११.१॥**

दातृत्वं, प्रियवक्तृत्वं, धीरत्वं (तथा) उचितज्ञता (एते) चत्वारः गुणाः अभ्यासेन न लभ्यन्ते। (ते) गुणाः सहजाः (सन्ति)॥

One cannot acquire (even) by constant practice these four qualities - donating nature, talking pleasantly, courage and ability to discriminate (between proper and improper things). These are inborn virtues.

*This may not be completely true. For the human development, both nature and nurture play major roles. The Sanskārs (संस्कार) and education play leading roles in developing those qualities.*

दातृत्वम्- donating nature, intention to help- दातृ (दाता)- donor, giver- त्व- suffix implies quality, प्रियवक्तृत्वम्- habit of talking pleasantly- प्रिय- pleasant, dear, beloved, favourite, वक्तृ- speaker, talker- प्रियवक्तृ-प्रियवक्ता- प्रिय: वक्ता - वि. पु. प. कर्मधारय तत्पुरुष स. & धीरत्वम्- boldness, courage, strength of mind- धीरः- brave, bold, strong- all in न. लिं. प्र. वि. ए. व., उचितज्ञता- ability to

differentiate between proper and improper things- उचित- proper, fit, correct, suitable- क. भू. धा. वि. of- उच्- उच्यति ४ ग. प. प. to be proper, fit, to be accustomed or used to- उचितम् जानाति इति- उचितज्ञः- उपपद तत्पुरुष स -one who can differentiate between proper and improper things- ता- suffix implies quality, चत्वारः, सहजाः & गुणाः- all in पु. लिं. प्र. वि. ब. व. of चतुर्- four, सहज- inborn, natural, innate- सह- अव्यय- with, together with, accompanied by- सह जायते इति - सहजः - उपपद तत्पुरुष स. & गुणः- quality, property,nature,virtue, अभ्यासेन- in पु. लिं. तृ. वि. ए. व. of अभ्यासः- constant practice, exercise, habit, study, लभ्यन्ते- कर्मणि प्रयोग प्र. पु. ब. व. of लभ्- लभते १ ग. आ. प. to get, acquire न- no, not, अव्यय

**दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने**
**प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम्।**
**शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः**॥१२.३॥-शा.वि.

स्वजने दाक्षिण्यं, परिजने दया, दुर्जने सदा शाठ्यं, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने च आर्जवं, शत्रुजने शौर्यं, गुरुजने क्षमा, कान्ताजने धृष्टता, एवं कलासु ये पुरुषाः कुशलाः (सन्ति), तेषु एव च लोकस्थितिः (भवति)॥

The existence of the whole world depends upon those persons who have skills in politeness towards their own people, compassion towards servants, trickery towards wicked people, affection towards noble people, statesmanship towards ruling class, sincerity towards learned people, bravery against enemies, forbearance towards elderly people and tactfulness with women.

स्वजने, परिजने, दुर्जने, साधुजने, नृपजने, विद्वज्जने, शत्रुजने, गुरुजने & कान्ताजने- all in पु. लिं. स. वि. ए. व. of स्वजन- own people, relatives-स्व-own, self- स्वस्य जनः- ष.तत्पुरुष स, परिजन- servants, followers- परि- अव्यय- prefix to noun means, round about, surrounded by, दुर्जन- wicked people- दुष्टः जनः- प्रादि कर्मधारय स., साधुजन- noble people- साधुः जनः-कर्मधारय स., नृपजन- royal people, rulers- नृन् पाति इति- नृपः- उपपद तत्पुरुष & नृपः जनः- कर्मधारय स.), विद्वज्जन- scholar, learned- शत्रुजन- enemy-, गुरुजन- teachers, elders कान्ताजन- women, ladies- कान्त- adjctv- desired, loved- क. भू. धा. वि. of कम्- कामयते-१० ग. आ. प. to love- कान्ता- beloved woman दाक्षिण्यम्- courtesy, politeness, शाठ्यम्- dishonesty, trickery, आर्जवम्- honesty, sincerity, शौर्यम्- bravery, valour, heroism- all in न. लिं. प्र. वि. ए. व., दया- compassion, kindness, प्रीतिः- love, affection, क्षमा- forbearance, forgiveness, धृष्टता- tactfulness, courage- (धृष्ट- क. भू. धा. वि. of धृष्- धृष्णोति ५ ग. प. प. to be courageous, confident) & लोकस्थितिः- existence of the world- लोकः/लोकम्- world, स्थितिः- existence-

लोकस्य स्थितिः- लोकस्थितिः- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., नयः- statesmanship, wisdom- in पु. लिं. प्र. वि. ए. व., पुरुषाः, कुशलाः & ये- all in पु. लिं. प्र. वि. ब. व. of पुरुष-man, person, कुशल- expert, well versed & यद्-who, कलासु- in स्त्री. लिं. स. वि. ब. व. of कला- art, technique, तेषु- पु. लिं. स. वि. ब. व. of तद्-he, सदा- always, daily, च- and, एवम्- thus, in this manner, एव- just, only- all अव्यय

**साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः।**
**तीर्थं फलति कालेन सद्यः साधुसमागमः**॥१२.८॥

साधूनां दर्शनं पुण्यं (अस्ति)।साधवः तीर्थभूता हि (भवन्ति)। तीर्थं कालेन फलति।
साधुसमागमः सद्यः (एव फलति)॥

Meeting holy people personally can earn good Karma. They are like sacred places (which absolve one's sins). (The fruits of visiting) a sacred place may take long time but the meeting the saints gives positive results immediately.

साधूनां - पु. लिं. ष. वि. ब. व. of साधुः - sage, saint, virtuous man, साधवः - प्र. वि. ब. व, दर्शनम्- (धा. सा. नाम of दृश्- पश्यति १ ग. प. प.) -to see, look upon, पुण्यम् - (adjctv) -holy, sacred, तीर्थम्-a holy place, a shrine, sacred river,भूत- क. भू. धा. वि. of भू-भवति- १ ग. प. प. make happen, to be, तीर्थम् संपद्यमाना भूता- तीर्थभूता- scared, holy- च्विसमास, हि-(अव्यय)- indeed,, surely, कालेन- पु. लिं. तृ. वि. ए. व. of कालः - time, a period, फलति- प्र. पु. ए. व. of फल्- १ ग.प.प. to bear fruit, produced fruit, साधुसमागमः - Holy union- साधूनाम् समागमः - ष. तत्पुरुष स., समागमः - meeting,union, सद्यः-प्र. वि. ए.व. of सद्यस्- (अव्यय)- today, same day.

**स्वभावेन हि तुष्यन्ति देवाः सत्पुरुषाः पिता।**
**ज्ञातयः त्वन्नपानाभ्यां वाक्यदानेन पण्डिताः** १३. ३॥

देवाः, सत्पुरुषाः (तथा) पिता स्वभावेन हि तुष्यन्ति। ज्ञातयः तु अन्नपानाभ्यां (तुष्यन्ति)।
पण्डिताः वाक्यदानेन (तुष्यन्ति)॥

Gods, noble people and one's father (parents) are satisfied by their inherent nature. Relatives are satisfied with food and drinks and wise men are happy with good discussion.

देवाः, सत्पुरुषाः, ज्ञातयः & पण्डिताः- all in पु. लिं. प्र. वि. ब. व. of देवः- God, सत्पुरुष- noble, saintly person, ज्ञातिः- kinsman, relative & पण्डितः- a scholar, learned man, पिता- in पु. लिं. प्र. वि. ए. व. of पितृ- father, स्वभावेन- in पु. लिं. तृ. वि. ए. व. of स्वभावः- inherent nature, quality, disposition- स्व- pronominal adjctv- one's own, oneself, भावः- disposition, nature- स्वस्य भावः- ष. तत्पुरुष स., वाक्यदानेन-

in न. लिं. तृ. वि. ए. व. of वाक्यदानम्- good exchange of words, talking- वाक्यम्- a sentence, speech, words, दानम्- giving- वाक्यस्य दानम्- ष. तत्पुरुष स., अन्नपानाभ्याम्- both in न. लिं. तृ. वि. द्वि. व. of अन्नपानम्- food and drink- अन्नम्- food, rice- अन्नम् च पानम् च- both द्वंद्व स., तुष्यन्ति- वर्त. प्र. पु. ब. व. of तुष्- तुष्यति ४ ग. प. प. to be pleased, satisfied, happy, हि- indeed, surely, certainly & तु- but, on the other hand- both अव्यय

**युगान्ते चलते मेरुः कल्पान्ते सप्तसागराः।**
**साधवः प्रतिपन्नार्थान्न चलन्ति कदाचन**॥१३.१९॥

मेरुः युगान्ते चलते। सप्तसागराः कल्पान्ते (चलन्ते)। (तथापि) साधवः प्रतिपन्नार्थात् न कदाचन चलन्ति॥

Mount Meru moves from its position at the end of a Mahā Yuga (महायुग). Seven seas cross their boundaries at the end of the Kalpa (कल्प). However, noble persons will never ever deviate from their undertaken project (accepted task).

*Four yugas make a Mahāyuga, which lasts 4,320,000 years. Kalpa is 1000 Mahā yugas. Mount Meru, in Hindu mythology, a golden mountain that stands in the centre of the universe and is the axis of the world. It is considered the abode of gods. It is a 6660 meters high mountain in the Himalayas.*

मेरुः- पु. लिं. प्र. वि. ए. व. of मेरु- name of a mighty mountain, युगान्ते & कल्पान्ते- पु. लि. स. वि. ए. व. of युगान्त- at the end of age of the world- महायुग- (सत्य, त्रेता, द्वापर & कलि)- age of world, अन्तः- end - युगानाम् अन्तः- ष. तत्पुरुष स & कल्पान्त- at the end of entire universe, कल्प- age of the universe (1000 Mahāyuga), कल्पस्य अन्तः- ष. तत्पुरुष स., चलते-आ. प. वर्त. प्र.. पु. ए. व. of चल्- चलति १ ग. प. प. (rarely आ. प.) to move, walk, सप्तसागराः & साधवः- पु. लिं. प्र. वि. ब. व. of सप्तसागराः seven oceans- सप्त- seven, सागर- ocean- सप्तानां सागराणां समाहारः- सप्तसागराः- द्विगु स. & साधु- noble person, sage, प्रतिपन्नार्थात्- पु/न. लिं. पं. वि. ए. व. of -प्रतिपन्नार्थ- undertaken or promised task- प्रतिपन्न- undertaken, promised- क. भू. धा. वि. of - प्रति+ पद् -(पद्- पद्यते ४ ग. आ. प. to move, go), अर्थ- object, purpose, प्रतिपन्नम् अर्थम्- विशेषण पू. प. कर्मधारय, कदा- अव्यय- when, at what time, कदा+ चन- sometimes, न कदाचन- never चलन्ति- वर्त. तृ. पु. ब. व. of चल्- चलति

**प्रस्तावसदृशं वाक्यं प्रभावसदृशं प्रियम्।**
**आत्मशक्तिसमं कोपं यो जानाति स पण्डितः**॥१४.१५॥

यः प्रस्तावसदृशं, प्रभावसदृशं (तथा) प्रियं वाक्यं जानाति (तथा यः) आत्मशक्तिसमं कोपं (जानाति), सः पण्डितः (अस्ति)॥
He is the wise man who speaks brilliantly on a worthy subject, appropriate for the occasion in a pleasant voice and who manages his anger consistent with his own strength.

यः (यद्)- who, सः (तद्)- he, पण्डितः- a learned or wise man, an expert- all in पु. लिं. प्र. वि. ए. व., प्रस्तावसदृशम्, प्रभावसदृशम्, आत्मशक्तिसमम् & प्रियम्, वाक्यम् & कोपम्- all in पु/न. लिं. द्वि. वि. ए. व. of प्रस्तावसदृशम्- सदृशम् प्रस्तावम् -वि. उ. प. कर्मधारय स.- one which is worthy of mention- प्रस्ताव- mention, introduction, reference, commencement, सदृशः (सदृक्ष)- suitable, fit, worthy, befitting -, सदृशम् प्रभावम्- वि. उ. प. कर्मधारय स. - one which is matching in dignity or brilliance- प्रभाव- impression, brilliance, dignity, spledour, strength आत्मशक्तिसमः- one which is matching one's own strength or capacity- आत्मन्-self, one's own, शक्तिः- स्त्री. लिं.- strength, capacity, valour, सम- adjctv- simillar to, matching, like- आत्मनः शक्तिः- आत्मशक्तिः- ष. तत्पुरुष स. & आत्मशक्तेः समः यः सः- all three बहुव्रीहि स., प्रिय- adjctv- likes, dear, welcome, favourite, वाक्यम्- sentence, speech, talk & कोपः- anger, wrath, जानाति- वर्त. प्र. पु. ए. व. of ज्ञा- जानाति, जानीते- ९ ग. उ. प. to know, understand

**छिन्नोऽपि चन्दनतरुर्न जहाति गन्धं**
**वृद्धोऽपि वारणपतिर्न जहाति लीलाम्।**
**यन्त्रार्पितो मधुरतां न जहाति चेक्षु:**
**दीनोऽपि न त्यजति शीलगुणान् कुलीनः**॥१५.१८॥- शक्करी

चन्दनतरुः छिन्नः अपि गन्धं न जहाति। वृद्धः अपि वारणपतिः न लीलां जहाति। इक्षु: यन्त्रार्पितः च मधुरतां न जहाति। (तथा) कुलीनः दीनः अपि, शीलगुणान् न त्यजति॥

A sandalwood tree even after getting chopped does not leave its fragrance. The chief of elephants, even after growing old does not leave his amorous pastime. Sugarcane after getting crushed in a machine also does not leave its sweetness. Likewise, a person of good family background does not drop his qualities of good behaviour even when poor or distressed.

चन्दनतरुः- sandalwood tree- चन्दन- sandalwood, तरुः- tree- चन्दनस्य तरुः- ष. तत्पुरुष स., छिन्नः- cut, chopped- क. भू. धा. वि. of छिद्- छिनत्ति छिन्ते ७ ग उ. प. to cut, tear, break, वारणपतिः- Lord of elephants- वारणः- an elephant, पतिः- Lord, master- वारणनाम् पतिः- ष. तत्पुरुष स., वृद्धः- old, aged- क. भू. धा. वि. of वृध्- वर्धते १ ग. आ. प. to increase, grow, इक्षु:- sugarcane, यन्त्रार्पितः- crushed in a machine- यन्त्रम्- a machine, an instrument, appliance, अर्पितः- placed, put, offered- क. भू. धा. वि. of प्रयोजक ऋ- अर्पयति -to put, place, offer- (ऋ- ऋच्छति १

ग. प. प. to go, obtain), कुलीनः-well- born, of high descent, of good family, दीनः- poor, afflicted, distressed- all in पु. लिं. प्र. वि. ए. व., गन्धम्- in पु. लि. द्वि. वि. ए. व. of गन्धः- fragrance, smell, perfume, लीलाम् & मधुरताम्- both in स्त्री. लि. द्वि. वि. ए. व. of लीला- play, sport, amorous pastime & मधुरता- sweetness, pleasantness- मधुर- adjctv- sweet, pleasant, शीलगुणान्- in पु. लि. द्वि. वि. ब. व. of शीलगुणः- qualities of good behaviour- शीलम्- good character, conduct, behaviour, virtue, गुणः- quality, virtue- शीलम् च गुणः च- शीलगुणः- द्वंद्व स., त्यजति & जहाति- both वर्त. प्र. पु. ए. व. of त्यज्- १ ग. प. प. & हा- ३ ग. प. प.- to leave, abandon, अपि- also, even, च- and, न- no, not- all अव्यय

**गुणाः सर्वत्र पूज्यन्ते न महत्योऽपि सम्पदः।**
**पूर्णेन्दुः किं तथा वन्द्यो निष्कलङ्को यथा कृशः** ॥१६.७॥

गुणा: सर्वत्र पूज्यन्ते, न महत्यः अपि सम्पद: (पूज्यन्ते)। निष्कलङ्कः कृशः (इन्दुः) यथा वन्द्यः (भवति), तथा किं पूर्णेन्दुः (भवति)?

Good virtues are respected everywhere. Even the great riches are not adored like that! Is a full moon respected in the same way the spotless weak (crescent, quarter) moon is appreciated?

*Here, the author says that a crescent moon without any dark spots is respected more than the full moon. The author believes that a शुक्ल द्वितीया, तृतीया or चतुर्थी moon is more auspicious than पूर्णिमा moon.*

*Many people assume that the best view of moon is when the Moon is at full phase, but that's probably the worst time to look at it! When the Moon is full, it tends to be dazzlingly bright as well as flat and one-dimensional in appearance.*

*In contrast, we get the best views of the lunar landscape right along the sunrise-sunset time, when the Moon is at or just past the first quarter phase, or before the last quarter phase. (space.com)*

गुणाः-in पु. लि. प्र. वि. ब. व. of गुणः- virtue, quality, merit, पूज्यन्ते- कर्मणि प्रयोग वर्त. प्र. पु. ब. व. of पूज्- पूज्यते- getting worshipped, honoured- (पूज्- पूजयति-ते १० ग. उ. प. to worship, honour, adore), महत्यः & सम्पद:- both in स्त्री. लि. प्र. वि. ब. व. of महती (महत्)- adjctv- great, big, mighty & सम्पद्- wealth, riches, affluence, निष्कलङ्कः- adjctv- spotless, unblemished- निस्- अव्यय- prefix implies devoid of, without, कलङ्कः- stigma, , disrepute, a black spot- निर्गतः कलङ्कः यस्मात् सः- बहुव्रीहि स., कृशः- adjctv- lean, feeble, weak, emaciated, वन्द्यः- adjctv- adorable, venerable, laudable, to be respected, honoured- वन्द्य (also वन्दनीय & वन्दितव्य)- क. वि. धा. सा. वि. of वन्द्- वन्दते १ ग. आ. प. प. to salute, greet respectfully, worship, पूर्णेन्दुः- the full moon- पूर्ण- adjctv- full,

complete- क. भू. धा. वि. of पूर्- पूर्यते ४ ग. आ. प. to fill, complete, cover, satisfy- इन्दुः- the Moon- पूर्णः इन्दुः- वि. पू. प. कर्मधारय स.- all in पु. लि. प्र. वि. ए. व., सर्वत्र- everywhere, at all places, यथा- like which, as, तथा- thus, as, किम्- a particle of interrogation: whether, why, अपि- also, न-no, not- all अव्यय

**विवेकिनमनुप्राप्ता गुणा यान्ति मनोज्ञताम्।**
**सुतरां रत्नमाभाति चामीकरनियोजितम्**॥१६.९॥

अनुप्राप्ताः गुणाः विवेकिनं, मनोज्ञतां यान्ति। चामीकरनियोजितं रत्नं सुतराम् आभाति॥

Acquired (noble) qualities come (naturally) to a discriminatory and a thoughtful person. A gem placed in a gold setting appears exceedingly beautiful.

*The good qualities are like the golden setting of a ring that makes a wise person, the gem in the ring, shine even more brilliantly.*

गुणाः & अनुप्राप्ताः- both in पु. लिं. प्र. वि. ब. व. of गुण- virtue, quality & अनुप्राप्त- received, aquired, gotten - क. भू. धा. वि. of अनु+प्र+ आप्- to get, reach- (आप्- आप्नोति ५ ग. प. प. to obtain, attain), विवेकिनम्- पु. लिं. द्वि. वि. ए. व. of विवेकिन्- a person with judgement, discrimination, discretion, मनोज्ञताम्- स्त्री. लिं. द्वि. वि. ए. व. of मनोज्ञता- beauty, grace, being thoughtful (मनस्- mind, perception, ज्ञ- adjctv- familiar with, knowing- मनस् +ज्ञ- मनोज्ञ), यान्ति- वर्त. प्र. पु. ब. व. of या- यति- २ ग. प. प. to go, to get, to come to, चामीकर- न. लिं.- gold, नियोजित- placed, joined with- क. भू. धा. वि. of प्रयोजक of नि+ युज्- नियोजयति-ते- (युज्- यनक्ति-युंक्ते- ७ ग. उ. प. to join, connect, endow with)- चामीकरेण नियोजितम्- चामीकरनियोजितम्- studded in gold- तृ. तत्पुरुष स. & रत्नम्- gem, jewel, precious stone- both in न. लिं. प्र. वि. ए. व., आभाति- वर्त. तृ. पु. ए. व. of आ+ भा- to blaze, appear splendid- (भा- भाति- २ ग. प. प. to shine, appear), सुतराम्- अव्यय- exceedingly, very much, excessively

**गुणैः सर्वज्ञतुल्योऽपि सीदत्येको निराश्रयः।**
**अनर्घ्यमपि माणिक्यं हेमाश्रयमपेक्षते**॥१६.१०॥

एकः गुणैः सर्वज्ञतुल्यः अपि निराश्रयः सीदति। अनर्घ्यं माणिक्यं अपि हेम-आश्रयम् अपेक्षते॥

The most knowledgeable person, endowed with good qualities still perishes if he has no shelter (no friends). Even a priceless Ruby seeks protection of the golden setting.

एकः one, person, गुणैः- तृ. वि. ब. व.of गुणः virtue, quality, सर्वज्ञ - सर्वम् जानाति इति- all knowing- उपपद तत्पुरुष स., तुल्य -adjctv- well matched, same, सर्वज्ञेन तुल्यः तृ. तत्पुरुष स. Like most knowledgeable, अपि- अव्यय- also, even, आश्रयः, आश्रयम् -place of refuge, dwelling, निर् -अव्यय- without, devoid of, निराश्रयः without shelter सीदति- सद् १ ग. प. प. (६ ग. according to some)- to perish, get destroyed, माणिक्यम्- Ruby, अनर्घ्यम् - न अर्घ्यम्- नञ्तत्पुरुष स. priceless, invaluable, हेमन्- न. लिं - gold, आश्रयम् - protection, हेमनः आश्रयम् -हेमाश्रयम्- protection of gold-ष. तत्पुरुष स., अपेक्षते- प्र. पु. ए. व. of अप+ईक्ष् - to require, need (ईक्ष्- ईक्षते १ ग. आ. प. to see, observe)

**संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे।**
**सुभाषितं च सुस्वादु सङ्गतिः सुजने जने**॥१६.१८॥

संसारविषवृक्षस्य सुस्वादु सुभाषितं च सुजने जने सङ्गतिः च द्वे फले हि अमृतोपमे (स्तः)॥

The poisonous tree of mundane worldly life produces two good fruits, which are like the nectar of immortality. The first fruit is a well-spoken verse and the second is the company of good people.

संसारविषवृक्षस्य- in पु. लिं. ष. वि. ए. व. of संसारविषवृक्षः- course of mundane worldly life in the form of a poisonous tree- संसारः- worldly life, family, mundane existence, विषम्- poison, वृक्षः- tree- विषयुक्तः वृक्षः- विषवृक्षः- मध्यम पद लोपी कर्मधारय स. & संसारः विषवृक्षः इव- संसारविषवृक्षः- उ. उ. प. कर्मधारय स., सुस्वादु- very sweet, pleasant- स्वादु- sweetness, pleasantly tasteful- सुन्दरं स्वादु - प्रादि कर्मधारय स. & सुभाषितम्- aphorism, well said verses- भाषित- said, uttered, spoken- क. भू. धा. वि. of भाष्- भाषते १ग. आ. प. to say, utter- सुभगम् भाषितम्- सुभाषितम्- प्रादि कर्मधारय स.- both in न. लिं. प्र. वि. ए. व., सङ्गतिः- contact, association, company- in स्त्री. लिं. प्र. वि. ए. व., जने & सुजने- both in न. लिं. स. वि. ए. व. जनः- people, person & सुजनः- noble, or virtuous people- सुभगः जनः- सुजनः- प्रादि कर्मधारय स., द्वे, फले & अमृतोपमे- all in न. लिं. प्र. वि. द्वि. व. of द्वि- two, फलम्- fruit, outcome, result & अमृतोपमा- like that of ambrosia, nectar of immortality- अमृतम्- nectar of immortality, ambrosia- अमृतस्य उपमा - षष्ठी तत्पुरुष स., हि- indeed, certainly, only & च-and- both अव्यय

**परोपकरणं येषां जागर्ति हृदये सताम्।**
**नश्यन्ति विपदस्तेषां सम्पदः स्युः पदे पदे**॥१७.१५॥

येषां सतां हृदये परोपकरणं जागर्ति, तेषां विपदः नश्यन्ति (तथा तेषां) सम्पदः पदे पदे स्युः॥

The misfortunes of virtuous people in whose heart benevolence of others is awake are destroyed. They are bestowed with prosperity at every step.

येषाम्- whose, सताम् & तेषाम्- their- all in पु. लिं. ष. वि. ए. व. of यद्- who, सत्- noble or virtuous person & तद्- he, हृदये- in न. लिं. स. वि. ए. व. of हृदयम्- mind, heart, परोपकरणम्- benevolence of others- पर- adjctv- other, another, उपकरणम्- doing service or favour, helping- परस्य उपकरणम्- ष. तत्पुरुष स.- in न. लिं. प्र. वि. ए. व., जागर्ति- वर्त. प्र. पु. ए. व. of जागृ- २ ग. प. प. to be awake, attentive, विपदः & सम्पदः- both in स्त्री. लिं. प्र. वि. ब. व. of विपद्- calamity, misfortune, distress & सम्पद्- wealth, riches, prosperity, नश्यन्ति- वर्त. प्र. पु. ब. व. of नश्- नश्यति ४ ग. प. प. to get destroyed, to get ruined, पदे- in न. लिं. स. वि. ए. व. of पदम्- step, पदे पदे- at every step, constantly, repeatedly, स्युः- विध्यर्थ प्र. पु. ब. व. of अस्- अस्ति २ ग. प. प. to be, to happen, to exist

## *3.2 The Bad People (दुर्जनाः)*

**दुराचारी च दुर्दृष्टिः दुरावासी च दुर्जनः।**
**यन्मैत्री क्रियते पुम्भिर्नरः शीघ्रं विनश्यति**॥२.१९॥

दुराचारी दुर्दृष्टिः च, दुरावासी दुर्जनः च पुम्भिः यत् (नरः) मैत्री क्रियते, (सः) नरः शीघ्रं विनश्यति॥

The man who develops a friendship with persons of bad conduct, of evil looks, who stays in a filthy place and who is wicked is soon ruined.

दुराचारी- one with a bad conduct- दुर्- अव्यय- prefix implies : bad, wicked- आचारः- conduct, behaviour- दुरितः आचारः यस्य सः- दुराचारिन्, दुरादृष्टिः- one with evil look- eye, evil look- दुरिता दृष्टिः यस्य सः- दुर्दृष्टिः, दुरावासी- one who stays in filthy environment- आवासः- habitation, a place of stay- दुरितः आवासः यस्य सः- दुरावासिन्- all three- प्रादि बहुव्रीहि स., दुर्जनः- one who is wicked by nature- जनः- person, दुष्टः जनः- प्रादि कर्मधारय स. & नरः- a man, person- all in पु. लिं. प्र. वि. ए. व., यन्मैत्री- which friendship- in स्त्री. लिं. प्र. वि. ए. व., मैत्री- friendship, companionship- स्त्री. लिं.- यत् मैत्री- यन्मैत्री, यत् - अव्यय-that पुम्भिः- in पु. लिं. तृ. वि. ब. व. of पुंस्- a man, person, क्रियते- कर्मणि प्रयोग प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, विनश्यति- वर्त. प्र. पु. ए. व. of वि+ नश्- to get ruined, destroyed- (नश्- नश्यति ४ ग. प. प. to be lost, destroyed)- च- and & शीघ्रम्- quickly, soon, in no time- both अव्यय

**दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः।**
**सर्पो दंशति काले तु दुर्जनस्तु पदे पदे**॥३.४॥

दुर्जनस्य च सर्पस्य (मध्ये) सर्पः वरम् (अस्ति), न दुर्जनः। सर्पः तु काले दंशति, दुर्जनः तु पदे पदे (दंशति)॥
Between a wicked man and a (poisonous) snake, a snake is better, not the wicked person. A snake may bite only at one time (when provoked) but the wicked person (bites) constantly (with his bad tongue).

सर्पः- a snake, serpent & दुर्जनः- wicked man, cruel person- जनः- people, person- दुष्टः जनः- प्रादि कर्मधारय स.- both पु. लिं. प्र. वि. ए. व., सर्पस्य & दुर्जनस्य- both पु. लिं. ष. वि. ए. व., दंशति- वर्त. प्र. पु. ए. व. of दंश्- १ ग. प. प. to bite, sting, काले & पदे both in पु/न. लिं. स. वि. ए. व. of कालः- time, period, occasion & पदम्- step, foot- पदे पदे- at every step, constantly, वरम्- preferred, better, superior, च-and, तु- but, on the other hand, न- no, not- all अव्यय

**अन्यथा वेदपाण्डित्यं शास्त्रमाचारमन्यथा।**
**अन्यथा कुवचः शान्तं लोकाः क्लिश्यन्ति चान्यथा**॥५.१०॥

(ये निन्दकाः) वेदपाण्डित्यम् अन्यथा, शास्त्रं आचारम् अन्यथा, शान्तं कुवचः अन्यथा च (भाषन्ते), (ते) लोकाः अन्यथा क्लिश्यन्ति॥

Those who criticize the scholars in the scriptures, who criticize the sacred texts and traditional way of life and those who disturb a peaceful man with harsh words, torment themselves unnecessarily.

*This is like a person throwing mud at somebody without any reason! He himself gets muddy with that effort.*

वेदपाण्डित्यम्- profound knowledge of Vedas- वेदः- Veda- sacred knowledge, scripture, पाण्डित्यम्- scholarship, profound knowledge- वेदेषु पाण्डित्यम्- स. तत्पुरुष स. & शास्त्रम्- religious or sacred treatise, scripture- both in न. लिं. द्वि. वि. ए. व., कुवचः- in न. लिं. पं. वि. ए. व. of कुवचस्- hurting words- कु- अव्यय- a prefix implies: bad, wicked, harsh, वचस्- speech, words- कुत्सितम् वचः- कुवचः- प्रादि कर्मधारय स., शान्तम् & आचारम्- both in पु. लिं. द्वि. वि. ए. व. of शान्तः- one who has subdued his passions, an ascetic, one who has achieved tranquility- शान्त- क. भू. धा. वि. of शम्- शाम्यति ४ ग. प. प. to be calm, tranquil & आचारः- conduct, traditional behaviour, custom, लोकाः- in न. लिं. प्र. वि. ब. व. of लोकः- people, person, क्लिश्यन्ति- वर्त. प्र. पु. ब. व. of क्लिश्- क्लिश्यति ४ ग. प. प. to be tormented, afflicted, suffer- (normally क्लिश्- क्लिश्यते ४ ग. आ. प.), च- and, अन्यथा- falsely, wrongly, erroneously, otherwise- both अव्यय

**वरं न राज्यं न कुराजराज्यं,**
**वरं न मित्रं न कुमित्रमित्रम्।**

**वरं न शिष्यो न कुशिष्यशिष्यो,**
**वरं न दारा न कुदारदाराः**॥६.१३॥ - त्रिष्टुभ

न राज्यं वरं, न कुराज राज्यं (वरं भवति)। न मित्रं वरं, न कुमित्र मित्रं (वरम् भवति)। न शिष्यः वरं, न कुशिष्यशिष्यः (वरं भवति)। न दाराः वरं, न कुदारदाराः (वरं भवन्ति)॥

It is better not to have a kingdom than having a bad King. It is better to be without a friend than having a bad one. It is better to be without a disciple, than having a bad one. It is better to be without a wife than having a bad one.

राज्यम्- न. लिं.- kingdom, country, state, nation, कुराजराज्यम्- country ruled by a bad king- राजन्- पु. लिं.- king- कुत्सितः राजा- कुराजा- प्रादि कर्मधारय स. & कुराज्ञः राज्यम्- कुराजराज्यम्- ष. तत्पुरुष स., मित्रम्- न. लिं.- friend, कुत्सितम् मित्रम्- कुमित्रम्- प्रादि कर्मधारय स. & कुमित्रम् इव मित्रम्- कुमित्रमित्रम्- उपमानपूर्वपद कर्मधारय स.- all in न. लिं. प्र. वि. ए. व., शिष्यः- disciple, student, कुत्सितः शिष्यः- कुशिष्यः- प्रादि कर्मधारय स. & कुशिष्यः इव शिष्यः- कुशिष्यशिष्यः- उपमानपूर्वपद कर्मधारय स. both in पु. लिं. प्र. वि. ए. व., दाराः- a wife, स्त्री. लिं. प्र. वि. ब. व., कुत्सिताः दाराः- कुदाराः - प्रादि कर्मधारय स. & कुदाराः इव दाराः- कुदारदाराः- उपमानपूर्वपद कर्मधारय स. both in स्त्री. लिं. प्र. वि. ब. व., न- no, not, वरम्- better than, preferable to, worthwhile than- both अव्यय- (but it is generally used absolutely- वरम्- being used with the clause containing the thing preferred, and न with the thing to which the first is preferred- both being put in the nominative case)

**शकटं पञ्चहस्तेन दशहस्तेन वाजिनम्।**
**हस्तिनं शतहस्तेन देशत्यागेन दुर्जनम्**॥७.७॥

शकटं पञ्चहस्तेन, वाजिनं दशहस्तेन, हस्तिनं शतहस्तेन (तथा) दुर्जनं देशत्यागेन (त्यजेत्)॥

One should stay away five arm lengths from a moving cart, ten arm lengths from a horse and a hundred arm lengths from an elephant. However, in case of wicked people, it is better to leave their place altogether!

शकटम्, वाजिनम्, हस्तिनम् & दुर्जनम् -all in पु. लिं. द्वि. वि. ए. व. of शकटः- cart, carriage, waggon, वाजिन्- a horse, हस्तिन्- an elephant & दुर्जनः- a wicked person- दुर्- अव्यय- implies bad, wicked, cruel, जनः- people, person- दुष्टः जनः- दुर्जनः- प्रादि कर्मधारय स., पञ्चहस्तेन, दशहस्तेन, शतहस्तेन & देशत्यागेन- all in पु. लिं. तृ. वि. ए. व. of पञ्चहस्तः- by a distance of five hands, दशहस्तः- by a distance of ten hands & शतहस्तः- a distance of hundred hands- हस्तः- the hand, the forearm, a measure of length (24- अंगुल) पञ्चन्- five, दशन्- ten & शतम्- one hundred- पञ्च हस्तः, दश हस्तः & शत हस्तः- all वि. पू. प. कर्मधारय स. &

देशत्यागः- leaving or deserting the country- देशः- country, region, place, त्यागः- leaving, deserting, abandoning- देशस्य त्यागः- देशत्यागः- ष. तत्पुरुष स.

**हस्ती अंकुशमात्रेण वाजी हस्तेन ताड्यते।**
**शृङ्गी लगुडहस्तेन खड्गहस्तेन दुर्जनः**॥७.८॥

हस्ती अंकुशमात्रेण ताड्यते। वाजी हस्तेन (ताड्यते)। शृङ्गी लगुडहस्तेन (ताड्यते)। दुर्जनः खड्गहस्तेन (ताड्यते)॥

An elephant is punished merely by a goad. A horse is beaten by a hand (whip). A horned animal (like bull or a buffalo) is punished by a stick in one's hand. A wicked person is punished by a sword in one's hand.

*This verse says that you can control animals with small punishment. However, a wicked person must be severely dealt with.*

हस्ती (हस्तिन्)-an elephant, वाजी (वाजिन्)- horse, शृङ्गी (शृङ्गिन्)- an animal with horns & दुर्जनः- bad or wicked person- दुष्टः जनः- प्रादि कर्मधारय स.- all in- पु. लिं. प्र. वि. ए..व., अंकुशमात्रेण- by mere goad, हस्तेन- by hand, लगुडहस्तेन- with stick in the hand & खड्गहस्तेन- with sword in the hand- all in पु. लिं. तृ. वि. ए..व. of - अंकुशमात्र- mere goad- अंकुश- पु. लिं.-a goad, hook, मात्र- adjctv- mere, just- अंकुशः मात्रः- अंकुशमात्र - कर्मधारय स., हस्त- hand, लगुडहस्त- stick in hand- लगुड- stick- लगुडयुक्तः हस्तः- लगुडहस्तः & खड्गहस्त- sword in hand- खड्ग- sword- खड्गयुक्तः हस्तः-खड्गहस्तः- both मध्यमपदलोपी स., ताड्यते- gets beaten- कर्मणि प्रयोग वर्त. तृ. पु. ए. व. of तड्- ताडयति-ते- १० ग. उ. प.- to beat, punish

**तुष्यन्ति भोजने विप्रा मयूरा घनगर्जिते।**
**साधवः परसम्पत्तौ खलाः परविपत्तिषु**॥७ ९॥

विप्राः भोजने तुष्यन्ति। मयूराः घनगर्जिते (तुष्यन्ति)। साधवः परसम्पत्तौ (तुष्यन्ति)। खलाः परविपत्तिषु (तुष्यन्ति)॥

The priests are pleased with a good feast. Peacocks are happy with thunders from clouds. Noble people are happy when others prosper with wealth, while wicked people rejoice at the suffering of others.

विप्राः, मयूराः, साधवः & खलाः- all in पु. लिं. प्र. वि. ब. व. of विप्र- a Brahmin, priest, मयूर- a peacock, साधु- a noble or saintly person & खल- wicked person, भोजने, घनगर्जिते & परसम्पत्तौ- स. वि. ए. व. of भोजन- न. लिं- lunch, feast, घनगर्जित- न. लिं- sound of clouds, thunder- घन- cloud, गर्जित- thunder of cloud, roar, sound- क. भू. धा. वि. of गर्ज्- गर्जति १ ग. प. प. to roar, घनैः गर्जित- तृ. तत्पुरुष स. & परसम्पत्ति- स्त्री. लिं- other's prosperity, getting wealthy, - पर-

other, सम्पत्ति- wealth, prosperity- परस्य सम्पत्तिः -परसम्पत्ति- ष. तत्पुरुष स., तुष्यन्ति- वर्त. प्र. पु. ब. व. of तुष्य्- तुष्यति ४ ४ प. प. to be pleased, satisfied, happy, परविपत्तिषु- स्त्री. लिं. स. वि. ब. व. of परविपत्ति- suffering of others- विपत्ति- calamity, misfortune, agony- परस्य विपत्तिः- परविपत्तिः -ष. तत्पुरुष स.

**अत्यन्तकोपः कटुका च वाणी**
**दरिद्रता च स्वजनेषु वैरम्**
**नीचप्रसंगः कुलहीनसेवा**
**चिह्नानि देहे नरकस्थितानाम्**॥७.१७॥ -त्रिष्टुभ

अत्यन्तकोपः, कटुका वाणी च दरिद्रता च स्वजनेषु वैरं, नीचप्रसंगः, कुलहीनसेवा, (एतानि) चिह्नानि नरकस्थितानां देहे (वसन्ति)॥

These are characteristics of people who previously stayed in hell (before returning to this world)- extreme anger, unpleasant speech, poverty, enmity with one's own people, association with mean people and service to a family of low background.

अत्यन्तकोपः- extreme anger- अत्यन्त- adjctv- extreme, excessive endless, perpetual, कोपः- anger- अत्यन्तः कोपः- अत्यन्तकोपः- वि. पू. प. कर्मधारय स. & नीचप्रसंगः- association with mean people- नीच- mean, worthless, प्रसंगः- association, नीचेषु प्रसंगः- स. तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., कटुका- (कटुक- adjctv)- sharp, pungent, unpleasant, वाणी- speech, talk, कुलहीनसेवा- serving people with low family back ground- कुलम्- family, race, हीन- mean, low- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, give up, सेवा- service, attendance- हीनम् कुलम् यस्य सः- कुलहीनः- बहुव्रीहि स. & कुलहीनस्य सेवा- कुलहीनसेवा- ष. तत्पुरुष स., दरिद्रता- poverty- (दरिद्र- adjctv - poor, needy)- ता- suffix implies: quality, nature- all in स्त्री. लिं. प्र. वि. ए. व., स्वजनेषु- in पु. लिं. स. वि. ब. व. of स्वजनः- one's own people, relatives- स्व- one's own, self, जनः- people- स्वस्य जनः- स्वजनः- ष. तत्पुरुष स., वैरम्- enmity, hostility- in न. लिं. प्र. वि. ए. व., चिह्नानि- in न. लिं. प्र. वि. ब. व. of चिह्नम्- sign, symbol, mark, देहे- in पु/न. लिं. स. वि. ए. व. of देह- body, नरकस्थितानाम्- in पु. लिं. ष. वि. ब. व. of नरकस्थितः- one who has stayed in hell- नरकः- hell, स्थितः- stayed, lived- स्थित- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, stand- नरके स्थितः- नरकस्थितः- स. तत्पुरुष स., च- and- अव्यय

**चाण्डालानां सहस्रैश्च सूरिभिस्तत्त्वदर्शिभिः।**
**एको हि यवनः प्रोक्तो न नीचो यवनात्परः**॥८.५॥

तत्त्वदर्शिभिः सूरिभिः चाण्डालानां सहस्रैः एकः हि यवनः (समानः) प्रोक्तः (अस्ति)। यवनात् परः नीचः न (कश्चित् भवति)॥

All the wise men and philosophers have proclaimed that a single foreigner is equivalent to thousands of wicked outcasts. There is nobody worse than a foreigner or a barbarian.

*Foreigners invaded India continuously throughout her history for its riches. They used barbarian techniques against the natives and women. Cāṇakya (375 -283 BC) knew about the Alexander invasion of Takshashiā around 326 BC. Cāṇakya was from Takshshilā. The original meaning of यवनः is Greek; later it described any foreigner.*

चाण्डालानाम्- in पु. लिं. ष. वि. ब. व. of चाण्डालः- a person engaged in cruel/ wicked deeds, an outcast, सहस्रैः- in न. लिं. तृ. वि. ब. व. of सहस्रम्- a thousand, सूरिभिः & तत्त्वदर्शिभिः- in पु. लिं. तृ. वि. ब. व. of सूरिः- learned, wise man, a sage, & तत्त्वदर्शिन्- तत्त्वम्- true principle, exact nature, fact, दर्शिन्- one who is perceiving, knowing- तत्त्वस्य दर्शी यः सः- बहुव्रीहि स., एकः,- one, single, alone, यवनः- a barbarian, foreigner, प्रोक्तः- said, proclaimed, declared- प्रोक्त- क. भू. धा. वि. of प्र+ वच्- to declare- (वच्- वक्ति २ ग. प. प. to say, talk), नीचः- mean, worst, परः- the other- all in in पु. लिं. प्र. वि. ए. व., यवनात्- in पु. लिं. पं. वि. ए. व. of यवनः, च- and, न- no,हि- indeed - all अव्यय

**परस्परस्य मर्माणि ये भाषन्ते नराधमाः।**
**ते एव विलयं यान्ति वल्मीकोदरसर्पवत्॥** ९.२॥

ये नराधमाः परस्परस्य मर्माणि भाषन्ते, ते वल्मीकोदर-सर्पवत् विलयम् एव यान्ति॥

The meanest people, who speak about each other's shortcomings, meet their destruction like a snake that enters an ant-hill.

ये, ते & नराधमाः पु. लिं. प्र. वि. ब. व. of यद्- who, तद्- he & नराधमः- meanest or lowest among men- नरः- man, human, अधमः-adjctv- lowest, meanest- नराधमः - अधमः नरः -वि. उ. प. कर्मधारय स., परस्परस्य- पु. लिं. ष. वि. ए. व. of परस्परः- mutual, each other, one another, मर्माणि- न. लिं. द्वि. वि. ब. व. of मर्मन्- any weak or vulnerable point, a secret, a defect, भाषन्ते & यान्ति- वर्त. प्र. पु. ब. व. of भाष्- भाषते १ ग. आ. प. to say, utter, speak & या- याति २ ग. प. प. to go, undergo, वल्मीकोदरसर्पवत्- like a snake inside an ant-hill- वल्मीकः/ वल्मीकम्- an ant-hill, a hillock thrown up by white ants, उदरम्- belly, interior, inside of anything, cavity, सर्पः- surpent, snake, वल्मीकस्य उदरम्- वल्मीकोदरम्- ष. तत्पुरुष स.& वल्मीकोदरगतः सर्पः- वल्मीकोदरसर्पः- म. प. लोपी स., -वत्- अव्यय- suffix implies: like, similar to, विलयम्- पु. लिं. द्वि. वि. ए. व. of विलयः- destruction, extinction, एव- just, only, merely- अव्यय

**लुब्धानां याचकः शत्रुर्मूर्खाणां बोधको रिपुः।**
**जारस्त्रीणां पतिः शत्रुश्चौराणां चन्द्रमा रिपुः**॥१०.६॥

लुब्धानां याचकः शत्रुः (अस्ति)। मूर्खाणां बोधकः रिपुः (अस्ति)। जारस्त्रीणां पतिः शत्रुः (अस्ति)। चौराणांचन्द्रमा रिपुः (अस्ति)॥

A beggar is an enemy for greedy people. An advisor is an adversary for stupid people. Husband is an enemy for an adulteress woman. The Moon is an adversary for thieves.

लुब्धानाम्, मूर्खाणाम् & चौराणाम्- all in पु. लिं. ष. वि. ब. व. of लुब्धः- greedy, covetous- लुब्ध- क. भू. धा. वि. of लुभ्- लुभ्यति ४ ग. प. प. to cover, desire, long, मूर्खः- a stupid, fool & चौरः (चोरः)- a thief, robber, जारस्त्रीणाम्- in स्त्री. लिं. ष. वि. ब. व. of जारस्त्री- an adulteress woman- जारः- a paramour, जारा- an adulteress, स्त्री- woman, wife- जारा स्त्री- वि. पू. प. कर्मधारय स., याचकः- seeker, beggar, शत्रुः =रिपुः- enemy, adversary, बोधकः- advisor, instructor, पतिः- husband, चन्द्रमा(चन्द्रमस्)- all in पु. प्र. वि. ए. व.

**न दुर्जनः सज्जनतामुपैति**
**बहुप्रकारैरपि सेव्यमानः।**
**भूयोऽपि सिक्तः पयसा घृतेन**
**न निम्बवृक्षो मधुरत्वमेति**॥११.६॥ त्रिष्टुभ -

दुर्जनः बहुप्रकारैः सेव्यमानः अपि सज्जनतां न उपैति। निम्बवृक्षः पयसा घृतेन भूयः सिक्तः अपि मधुरत्वम् न एति॥

A wicked person, even after trying multiple methods, does not acquire noble qualities. A Neem tree, even constantly sprinkled by milk and ghee does not acquire sweetness.

दुर्जन- wicked person- दुष्टः जनः- प्रादि कर्मधारय स., सेव्यमानः- one who is being pursued, attended upon, honoured- प्रयोजक वर्त. का. वा. धा. सा. वि. of सेव्- सेव्यते- (सेव्-सेवते १ ग. आ. प. to serve pursue), निम्बवृक्षः- Neem tree- निम्ब- Neem, वृक्षः- tree- निम्बस्य वृक्षः- ष. तत्पुरुष स. & सिक्तः watered, sprinkled- क. भू. धा. वि. of सिच्- सिंचति-ते ६ ग. उ. प. to water, sprinkle- all in पु. लि. प्र. वि. ए. व., भूयः (भूयस्)- अव्यय- repeatedly, frequently, often, बहुप्रकारैः- तृ. वि. ब. व. of बहुप्रकार- many ways, various manner- बहु- adjctv- many, multi, various, प्रकार- manner, way, fashion- बहवः प्रकाराः- कर्मधारय स., अपि- अव्यय- also, even, सज्जनताम्- स्त्री. लिं. द्वि. वि. ए. व. of सज्जनता- good behaviour, noble qualities- सत्- good, noble, जन-person- सत् जनः- सज्जनः- कर्मधारय स.- ता suffix implies quality, न-no, not, उपैति & एति- gets, acquires- वर्त. प्र. पु. ए. व. of उप+ इ- to acquire, reach & इ- to go - २ ग. प. प., पयसा & घृतेन- न. लिं. तृ. वि.

ए. व. of पयस् - milk & घृतम्- ghee, clarified butter, मधुरत्वम्- न. लिं. द्वि. वि. ए. व. of मधुरत्व- pleasing taste, sweetness- मधुर- adjctv- sweet, pleasing, pleasant- त्व- suffix implies: quality, nature

**अन्तर्गतमलो दुष्टस्तीर्थस्नानशतैरपि।**
**न शुध्यति यथा भाण्डं सुराया दाहितं च यत्**॥११.७॥

यथा सुरायाः भाण्डं दाहितं च यत् (सत्) अपि न शुध्यति, (तथा) अन्तर्गतमलः दुष्टः तीर्थस्नानशतैः (अपि न शुध्यति)॥

A pot of wine does not get clean even after it is burnt in a fire. Similarly, an inherently dirty minded and a wicked person cannot be purified even after a hundred holy baths.

*At the surface, this verse finds fault with the wine because it smells bad if one tries to heat the pot to clean it. However, it is not the fault of the wine because one uses a wrong method to clean it! A wine pot can be easily cleaned with soap, water and a gentle rub! Similarly, if one wants to turn a wicked person into a good one, it makes no sense to give him hundred holy baths. He needs to be educated or treated for his mental deficiencies by other means. One must use the correct solution to a given problem.*

सुरायाः- in स्त्री. लिं. ष. वि. ए. व. of सुरा- spirituous liquor, wine, भाण्डम्- a vessel, pot, utensil, दाहितम्- having burnt- दाहित- प्रयोजक क. भू. धा. वि. of दह्- दाहयति- ते caused to get burnt- (दह्- दहति १ ग. प. प. to burn, scorch, यत्- which, सत्- being, having- कर्तरि वर्त. का. वा. धा. सा वि. of अस्- अस्ति २ ग. प. प. to be, to exist- all in न. लिं. प्र. वि. ए. व., शुध्यति- वर्त. प्र. पु. ए. व. of शुध्- ४. ग. प. प. to be pure, purified, अन्तर्गतमलः- अन्तर्- अव्यय- inside, internally, in the mind, within- used adverbially with गम्- गच्छति १ ग. प. प. to go- गत- क. भू. धा. वि. of गम्- gone, situated, seated in- अन्तर्गतम्- deeply situated in mind, मलम्- filth, impurity, feces- अन्तर्गतम् मलम् यस्य सः- अन्तर्गतमलः- बहुव्रीहि स. & दुष्टः- a wicked, depraved, corrupted, person- दुष्ट- क. भू. धा. वि. of दुष्- दुष्यति ४ ग. प. प. to be bad, defiled, wicked- both in पु. लिं. प्र. वि. ए. व., तीर्थस्नानशतैः- in न. लिं. तृ. वि. ब. व. of तीर्थस्नानशतम्- holy (purification)- baths at hundred places- तीर्थ- a holy place place of pilgrimage, स्नानम्- न. लिं.- bath, शतम्- hundred, तीर्थे स्नानम्- तीर्थस्नानम्- स. तत्पुरुष स. & तीर्थस्नानानि शतम्- शतानि तीर्थस्नानानि - वि. उ. प. कर्मधारय स., यथा- in which way, manner, like which, अपि- also, न- no, not, च- and- all अव्यय

**हस्तौ दानविवर्जितौ श्रुतिपुटौ सारस्वतद्रोहिणौ**
**नेत्रे साधुविलोकनेन रहिते पादौ न तीर्थं गतौ।**
**अन्यायार्जितवित्तपूर्णमुदरं गर्वेण तुङ्गं शिरो**
**रे रे जम्बुक मुञ्च मुञ्च सहसा नीचं सुनिन्द्यं वपुः**॥१२.४॥ -शा. वि.

रे रे जम्बुक, (तव) हस्तौ दानविवर्जितौ (सन्ति)। श्रुति- पुटौ सारस्वत- द्रोहिणौ (सन्ति)। नेत्रे साधु-विलोकनेन रहिते (स्तः)। पादौ तीर्थं न गतौ (स्तः)। उदरम् अन्यायार्जित- वित्त-पूर्णं, शिरः गर्वेण तुङ्गम् (अस्ति)। (त्वम् एतादृशं) नीचं सुनिन्द्यं वपुः सहसा मुञ्च, मुञ्च॥

Oh, oh, you mean person! Your hands are bereft of any charity. Your ears hate the men of knowledge. Your eyes have turned blind towards anything virtuous. Your feet have not visited any holy places .Your stomach (home) is full with wealth that is acquired by unjust means. Your head is high with arrogance. Please get rid of this, get rid of this very mean body as soon as possible!

जम्बुक- in पु. लिं. सं वि. ए. व. of जम्बुकः- a jackal, a mean person, हस्तौ, दानविवर्जितौ, श्रुतिपुटौ, सारस्वतद्रोहिणौ, पादौ & गतौ- all in पु. लिं. प्र. वि. द्वि. व. of हस्तः- hand, दानविवर्जितः- one deprived of any acts of charity- दानम्- giving, charity, विवर्जित- devoid of, deprived of, without- क. भू. धा. वि. of वि+ वृज्- to shun, deprive of (वृज्- वर्जति १ ग. प. प. to shun)- दानेन विवर्जितः- तृ. तत्पुरुष स., श्रुतिपुटः- fold of an ear- श्रुतिः- स्त्री. लिं- ear, hearing, पुटः- fold, cavity, space- श्रुतेः पुटः- ष. तत्पुरुष स., सारस्वतद्रोहिन्- one who hates people connected with learning, knowledge- सारस्वत- adjctv- relating to goddess Saraswati- literature, knowledge द्रोहिन्- hater, assailer- सारस्वतान् द्रुह्यति इति- सारस्वतद्रोहिन्- उपपद तत्पुरुष स., पादः- foot & गतः- gone, visited- क. भू. धा. वि. of, नेत्रे & रहिते- both in न. लिं. प्र. वि. द्वि. व. of नेत्रम्- an eye, eye sight, रहितम्- devoid of, deprived of- रहित- क. भू. धा. वि. of रह्- रहति १ ग. प. प. to leave, abandon, उदरम्- stomach, belly, अन्यायार्जितवित्तपूर्णम्- अन्याय- adjctv- unjust, improper अर्जित- earned- क. भू. धा. वि. of अर्ज्- अर्जति १ ग. प. प. to procure, gain, वित्तम्- wealth- वित्त- क. भू. धा. वि. of विद्- विन्दति -ते ६ ग. उ. प. to gain, acquire, पूर्णम्- full, filled- पूर्ण- क. भू. धा. वि. of पूर्- पूर्यते ४ ग. आ. प. to fill, शिरः (शिरस्)- head & तुङ्गम्- adjctv- lofty, high, elevated- all in न. लिं. प्र. वि. ए. व., नीचम्- mean low, सुनिन्द्यम्- very disgraceful- सु- अव्यय- prefix denotes very, highly- निन्द्य- disgraceful, forbidden, vile- निन्द्य (also निन्दितव्य & निन्दनीय)- क. वि. धा. सा. वि. of निन्द्- निन्दति-१ ग. प. प. to blame, censure- सुतराम् निन्द्य- सुनिन्द्यम्-प्रादि कर्मधारय स., वपुः (वपुस्)- body, तीर्थम्- holy place, pilgrimage centre- all in न. लिं. द्वि. वि. ए. व., साधुविलोकनेन & गर्वेण- both in तृ. वि. ए. व. of साधुविलोकनम्- seeing virtuous or righteous things/person- साधु- adjctv- noble, saintly, virtuous, विलोकनम्- seeing, sighting, looking at- साधोः विलोकनम्- ष. तत्पुरुष स., मुञ्च- आज्ञार्थ म. पु. ए. व. of मुञ्च्- मुञ्चति- ते ६ ग. उ. प. to set free, release, let go, रे- a vocative particle- Oh, न- no, not & सहसा- at once, immediately, inconsiderately- all अव्यय, अन्यायार्जितवित्तपूर्णमुदरम्- अन्यायेन अर्जितम्- अन्यायार्जितम्- तृ. तत्पुरुष स., अन्यायार्जितम् वित्तम्- अन्यायार्जितवित्तम्- वि. पू. प. कर्मधारय स., अन्यायार्जितवित्तेन पूर्णम्- तृ. तत्पुरुष स. & अन्यायार्जितवित्तपूर्णम् उदरम्- वि. पू. प. कर्मधारय स.

**सत्सङ्गाद्भवति हि साधुता खलानां**
**साधूनां नहि खलसंगतः खलत्वम्।**
**आमोदं कुसुमभवं मृदेव धत्ते**
**मृद्गन्धं नहि कुसुमानि धारयन्ति॥** १२.७॥ -अतिजगति

सत्सङ्गात् खलानां हि साधुता भवति। न हि खलसङ्गतः साधूनां खलत्वं (यति)। कुसुमभवम् आमोदं मृद् एव धत्ते। न हि कुसुमानि मृद्गन्धं धारयन्ति॥

Wicked men indeed acquire good behaviour by spending time with noble people. However, noble men never get wickedness by association of wicked people. The soil tends to acquire fragrance from the flowers around it, but the flowers never carry the smell of the soil.

सत्सङ्गात् & खलसङ्गतः (खलसङ्गात्)- both in पु. लिं. पं. वि. ए. व. of सत्सङ्गः- सत्- noble, saintly, सङ्गः- association, company, coming together- सताम् सङ्गः & खलसङ्गः- खलः- a wicked, bad person- खलानाम् सङ्गः- both ष. तत्पुरुष स., खलानाम् & साधूनाम्- both in पु. लिं. ष. वि. ब. व. of खलः & साधु- noble, saintly, साधुता- saintliness, decency, good behaviour & खलत्वम्- wickedness, cruelty- ता- & त्वम्- suffix implies quality, nature, भवति & धत्ते- both in वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, become & धा- दधाति- धत्ते ३ ग. उ. प. to bear, carry, कुसुमानि- in न. लिं. प्र. वि. ब. व. of कुसुमम्- a flower, कुसुमभवम्- originated from the flowers- कुसुमात् भवति इति- उपपद तत्पुरुष स., आमोदम्- fragrance, perfume, joy, delight & मृद्गन्धम्- मृदः गन्धम् - कर्मधारय स. -Smell of the earth- all in न. लिं. द्वि. वि. ए. व., धारयन्ति -प्रयोजक वर्त. प्र. पु. ब. व. प. प of धृ- १ ग. उ. प. (धृ- धरति /धरते.)-to bear,hold, न-no, हि-surelly, एव- just, -all अव्यय

**वयसः परिणामेपि यः खलः खल एव सः।**
**सुपक्वमपि माधुर्यं नोपयातीन्द्रवारुणम्॥**१२.२३॥

यः खलः (अस्ति), सः वयसः परिणामे अपि खलः एव (भवति)। इन्द्रवारुणं सु-पक्वम् अपि न माधुर्यम् उपयाति॥

An evil person (by nature) remains an evil person even after becoming mature with age. (For example), a bitter pumpkin does not become sweet even when fully ripe.

वयसः -न. लि. षष्ठी वि. ए. व. of वयस्- age, old ( also means time or period of life, Youth, a bird in general, a crow), परिणामे- स. वि. ए. व of परिणाम - change, result, maturity, ripening, evolution), खलः - wicked,, mischievous (खलं also means floor, earth, place, heap of dust), पक्व- (adjective) mature, ripe (also means cooked, digested, baked), सु- a particle used with कर्मधारय / बहुव्रीहि स. and with adjectives/adverbs. It indicates well, good, beautiful,

proper, thorough, easily, readily etc. माधुर्यम्- sweetness, pleasantness, उपयाति- २ ग. तृ. पु. ए. व. of उप+या-attain, approach (या-याति- go, walk, vanish). इन्द्रवारुणम्- bitter pumpkin

**दह्यमानाः सुतीव्रेण नीचाः परयशोऽग्निना।**
**अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते**॥१३.१०॥

नीचाः, परयशोऽग्निना सुतीव्रेण दह्यमानाः, तत् पदं गन्तुं अशक्ताः, ततः निन्दां प्रकुर्वते॥

Mean people who burn internally by the prosperity of others and who are incompetent to achieve that success, just only criticize them.

नीचाः, दह्यमानाः & अशक्ताः- all in पु. लिं. प्र. वि. ब. व. नीचः- mean or worthless person, दह्यमानः- one getting tormented, burnt, scorched- दह्यमान- कर्मणि वर्त. का. वा. धा. सा. वि. of दह्- दहति १ ग. प. प. to scorch, burn & अशक्तः- weak, powerless- शक्तः- able, competent- (शक्त- क. भू. धा. वि. of शक्- शक्नोति ५ ग. प. प. to be able)- न शक्तः- अशक्तः- नञ् तत्पुरुष स., परयशोऽग्निना & सुतीव्रेण- both in पु. लिं. तृ. वि. ए. व. of परयशोऽग्निः- a fire in the form of success or fame of others- परः- other, another, यशस्- न. लिं- success, flirt, fame अग्निः- fire- परस्य यशः- परयशः- ष. तत्पुरुष स & परयशः इव अग्निः- परयशोऽग्निः- उ. पू. प. कर्मधारय स. & सुतीव्रः- very intense- तीव्रः- severe, intense, sharp, सु- अव्यय- prefix implies very, much- सुतराम् तीव्रः - सुतीव्रः- प्रादि कर्मधारय स., तत्- that, it & पदम्- position, level- both in न. लिं. द्वि. वि. ए. व., गन्तुम्- पू. का. वा. तुमन्त हेत्वार्थक धा. सा. अव्यय of गम्- गच्छति १ ग. प. प. to go, reach, निन्दाम्- in स्त्री. लिं. द्वि. वि. ए. व. निन्दा- abuse, defamation, प्रकुर्वते- वर्त. प्र. पु. ए. व. प्र+ कृ- to assault, outrage, insult, do- (कृ- करोति- कुरुते ८ ग. उ. प. to do), ततः (ततस्)- from that, thereupon, therefore- अव्यय

**खलानां कण्टकानांच द्विविधैव प्रतिक्रिया।**
**उपानान्मुखभङ्गोवा दूरतो वा विसर्जनम्**॥१५.३॥

खलानां च कण्टकानां द्विविधा एव प्रतिक्रिया (अस्ति)। उपानात् मुखभंगः वा दूरतः विसर्जनं वा (कुर्यात्)॥

There are only two types of reactions for the wicked people and the thorns. One is to hit their face with a shoe (insult the wicked and break the thorn) or to keep them far far away.

खलानाम् & कण्टकानाम् -ष. वि. ब. व. of खल-wicked or bad person & कण्टक- thorn, च -and, द्वि -two, विधा-manner, kind- द्वौ विधे- द्विविधा- two kinds -स्त्री. लिं. प्र. वि. ए. व., एव -only, प्रति- अव्यय- as a prefix to verb means, 'against',

'towards', 'back' & prefix to noun not derived from verbs it means 'likewise', resemblance, rivalry, क्रिया- action, प्रतिक्रिया-reaction, remedy, resistance, उपानात्- पं. वि. ए. व. of उपानह् -footwear, shoe, मुख-face, mouth, sharp point, edge, भङ्ग-breaking, splitting (धा सा. नाम. of भंज् -भनक्ति- ७ ग. प. प. to break) - मुखस्य भङ्गः- मुखभङ्गः- ष. तत्पुरुष स.-blow on the face, insult - also means -splitting or breaking of sharp point, वा -or, दूर- far, distance , दूरत: -from a distance, विसर्जन-dismissal,

**दूरागतं पथिश्रान्तं वृथा च गृहमागतम्।**
**अनर्चयित्वा यो भुङ्क्ते स वै चाण्डाल उच्यते**॥१५.११॥

यः दूरागतं, पथिश्रान्तं, वृथा च गृहम् आगतम्, अन्-अर्चयित्वा भुङ्क्ते, सः चाण्डालः वै (इति) उच्यते॥

A person tired by travelling on the road far away (from his home), arrives at somebody's home, without any (bad) intention. The homeowner, who does not welcome him (but) enjoys only his own meal, is certainly called a mean person.

यः - पु. लिं. प्र. वि. ए. व. of यद्- who, which, दूर- (adjct.) distant, आगतं - क. भू. धा. वि. of गम्-गच्छति १ ग. प. प. to go, आ+गम् - to arrive, come, पथिन्- (पंथाः पंथानौ पंथानः)-road, पथः - means road, श्रान्तम्- द्वि. वि ए.व. of श्रान्त- क.भू.धा.वि. of श्रम्- श्रम्यति ४ ग. प. प. to exert, to be fatigued, पथि श्रान्तः पथिश्रान्तः -a road tired traveller, वृथा-(अव्यय) - to no purpose, wrongly, गृहम् - house, अनर्चयित्वा- न अर्चयित्वा- नञ् तत्पुरुष स., अर्चयित्वा- पू. काल. त्वान्त. धा. सा. अव्यय of अर्च् -१० ग. उ.प. अर्चयति-ते-, to honour, worship, welcome भुङ्क्ते- भुज् -७ ग. उ.प. प्र.पु.ए.व.- to eat, enjoy, सः - पु. लिं.प्र. वि. ए. व. of तद्- he, वै- a particle of affirmation or certainly, meaning indeed, truly, चाण्डालः- पु. लिं. प्र. वि. ए.व.- wicked, cruel, उच्यते-कर्मणि प्र. प्र. पु. ए. व. of वच्- २ ग. प. प.- वक्ति to say, speak (sometimes with accusative of word meaning 'speech'- उवाच)

**गुणैरुत्तुंगतां याति नोत्तुंगेनासनेन वै।**
**प्रासादशिखरस्थोऽपि काको न गरुडायते**॥१६.६॥

(मनुजः) गुणैः उत्तुंगतां याति| (मनुजः) उत्तुंगेन आसनेन वै न (उत्तुंगतां याति)| काकः प्रासादशिखरस्थः अपि, न गरुडायते॥

One achieves greatness by his virtues alone, not by occupying a high position. A crow sitting on the topmost point of a palace does not become an Eagle.

गुणैः &उच्चैः -तृ. वि. ब. व. of गुण-पु/न. लिं. -quality, virtue & उच्च-adjctv-high, tall, उत्तुंगताम् & गौरवम् - द्वि. वि. ए. व. of उत्तुंगता-(स्त्री. लि.) elevated or high position & गौरव-respect, value, weight, याति, आयाति-वर्त. प्र.. पु. ए. व. of या & आ+या- २ ग. प. प. to go, move, set out for, come to, न-no, not, उत्तुंगेन & आसनेन- both - तृ. वि. ए. व. of उत्तुंग-adjctv-high, tall & आसन- seat, position, वै-अव्यय-indeed, truly, काकः- crow- प्र. वि. ए. व., प्रासाद- mansion, palace, शिखर-top, sumit, स्थ-adjctv- at the end of comp, means- standing, staying, being, प्रासादस्य शिखर - प्रासादशिखर- ष. तत्पुरुष स. प्रासादशिखरस्थः - प्रासादशिखरे तिष्ठति इति -उपपद तत्पुरुष अपि-अव्यय- even, also, and गरुड-eagle-गरुडायते-वर्त. आ. प. प्र. पु. ए. व. of गरुडः -नाम साधित क्रियापद

**परप्रोक्तगुणो यस्तु निर्गुणोऽपि गुणी भवेत्।**
**इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः**॥१६.८॥

यः परप्रोक्तगुणः (सः) निर्गुणः अपि तु गुणी भवेत्। (परन्तु) स्वयं प्रख्यापितैः गुणैः इन्द्रः अपि लघुतां याति॥

One who is praised as virtuous by others is recognized as virtuous, even if he may not be so. Even (the King of Gods) Indra, was reduced to insignificance by boasting about his mighty qualities.

*In post Vedic literature, Indra is depicted as a powerful hero but one who constantly gets into trouble with his pride and by drunken, hedonistic and adulterous ways. Eventually, he lost his once exalted position. He did not deserve his position to be the King of Gods.*

यः (यद्)- who, परप्रोक्तगुणः- praised as virtuous or of noble qualities by others- पर- other, another, प्रोक्त- said, spoken of, described, गुणः- quality, virtue- परेण प्रोक्तम्- परप्रोक्तम्- तृ. तत्पुरुष स. & परप्रोक्ताणि गुणानि यस्य सः - परप्रोक्तगुणः -बहुव्रीहि स., निर्गुणः - one who is devoid of any quality- निर्गताः गुणाः यस्मात् सः- बहुव्रीहि स. & इन्द्रः- king of Gods, Indra & गुणी (गुणिन्)- one who is endowed with virtue, quality- all in पु. लि. प्र. वि. ए. व., अपि-अव्यय- also, even, and, तु- अव्यय- but, on the other hand, भवेत्- विध्यर्थ प्र. पु. ए. व. of भू- भवति १ ग. प. प. to be, to exist, स्वयम्- अव्यय- oneself, in one's own person, प्रख्यापितैः & गुणैः- पु/न. लिं.तृ. वि. ब. व.of प्रख्यापित- declared, proclaimed, told- प्रयोजक क. भू. धा. वि. of प्र+ ख्या- प्रख्यापयति- (ख्या- ख्याति २ ग. प. प. to tell, declare & गुण-virtue, quality, लघुताम्- स्त्री. लिं. द्वि. वि. ए. व. of लघुता- smallness, insignificance, contempt (लघु-small, cheap), याति- वर्त. प्र. पु. ए. व. of २ ग. प. प. to go, come to

**वृश्चिकस्य विषं पृच्छे मक्षिकायाः मुखे विषम्।**
**तक्षकस्य विषं दन्ते सर्वांगे दुर्जनस्य तत्**॥१७.८॥

वृश्चिकस्य विषं पृच्छे (अस्ति)। मक्षिकायाः विषं मुखे (अस्ति)। तक्षकस्य विषं दन्ते (अस्ति)। तत् विषं दुर्जनस्य सर्व-अंगे (अस्ति)॥

Scorpion's poison is in its tail. A fly's poison is in its mouth. A snake's poison is in its tooth. (However), it is all over the body of a wicked person.

वृश्चिकस्य, मक्षिकायाः, तक्षकस्य, दुर्जनस्य- All in षष्ठी वि.ए. वचन वृश्चिकः -scorpion, मक्षिका-fly/ bee, तक्षकः -one of the principal Nag (snake-god) -All in षष्ठी वि.ए. वचन, पृच्छे, मुखे, दन्ते, सर्वांगे-all in सप्तमी वि. ए.वचन of पृच्छम् -tail, मुखम्- face, सर्वांगम्- न.लि- सर्वं अंगं-सर्वांगं कर्मधारय स. दन्तः -पु.लि- tooth

## *3.3 The Fools (मूर्खाः)*

**मूर्खस्तु परिहर्तव्यः प्रत्यक्षो द्विपदः पशुः।**
**भिनत्ति वाक्यशूलेन अदृष्यं कण्टकं यथा**॥३.७॥

मूर्खः तु परिहर्तव्यः (अस्ति)। (सः) प्रत्यक्षः द्विपदः पशुः (अस्ति)। यथा अदृष्यं कण्टकं भिनत्ति (तथा सः) वाक्यशूलेन (भिनत्ति)॥

A fool is to be avoided. He is actually a two-legged animal. He tears apart people with darts of his speech, like an unseen (hidden) thorn (pierces one's body).

मूर्खः- a stupid, foolish person, परिहर्तव्यः- one to be avoided, shun, abandoned, left- परिहर्तव्य (also परिहरणीय & परिहार्य)- क. वि. धा. सा. वि. of परि+ हृ- to abandon, shun, leave, desert- (हृ- हरति- ते १ ग. उ. प.- to take, carry, take away), प्रत्यक्षः- evidently, distinctly, actually, प्रति- अव्यय- against, in front, अक्षि- न. लि.- the eye- अक्ष्णोः प्रतिगतः- अव्ययीभाव स., द्विपदः- biped, two legged, द्वौ- two, पदम्- legg- द्वौ पदौ यस्य सः- द्विपदः- बहुव्रीहि स., पशुः - an animal, कण्टकः- a thorn- all in पु. लिं. प्र. वि. ए. व., भिनत्ति- वर्त. प्र. पु. ए. व. of भिद्- भिनत्ति भिंत्ते ७ ग. उ. प. to break, pierce, split, tear up, वाक्यशूलेन- in पु/न. लिं. तृ. वि. ए. व. of वाक्यशूलः/लम्- darts of words- वाक्यम्- speech, words, sentence, शूलः/लम्- a sharp pointed weapon like a dart, spear- शूलः/लम् इव वाक्यम्- उपमानोत्तरपदकर्मधारय स., अदृष्यं - one which goes around unseen, hidden- दृश्य- to be seen, looked at- (also दर्शनीय, द्रष्टव्य) क. वि. धा. सा. वि. of दृश्- पश्यति- (see above)- न दृश्यः- अदृश्यः- नञ् तत्पुरुष स., अदृष्टः- unseen- दृष्टः-

seen- क. भू. धा. वि. of दृश्- पश्यति १ ग. प. प. to see, look at- न दृष्टः- अदृष्टः-नञ् तत्पुरुष , हि- indeed, surely, यथा- like which, similar to- both अव्यय

**मूर्खश्चिरायुर्जातोऽपि तस्माज्जातमृतो वरः।**
**मृतः स चाऽल्पदुःखाय यावज्जीवं जडो दहेत्**॥४.७॥

(पुत्रः) मूर्खः चिरायुः जातः अपि, तस्मात् जातमृतः वरः (भवति)। सः मृतः (पुत्रः) च अल्पदुःखाय (कारणं भवति), जडः (तु) यावत् जीवं दहेत्॥

A stillborn son is better than a stupid son with a long life. Death of a (stillborn) son may be painful for a short time but a foolish son will torment (his parents) for the rest of his life.

*This is obviously said by a person whose son is very stupid. The father cannot know that his son is very foolish until much later in his youth. This is an example of an- अतिशयोक्ति - making a point with exaggeration.*

मूर्खः- stupid, foolish person, चिरायुः- one with a long life- चिर- afjctv- long, lasting long, आयुः (आयुस्)- न. लिं.- life span, age- चिरम् आयुः यस्य सः- बहुव्रीहि स., जातः- one who is born- जात- क. भू. धा. वि. of जन्- जायते ४ ग. आ. प. to be born, produced, मृतः- one who is dead- मृत- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die, perish, जातः च असौ मृतः च- जातमृतः- वि. उ. प. कर्मधारय स.- one who was dead at the time of birth, stillborn, सः (तद्)- he, वरः- adjctv- better than, preferable to, excellent & जडः- adjctv- a stupid, senseless, dull- all in पु. लि. प्र. वि. ए. व., तस्मात्- compared to him, from him- in पु. लि. पं. वि. ए. व. of तद्- he, अल्पदुःखाय- न. लिं. च. वि. ए. व. of अल्पदुःखम्- momentary sorrow, grief- अल्प- adjctv- little, small, दुःखम्- distress, pain, sorrow- अल्पम् दुःखम्- वि. पू. प. कर्मधारय स., जीवम्- in पु. लि. द्वि. वि. ए. व. of जीवः- life, existence, दहेत्- विध्यर्थ प्र. पु. ए. व. of दह्- दहति- १ ग. प. प. to burn, scorch, अपि- also, even, यावत्- until, as long as, upto, च- and- all अव्यय

**लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्मणा।**
**मूर्खं छन्दानुवृत्तेन च यथार्थत्वेन पण्डितम्**॥६.१२॥

लुब्धम् अर्थेन गृह्णीयात्। स्तब्धम् अञ्जलिकर्मणा (गृह्णीयात्)। मूर्खं छन्दानुवृत्तेन (गृह्णीयात्)। पण्डितं च यथार्थत्वेन (गृह्णीयात्)॥
One should persuade a greedy person with money. One should make a stubborn person agreeable by folded hands. One should work with a stupid person by tolerating his whims. Moreover, one should convince a learned person with facts.

लुब्धम्, स्तब्धम्, मूर्खम् & पण्डितम्- all in पु. लि. द्वि. वि. ए. व. of लुब्धः- greedy, covetous- क. भू. धा. वि. of लुभ्- लुभ्यति ४ ग. प. प. to cover, to be greedy, स्तब्धः- stubborn, obstinate, stern- क. भू. धा. वि. of स्तंभ्- स्तंभते- १ आ. प. & स्तंभ्नोति & स्तंभ्नाति- ५ & ९ प. प. to be proud, obstinate, मूर्खः- stupid, ignorant & पण्डित- scholar, learned, expert, अर्थेन, अञ्जलिकर्मणा, छन्दानुवृत्तेन & यथार्थत्वेन- न. लिं. तृ. वि. ए. व. of अर्थ- money, wealth, purpose, अञ्जलिकर्मन्- folded hands, surrendering, begging- अञ्जलिः- पु. लिं.- cavity formed by folding and joining the open hands & कर्मन्- न. लिं.- work, act- अञ्जलिकर्म- यत् कर्म अञ्जलिना कृतं तत्- बहुव्रीहि स., छन्दानुवृत्त- doing things as per one's wish- छन्दस्- न. लिं.- wish, desire, fancy, अनुवृत्त- obeying, following- क. भू. धा. वि. of अनु + वृत्- to obey, follow- (वृत्- वर्तते १ ग. आ. प. to be, to behave)- छन्दम् अनुवृत्तम्- छन्दानुवृत्तम्- द्वितीया तत्पुरुष स. & यथार्थत्व- being fully conformable to truth- यथा-अव्यय- as, in which manner- अर्थ- purpose, reason, meaning- अर्थम् अनुसृत्य - यथार्थ- exact truth, without any distortion- अव्ययीभाव स., त्व- suffix implies quality, यथार्थत्व - with exact truth गृह्णीयात्- to be caught, persuaded, held- विध्यर्थ प. प. प्र. पु. ए. व. of ग्रह्- गृह्णाति- गृह्णीते ९ ग. उ. प. to hold, catch; च- and

**मांसभक्षैः सुरापानैर्मूर्खैश्चाऽक्षरवर्जितैः।**
**पशुभिः पुरुषाकारैर्भाराक्रान्ता च मेदिनी**॥८.२१॥

मेदिनी मांसभक्षैः, सुरापानैः, मूर्खैः, अक्षरवर्जितैः, पुरुषाकारैः पशुभिः च भाराक्रान्ता अस्ति॥

This Earth is overburdened with meat- eating, alcohol consuming, stupid, illiterate persons. They are animals in the forms of humans.

*It is well established that production of meat consumes significant amount of Earth's resources. It is inhumane and contributes to global warming. Excessive drinking is hazardous to one's health and family. The stupid and ignorant people do not contribute to the well-being of the society. Therefore, Cāṇakya calls them animals.*

मेदिनी- earth, ground, land & भाराक्रान्ता- burdened, weighed down- भारः- load, burden, weight, आक्रान्ता- distressed, troubled, seized, overtaken- आक्रान्त- क. भू. धा. वि. of आ+ क्रम्- to overcome, occupy, fill, vanquish, conquer (क्रम्- क्रामति- क्रमते, क्राम्यते १ ग. उ. प. & ४ ग. आ. प. to go, occupy- भारेण आक्रान्ता या सा- बहुव्रीहि स.- both in स्त्री. लिं. प्र. वि. ए. व., मांसभक्षैः, सुरापानैः, मूर्खैः अक्षरवर्जितैः, पशुभिः पुरुषाकारैः- all in पु. लिं. तृ. वि. ब. व. of मांसभक्षः- meat-eater, मांसम्- flesh, meat, भक्षः- food, eating- मांसम् भक्षयति इति - मांसभक्षः- उपपद स., सुरापानः- one who consumes spirituous liquor, wine, सुरा- a spirituous liquor, wine, alcohol, पानम्- a drink, beverage in general- सुरायाः पानम् करोति यः सः- सुरापानः- बहुव्रीहि स., मूर्खः- a stupid, foolish person,

अक्षरवर्जितः- illiterate- अक्षरम्- a letter of a alphabet, a word, वर्जितः- devoid of, lacking- वर्जित- क. भू. धा. वि. of वृज्- वर्जति १ ग. प. प. to shun,, avoid, abstain from- अक्षरेण वर्जितः यः सः- बहुव्रीहि स., पशुः- an animal, पुरुषाकारः- one in human form, पुरुषः- a man, person, human, आकारः- form, shape, figure- पुरुषस्य आकारः यस्य सः- बहुव्रीहि स., अस्ति- वर्त. प्र. पु. ए. व. अस्- १ ग. प. प. to be, exist, become,

**अन्तःसारविहीनानामुपदेशो न जायते।**
**मलयाचलसंसर्गान्न वेणुश्चन्दनायते**॥१०.८॥

अन्तःसारविहीनानाम् उपदेशः न जायते। वेणुः मलयाचल- संसर्गात् न चन्दनायते॥

Giving counsel to those without inherent capacity to grasp it does not produce any good result. Just being on Malaya mountain (full of sandalwood trees), a Bamboo tree does not get the fragrance of sandalwood.

अन्तःसारविहीनानाम्- पु. लिं. ष. वि. ब. व. of अन्तःसारविहीन- one who is devoid of inborn capacity of grasping- अन्तः (अन्तर्)- अव्यय- inborn, internally, within, सार- essence, genuine, strong, substance, विहीन- devoid of, without- क. भू. धा. वि. of वि+ हा- to be without- (हा- जहाति- २ ग. प. प. to abandon, leave)- सारम् अनतर्गतम्- अन्तःसारम्- अव्ययीभाव स. & अन्तःसारात् विहीनः- अन्तःसारविहीनः- पं. तत्पुरुष स., उपदेशः- good counselling, advice, teaching & वेणुः- bamboo, reed -both in पु. लिं. प्र. वि. ए. व., जायते & चन्दनायते- वर्त. प्र.. पु. ए. व. of जन्- ४ ग. आ. प. to happen, become, produce, grow, take place, to be born & ना. सा. धा. of चन्दन- sandalwood, मलयाचलसंसर्गात्- पु/न. लिं. पं. वि. ए. व. of मलयाचलसंसर्ग- contact or association with Malay mountain- मलय- name of a mountain, अचल- mountain, संसर्ग- contact, association, company; & मलयाचलस्य संसर्गः- मलयाचलसंसर्गः- ष. तत्पुरुष स, न- no,

**यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।**
**लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति**॥१०.९॥

यस्य स्वयं प्रज्ञा न अस्ति तस्य शास्त्रं किं करोति? दर्पणः लोचनाभ्यां विहीनस्य किं करिष्यति?

How can the scriptures (or science) help a person without any intelligence? What will a mirror do to a blind person?

यस्य & तस्य- both पु. लिं. ष. वि. ए. व. of यद्- who, which, what & तद्- he, she, it, स्वयम् - अव्यय- one's own, प्रज्ञा- intelligence, wisdom, अस्ति & करोति- प्र. पु. ए. व. of अस्- २ ग. प. प. –to be & कृ -८ ग.उ. प. to do, शास्त्रम् - knowledge,

science, scripture, किम् - what, लोचनाभ्याम् - तृ. वि. द्वि. व. of लोचनम्- न.लिं an eye, sight, विहीनस्य- पु. लिं. ष. वि. ए. व. of विहीन -deprived of - क. भू. धा. वि. of वि+हा ( हा-जहाति २. ग. प. प.- to abandon), दर्पणः- mirror, करिष्यति- द्वि. or सामान्य भूत. प्र. पु. ए. व. of कृ-to do.

**बुद्धिर्यस्य बलं तस्य निर्बुद्धेश्च कुतो बलम्।**
**वने सिंहो मदोन्मत्तः शशकेन निपातितः**॥१०.१६॥

यस्य बुद्धिः (अस्ति), तस्य बलम् (अस्ति)। निर्बुद्धेः च कुतः बलम्? वने मदोन्मत्तः सिंहः शशकेन निपातितः (अभूत्)॥

One, who has wisdom, has real strength. For a stupid person, what is the use of his physical strength? In the forest, an arrogant Lion was defeated by a rabbit.

*A clever rabbit uses his wit to kill a greedy, vicious but foolish lion in this Panchatantra tale. The rabbit reached an old well and said to the king, that another, stronger lion lives in this well. The foolish lion peeped into the well and mistook his own reflection as another lion and roared loudly. Hearing the echo of his own, the lion got angry and jumped into the well and drowned. Anything can be achieved with intelligence.*

बुद्धिः- intelligence, wisdom, understanding- in स्त्री. लिं. प्र. वि. ए. व., बलम्- strength, power, might- in न. लिं. प्र. वि. ए. व., निर्बुद्धेः, यस्य & तस्य- all in पु. लिं. ष. वि. ए. व. of निर्बुद्धिः- a stupid person, fool- निर्गता बुद्धिः यस्मात् सः- बहुव्रीहि स., यद्- who & तद्- he, वने- न. लिं. स. वि. ए. व. of वनम्- forest, पश्य- आज्ञार्थ म. पु. ए. व. of दृश्- पश्यति १ ग. प. प. to see, look at, मदोन्मत्तः- arrogant with pride- मदः- arrogance, pride, उन्मत्तः- one who is frantic, insane, mad- उन्मत्त- क. भू. धा. वि. of उद+ मद्- माद्यति ४ ग. प. प. to be frantic, insane, mad- मदेन उन्मत्तः - तृ. तत्पु. स., सिंहः- a lion & निपातितः- defeated, made to fall down- निपातित- प्रयोजक क. भू. धा. वि. of नि+ पत्- निपातयति- ते- to kill, strike, defeat- (पत्- पतति १ ग. प. प. to fall down)- all in पु. लिं. प्र. वि. ए. व., शशकेन- in पु. लिं. तृ. वि. ए. व. of शशकः- rabbit, hare, कुतः (कुतस्)- how, च- and- both अव्यय

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते**॥ १४.१॥

पृथिव्यां जलम्, अन्नं, सुभाषितम् (इति) त्रीणि रत्नानि (सन्ति)। मूढैः पाषाण-खण्डेषु रत्न-संज्ञा विधीयते॥

On this earth, there are three gems, namely, water, food and a well-spoken verse. Fools recognize pieces of stones as gems.

पृथिव्याम्- स्त्री. लिं. स. वि. ए. of पृथिवी- the earth, जलम् - water, अन्नम् -food, सुभाषितम् - well-said couplet-all in - न. लिं. प्र. वि. ए. व., त्रीणि & रत्नानि- न. लिं. प्र. वि. ब. व. of त्रि- three & रत्न - gem, मूढैः- पु. लिं. तृ. वि. ब. व. of मूढ - stupid, fool (क. भू. धा. वि. of मुह् -मुह्यति ४ ग. प. प. to be stupid, foolish, to become senseless, faint), पाषाणखण्डेषु- न. लिं. स. वि. ब. व. of पाषाणखण्डम्- piece of rock- पाषाण- rock, stone, खण्ड- piece- पाषाणस्य खण्डम् - पाषाणखण्डम् - ष. तत्पुरुष स., रत्न- gem, संज्ञा- designation, name- रत्नस्य संज्ञा- रत्नसंज्ञा -षष्ठी तत्पुरुष स., विधीयते- gets laid down, done, named- passive form- प्रयोजक वर्त. प्र. पु. ए. व. of वि+धा to do, lay down ( धा-दधाति-धत्ते ३ ग. उ. प. to set, lay, fix, give, confer)

**यो मोहान्मन्यते मूढो रक्तेयं मयि कामिनी।**
**स तस्या वशगो भूत्वा नृत्येत् क्रीडा शकुन्तवत्**॥१६.३॥

यः मूढः मोहात् "इयं कामिनी मयि रक्ता (अस्ति" इति) मन्यते, सः तस्याः वशगः भूत्वा क्रीडा-शकुन्तवत् नृत्येत्॥

That stupid deluded person who thinks that "this lovely woman is attracted to me", soon goes under her control and dances to her tunes like a toy-bird.

यः (यद्)- who, मूढः- stupid or foolish person- मूढ- क. भू. धा. वि. of मुह् -मुह्यति ४ ग. प. प. to be perplexed, to be stupid, foolish, सः (तद्)- he & वशगः- one, who is under control, influence- वशम्- control, influence- वशे गच्छति इति- उपपद तत्पुरुष स.- all in पु. लि. प्र. वि. ए. व., मोहात्- in पु. लि. पं. वि. ए. व. of मोहः- delusion, confusion, infatuation, affliction, मन्यते- वर्त. प्र. पु. ए. व. of मन्- ४ ग. आ. प. to think, consider, believe, इयम् (इदम्)- this, she, कामिनी- lustful, beloved, desirous woman- रक्ता- one having attachment- रक्त- क. भू. धा. वि. of रञ्- रजति-ते- १ ग. उ. प. to be devoted, attached, enamoured- all in स्त्री. लि. प्र. वि. ए. व., मयि- in me- स. वि. ए. व. of अस्मद्- I, तस्याः- her- in स्त्री. लि. ष. वि. ए. व. of तद्- she, भूत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of भू- भवति १ ग. प. प. to become, to be, to exist, क्रीडा शकुन्तवत्- one like a toy-bird- क्रीडा- play, sport, शकुन्तः- bird- वत्- suffix implies quality or as an अव्यय if it indicates likeness, नृत्येत्- विध्यर्थ प्र. पु. ए. व. of नृत्- नृत्यति ४. ग. प. प.- to dance

★★★★★★

# Chapter 4- Importance of Knowledge: Vidyā (विद्या)

Vidyā (विद्या) means science, learning, knowledge and scholarship. Most importantly, it refers to valid knowledge, which cannot be contradicted. Vidyā is not mere intellectual knowledge, but its true understanding and its application as well. Jñāna (ज्ञान) is Vidyā focussed on understanding Ātman and Brahman.

Here is what Cāṇakya says about Vidyā.

## *4.1 Characteristics of Knowledge (विद्या)*

**रूपयौवनसंपन्ना विशालकुलसम्भवाः।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः**॥३.८॥

रूप-यौवन-संपन्नाः विशाल-कुल-सम्भवाः, (किंतु) विद्या-हीनाः (जनाः),निर्गन्धाः किंशुकाः इव, न शोभन्ते॥

Uneducated people do not prosper even if they are endowed with beauty and youth and are born in renowned families, just like Batea tree flowers that have no fragrance at all.

*किंशुकाः trees are batea Monosperma trees with bright red but scentless flowers are common in South Asia.*

रूप- appearance, figure, यौवन- youth, संपन्न-possessed of, rich, wealthy ( क.भू. धा. वि. of पद्- पद्यते- ४ ग. आ. प.- to go, approach, gain,) सम्+पद् -to possess, रूपम् च यौवनम् च- रूपयौवनम्- द्वंद्व स., रूपयौवनेन संपन्नः- तृ. तत्पुरुष स., विशालकुलसंभवः - विशाले कुले संभवति इति- उपपद तत्पुरुष स, विशाल- large, renowned, कुल- family, संभवः - birth, spring up(also means possibility), विद्याहीन- विद्यया हीनः - तृ. तत्पुरुष स., विद्या- education, हीन- deprived- (क. भू. धा. वि. of हा-२ ग. प. प. जहाति- leave, give up), शोभन्ते- प्र. पु. ब.व. of शुभ्- १ ग. आ.प- to shine, appear, निर्गन्ध- निर् +गन्ध- निर् (अव्यय) or निस् (before vowels and soft consonant) conveying 'out of' 'without', गन्ध- smell, odour.

**कामधेनुसमा विद्या सदैव फलदायिनी।**
**प्रवासे मातृवत्तस्मात् विद्या गुप्तधनं स्मृतम्**॥४.५॥

विद्या कामधेनु समा सदा एव फलदायिनी (अस्ति)।(सा) प्रवासे मातृवत् (रक्षति )। तस्मात् विद्या गुप्तधनं स्मृतम्॥

Knowledge is like the Kamdhenu (the wish fulfilling cow). She always gives whatever fruit (result) is desired. Knowledge protects one like a mother while travelling. That is why she is called a hidden treasure.

*Kamadhenu (कामधेनु), a divine bovine-goddess is a miraculous cow of plenty who provides her owner whatever he desires. An educated man or woman earns good money and is able to fulfil his or her desires. With enough knowledge, one can enjoy the beauty of this world as well as protect himself in travels or in other circumstances. It is indeed a hidden treasure.*

विद्या- knowledge, education, learning, कामधेनुः- wish fulfilling cow- कामः- desire, wish, longing, धेनुः- a cow- या धेनु: कामा: पृणाति सा - कामधेनुः- बहुव्रीहि स., समा- adjctv- equal, comparable, like, फलदायिनी- yielding fruitful results- फलम्- fruit, result, दायिनी (दायिन्)- giver फलस्य दायिनी - फलदायिनी- षष्ठी तत्पु स.- all in स्त्री. लि. प्र. वि. ए. व., प्रवासे- in पु. लि. स. वि. ए. व. of प्रवासः- travel, journey, मातृवत्- like a mother- मातृ- mother, वत्- suffix implies like, similar to, गुप्तधनम्- hidden treasure- गुप्त- hidden, protected, concealed- धनम्- wealth, money- गुप्तम् धनम्- वि. पू. प. कर्मधारय स. & स्मृतम्- said, known, declared- स्मृत- क. भू. धा. वि. of स्मृ- स्मरति- १ ग. प. प. to think of, recollect, declare- all in न. लि. प्र. वि. ए. व., सदा- always, daily, एव- just, only, merely, तस्मात्- therefore-all अव्यय

**नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः।**
**नास्ति कोपसमो वह्निर्नास्ति ज्ञानात्परं सुखम्**॥५.१२॥

कामसमः व्याधिः न अस्ति। मोहसमः रिपुः न अस्ति। कोपसमः वह्निः न अस्ति (तथा) ज्ञानात् परं सुखं न अस्ति॥

There is no disease like (constantly craving for) sensual enjoyment. There is no adversary like delusion. There is no fire like anger. There is no happiness higher than (acquiring) knowledge (about Ātman and Brahman).

व्याधिः- ailment, sickness, disease, रिपुः- enemy, adversary, वह्निः- fire, कामसमः- comparable to sensual enjoyment- कामः- desire, sensual enjoyment, सम- adjctv- like, similar to, comparable to- कामस्य समः, मोहसमः- comparable to delusion- मोहः- infatuation, affliction, delusion- मोहस्य समः,

कोपसमः- comparable to anger- कोपः- anger, wrath- कोपस्य समः- all three ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, ज्ञानात्- in न. लिं. पं. वि. ए. व. of ज्ञानम्- knowledge, understanding, proficiency, परम्- adjctv- beyond, other than & सुखम्- happiness, satisfaction- both in न. लिं. प्र. वि. ए. व., न- no, not- अव्यय

**शुनः पुच्छमिव व्यर्थं जीवितं विद्यया विना।**
**न गुह्यगोपने शक्तं न च दंशनिवारणे**॥७.१९॥

विद्यया विना जीवितं शुनः पुच्छम् इव व्यर्थम् (अस्ति)। (तद्) गुह्य-गोपने न शक्तं, न च दंश-निवारणे ( शक्तं) (भवति)॥

Life without education is useless like a dog's tail. It is not capable of hiding dog's private parts nor can it avoid stings of the flies.

विद्यया- in स्त्री. लिं. तृ. वि. ए. व. of विद्या- knowledge, education, learning, शुनः- in पु. लिं. ष. वि. ए. व. of श्वन्- a dog, गुह्यगोपने & दंशनिवारणे- both in न. लिं. स. वि. ए. व. of गुह्यगोपनम्- hiding of secret- गुह्य (also- गूहितव्य & गूहनीय)- that is to be hidden- क. वि. धा. सा. वि. of गुह्- गुहति- ते १ ग. उ. प. to conceal, hide, गोपनम्- protection, gaurding (गोपयति- ते- प्रयोजक of गुह्-)- गुह्यस्य गोपनम्- ष. तत्पुरुष स. दंशनिवारणम्- getting rid of biting, protection from insect bite- दंशः- biting, stinging, निवारणम्- getting rid of, keeping off, preventing, दंशस्य निवारणम् -ष. तत्पुरुष स. जीवितम्- living, life- जीवित- क. भू. धा. वि. of जीव्- जीवति- १ ग. प. प. to be alive, to live, व्यर्थम्- adjctv- useless, wasteful, vain, पुच्छम्- tail, शक्तम्- capable of, strong enough- शक्त- क. भू. धा. वि. of शक्- शक्नोति ५ ग. प. प. to be able, suitable- all in न. लिं. प्र. वि. ए. व., इव- like, similar to, विना- without, devoid of, न- no, not, च- and- all अव्यय

**क्रोधो वैवस्वता राजा तृष्णा वैतरणी नदी।**
**विद्या कामदुघा धेनुः सन्तोषं नन्दनं वनम्**॥८.१४॥

क्रोध: वैवस्वता राजा अस्ति। तृष्णा वैतरणी नदी अस्ति। विद्या कामदुघा धेनुः अस्ति। सन्तोषं नन्दनं वनम् अस्ति॥

Anger is like god of death (यमः). Greed is like Vaitarani (river of hell). Knowledge is like Kamdhenu (wish fulfilling cow). Contentment is Nanadanvana (Garden in Heaven).

*Yama is considered the God of death. The Vaitarani (वैतरणी) is a mythological river that lies between the Earth and the infernal hell. The righteous are stated to see the river filled with nectar-like water, while the*

*sinful see it filled with blood. Nandanavana is supposed to be the Garden of Gods, peaceful, happy and pleasurable.*

वैवस्वतः-7th मनु who presides over present age, वैवस्वत्- Southern quarter, राजन्- king, वैवस्वता राजा- both पु. लि. प्र. वि ए.व- King of Southern quarter- Yama, तृषा, तृष्णा -धातुसाधित नाम of तृष्-तृष्यति ४ ग. प. प.-to be thirsty, greedy, कामम्-अव्यय- wish,desire,दुघा-milking, a milk cow, दुघ- adjective-(at the end of compound) means yielding, granting. कामदुघा -One who grants wishes, सन्तोषं - contenment.

**विद्या प्रशस्यते लोकैर्विद्या सर्वत्र गौरवा।**
**विद्यया लभते सर्वं विद्वान् सर्वत्र पूज्यते**॥८.२०॥

लोकैः विद्या प्रशस्यते। विद्या सर्वत्र गौरवा (भवति)। सर्वं विद्यया लभते। विद्वान् सर्वत्र पूज्यते॥

Knowledge is praised by everyone. Knowledge is respected everywhere. One can get everything with knowledge. A learned person is honoured everywhere.

लोकैः- by the people -पु/न. लिं. तृ. वि. ब. व. of लोक- world, people, विद्या-(स्त्री. लि.)- Knowledge, education, प्रशस्यते- is praised - कर्मणि प्रयोग तृ. पु. ए. व. of प्र+शंस्- (शंस्-शंसति १ ग. प. प. to praise, extol), सर्वत्र- अव्यय- everywhere, at all times, गौरवा- स्त्री. लि. प्र. वि. ए. व. of गौरव-respect, honour, consideration, dignity, विद्यया- स्त्री. लि. तृ. वि. ए. व. of विद्या, सर्वम् - द्वि. वि. ए. व. of सर्व-all, entire, लभते-वर्त. प्र. पु. ए. व. of लभ्-१ ग. आ. प. to get, obtain, विद्वान् - पु. लि. प्र. वि. ए. व. of विद्वस्- wise, knowledgeable, learned, scholar, पूज्यते- gets honoured, worshiped- कर्मणि प्रयोग प्र. पु. ए. व. of पूज्- पूजयति-ते- १० उभयपद - to adore, worship, revere, honour.

**अनन्तशास्त्रं बहुलाश्च विद्याः,**
**अल्पश्च कालो बहुविघ्नता च।**
**यत्सारभूतं तदुपासनीयं,**
**हंसो यथा क्षीरमिवम्बुमध्यात्** ॥१५-१०॥ - त्रिष्टुभ

अनन्त- शास्त्रं (भवति)। विद्याः च बहुलाः (सन्ति), कालः च अल्पः (स्वल्पः) (अस्ति), विघ्नताः च बहु (सन्ति)। यत् सारभूतं, तद्, यथा हंसः अम्बु-मध्यात् क्षीरम् इव, उपासनीयम्॥

The sources of knowledge are infinite. Fields of learning are many. However, the time (to learn them) is very short and there are too many hurdles. (Hence) whatever is essential should be sought, just like a swan that sips only milk from the midst of water.

*A swan separating milk from water is a poetic myth- कविकल्पना.*

अनन्तशास्त्रम्- अनन्तम् शास्त्रम्- कर्मधारय स.-Vast sources of knowledge, विद्याः स्त्री.लिं. प्र. वि. ब.व of विद्या, बहुलाः - स्त्री.लिं. प्र. वि. ब.व of बहुल –adjctv- wide, ample, abundant (compr.-भूयस्, supr.- भूयिष्ठ), बहु, बह्वी (स्त्री.लिं.)– much, great plenty (comparative बंहीयस्, supr. बंहिष्ठ), कालः पु. लिं- time, अल्पः (स्वल्पः)- little, small, यद् - न. लिं. which, what, तद्- न. लिं- it, this, हंसः - पु. लिं.- Swan, अम्बु- न. लि.- Water, क्षीरम्- न. लिं.-Milk- all प्र. वि. ए. व., विघ्नः- पु. लिं. (rarely न.लि).- obstacle, interruption +ता- occurrence of obstacles, सारभूतं - सारम्- essence सारम् सम्पद्यमानम्- सारभूतम्- gist, essence-च्वि समास, मध्यात् - पं वि. ए. व. of मध्यः - middle, inside इव- like, उपासनीयम् - प्र. वि. ए. व.- of उपासनीय- क. विध्यर्थ धा. वि. of उप+ आस्-आस्ते २ ग. आ. प- to be worshipped, accepted

**पुस्तकस्था तु या विद्या परहस्तगतं धनम्।**
**कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्**॥१६.२०॥

या विद्या पुस्तकस्था तु (अस्ति),सा विद्या कार्यकाले समुत्पन्ने न (उपयुक्ता भवति)। (यद्) धनं परहस्तगतम् (अस्ति), तद् धनं (कार्यकाले समुत्पन्ने) न (उपयुक्तं भवति)॥

The knowledge that stays only in the book and the wealth gone into other's hands are neither knowledge nor wealth when the need arises.

*One must understand and use the knowledge that has been taught. Similarly, one must have adequate amount of money in one's own possession for emergencies.*

पुस्तके तिष्ठति इति- पुस्तकस्था- उपपद तत्पुरुष स.- पुस्तकः or पुस्तकम् book, स्था- तिष्ठति १ ग. प. प. stay, reside, या, विद्या,सा- all - स्त्री लि. प्र.वि.ए.व of यद्- which, who, विद्या- knowledge, तद् -that, she, धनम्- न. लि. प्र.वि.ए.व- wealth, money, परहस्तगतम्- in other's hand, पर-other -(adjective), हस्तः- hand, गतम्- gone क.भू.धा.वि of गम्-१ ग. प.प. –go, परस्य हस्तः - परहस्तः - षष्ठी तत्पुरुष स., परहस्ते गतम्- स. तत्पुरुष स., कार्यकाले - स.वि. ए. व. of कार्यकाल- time of action, fit time, कार्यस्य कालः -षष्ठी तत्पुरुष स. -कार्य- work, business - कर्मणि विध्यर्थ धा. वि. of कृ ८ ग उ. प.- to do & कालः - time, समुत्पन्ने- स. वि. ए. व. of समुत्पन्न (पन्न- क. भू. धा. वि of पद् -पद्यते ४ ग. आ. प.- to attain, follow, सम्+उद्+पद् - arise, spring up)

The following verse correctly emphasizes what is important!

नृपत्वं च विद्वत्वं च नैव तुल्यं कदाचन।स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

Royal-hood (King) and scholarship (scholar) should never be compared. A King is respected only in his kingdom, (but) a scholar is honoured everywhere.

## *4.2 Animal qualities (पशुगुणाः)*

The greatest teacher is the Nature. Cāṇakya takes examples of six birds and animals to pinpoint what we can learn from them. It is not clear how the authors acquired the knowledge about their qualities. Some of them cannot be explained! The takeaway from these verses is that we can learn many things from different animals.

**सिंहादेकं बकादेकं शिक्षेच्चत्वारि कुक्कुटात्।**
**वायसात्पञ्च शिक्षेच्च षट् शुनस्त्रीणि गर्दभात्**॥६.१५॥

सिंहात् एकं, बकात् एकं, कुक्कुटात् चत्वारि शिक्षेत् च। वायसात् पञ्च, शुनः षट्, गर्दभात् त्रीणि शिक्षेत् च॥

One should learn one thing from a lion, one from a crane, four from a rooster, five from a crow, six from a dog and three from a donkey.

सिंहात्, बकात्, कुक्कुटात् , वायसात्, गर्दभात्- All in पञ्च. वि. ए. वचन of सिंह - Lion बकः -Crane, कुक्कुटः- Cock, वायसः -Crow, शुनिः -Dog, गर्दभः- Donkey शिक्षेत्- विद्यर्थ प्र.पु.ए.व.of शिक्ष्-शिक्षते -१ ग.आ. प. एकम्- प्र.वि.ए.व, त्रीणि, चत्वारि, पञ्च , षट्, सप्त- प्र. वि. ब.वचन of न. पु. of त्रि-३, चतुर्-४, पञ्चन् -५,षट्-६, सप्तन्-७

**प्रभूतं कार्यमल्पं वा यन्नरः कर्तुमिच्छति।**
**सर्वारम्भेण तत्कार्यं सिंहादेकं प्रचक्षते**॥६ १६॥

नरः प्रभूतम् अल्पम् वा, यत् कार्यं कर्तुम् इच्छति, तत् कार्यं सर्व-आरम्भेण (कर्तुं) सिंहात् एकं प्रचक्षते॥

A man ought to learn one thing from a lion! It is how to complete any work that he wants to do, big or small, from beginning to finish.

*This refers to a lion that attacks a big elephant or a small deer. He does it with full force and completes his hunt once started.*

प्रभूत- (क.भू.धा.वि. of प्र+भू-भवति १ ग, प. प)- huge, big. अल्प-small, minor, कर्तुम्- तुमन्त धातुसाधित अव्यय of कृ-करोति-कुरुते १ ग, उ. प.- to do. इच्छति प्र.पु.ए.व of इष्-इच्छति ६ ग, प. प.-to wish, desire,आरंभः - begin, commence,

सर्व- pronominal adjective-entire, complete, सर्वारम्भम्- begin to finish, प्रचक्षते- प्र. पु. ए. व- is learnt- चक्ष्-चष्टे २ ग, आ. प.-to see, perceive, प्र+चक्ष्- lay down, say, learn, एकम्- प्र.वि.ए.व

**इन्द्रियाणि च संयम्य बकवत्पण्डितो नरः।**
**देशकालबलं ज्ञात्वा सर्वकार्याणि साधयेत्**॥६.१७॥

पण्डितः नरः इन्द्रियाणि संयम्य, देश, काल, बलं च ज्ञात्वा सर्वकार्याणि बकवत् साधयेत्॥

A wise man should perform all his work, with full control over his organs, knowing the location, time and his own strength like a Crane (बक पक्षि).

*Cranes are opportunistic feeders that change their diets according to the season and their own nutrition requirements. They eat a range of items from small rodents, eggs of birds, fish, insects, grains and berries. They stand on their two skinny legs, which needs strength, focus and control.*

संयम्य-पूर्वकालवाचक ल्यबन्त धातुसाधित अव्यय (Indeclinable),यम्- यच्छति १,प.प curb, restrain, subdue, सं-यम् control, ज्ञा-जानाति,जानीते, ९ उ.प. to know, learn; ज्ञात्वा- पूर्वकालवाचक त्वान्त धातुसाधित अव्यय, सिध्-सिध्यति ४ ,प.प. to fulfill, accomplish, attain, साधयेत्- प्र. पु. ए. व. विध्यर्थ

**सुश्रान्तोपि वहेद्भारं शीतोष्णं न च पश्यति।**
**संन्तुष्टश्चरते नित्यं त्रीणि शिक्षेच्च गर्दभात्**॥६ १८॥

गर्दभात् (एते) त्रीणि शिक्षेत् - सु-श्रान्तः अपि भारं वहेद्, शीत-उष्णं च न पश्यति, नित्यं सन्तुष्टः चरते च॥

(One) ought to learn three (virtues) from a donkey- carrying a load even when tired, indifferent to heat and cold and always being content.

श्रान्त-क.भू.धा.वि. of श्रम्-श्राम्यति ४ ग. प. प. exert, toil, labour, exhaust, वहेत् – carry- वह्-वहति-ते १ ग. उ. प., शिक्षेत् - to learn study -शिक्ष्- १ ग. आ. प. शिक्षते- both विद्यर्थ प्र. पु. ए.वचन, भारम्-load, पश्यति -दृश्- १ ग. प. प. प्र. पु. ए.वचन, - to see, perceive, mind, तुष्ट - क.भू.धा.वि. of तुष्-तुष्यति ४ ग. प. प- to be pleased, satisfied, सं+तुष्ट-well pleased, contented, चर्-चरति १ ग. प. प., to walk, roam, graze, त्रीणि-प्र. वि ब.वचन, गर्दभात्-पु. लि. पं. वि. ए. वचन.

**प्रत्युत्थानं च युद्धं च संविभागं च बन्धुषु।**
**स्वयमाक्रम्य भुक्तं च शिक्षेच्चत्वारि कुक्कुटात्**॥६.१९॥

कुक्कुटात् प्रति-उत्थानं च युद्धं च स्वयम्-आक्रम्य भुक्तं,बन्धुषु संविभागं च च (इति) चत्वारि शिक्षेत्॥

One should learn (following) four virtues from a rooster - Awakening on time, (ever ready to) fight, eating food earned by fighting himself and sharing portions with relatives.

उत्थानम्- rising, getting up, प्रत्युत्थान- timely awakening (also means rising from one's seat, as a respect to a visitor),भागः -part, portion, share, सम्+वि+भागः -division, partition, share, क्रम् १ ग. उ. प. क्रामति-क्रमते (also ४ ग. प. प.- क्राम्यति) - to walk, approach, आक्रम्य -ल्यबन्त धा. अव्यय of आ+क्रम्- attack, conquer, vanquish, भुक्त- enjoyed, eaten क.भू.धा.वि of भुज्- ७ ग. उ. प. भुनक्ति, भुंक्ते- to enjoy, eat

**गूढं च मैथुनं धाष्टर्यं काले काले च सङ्ग्रहम्।**
**अप्रमत्तमविश्वासं पञ्च शिक्षेच्च वायसात्**॥६.२०॥

वायसात् गूढं मैथुनं, धाष्टर्यं च, काले काले सङ्ग्रहम् अप्रमत्तम् च, अविश्वासम् पञ्च च शिक्षेत्॥

One should learn from a crow five virtues, (namely), copulating secretly, valour, stocking (food) from time to time, ever cautious and not trusting (blindly) anyone.

*Crows walk on the ground with a specific purpose to feed themselves. They are omnivores that enjoy meat and may even attack and kill young, weak animals. Crows will make off with shreds of road kill and store titbits in trees for later consumption. They tend to be monogamous.*

गूढ- क.भू.धा.वि of गुह्-गूहति-ते १ ग. उ. प. cover, hide keep secret, मैथुन- copulation, मत्त- क.भू धा.वि of मद् ४ ग. प. प. मद्यति to be mad, drunk, अप्रमत्तम् (अ+प्र+मत्त)- ever cautious, अ+विश्वासम्- not believing-न प्रमत्तम् & न विश्वासम् both नञ्-तत्पुरुष स., धाष्टर्यम्-धीरत्वम्- valour

**बह्वाशी स्वल्पसन्तुष्टः सुनिद्रो लघुचेतनः।**
**स्वामिभक्तश्च शूरश्च षडेते श्वानतो गुणाः**॥६ २१॥

बहु-आशी, स्वल्प-सन्तुष्टः, सु-निद्रः,लघु-चेतनः, स्वामि-भक्तः च शूरः च एते षड् श्वानतः गुणाः (सन्ति)॥

The six virtues of a dog are- voracious but contented with little food, deep sleeping but always alert, devotion to master and valour.

आशी - प्र. वि. ए. व. of आशिन् (adjctv)-consuming ( note :आशिस् - wishing for other) स्वल्पसन्तुष्टः -स्वल्पेन सन्तुष्टः इति- तृ. तत्पुरुष स to be content with little (तुष्ट - क.भू. धा. वि. of तुष्-तुष्यति ४ प.प to be pleased, satisfied, सं+तुष्ट-well pleased, contented), सुखी निद्रा यस्य स: - प्रादि बहुव्रीहि स -well slept, स्वामिभक्तः - स्वामिने भक्तः- devotion to master - च. तत्पुरुष स., लघुः चेतनः यस्य सः - लघुचेतनः - बहुव्रीहि स.-small amount of energy , शुनिः = श्वानः- a dog श्वानतः -From a dog

## *4.3 Student (विद्यार्थी)*

The word Vidyārthī (विद्यार्थी, विद्यार्थिन्) is a seeker of intellectual knowledge. He not only studies it sincerely, but wants to understand it deeper and learn more and more.

There is a famous question asked by Saunaka, the Vidyārthī, to his Guru.
"कस्मिन् नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति" - मुण्डक उपनिषद
"What is that, my Lord, having known which, all else becomes known?"

The concept of continuous teacher student tradition- Guru-shishya parampara (गुरु शिष्य परंपरा) is imbedded in Hindu philosophy.

Here are some verses Cāṇakya associated with students.

**श्लोकेन वा तदर्धेन पादेनैकाक्षरेण वा।**
**अवन्ध्यं दिवसं कुर्यात् दानाध्ययनकर्मभिः** ॥२.१३॥

(मनुष्यः), श्लोकेन वा तदर्धेन पादेन, एकाक्षरेण वा (तद्-अर्ध-अर्धाक्षरेण वा), दान-अध्ययन-कर्मभि: (तस्य) दिवसम् अवन्ध्यं कुर्यात्॥

By reciting a (sacred) verse or half of it or a fourth of it or even its single letter and by donating to charity and self study, one should make his day worthwhile.

श्लोकेन, तदर्धेन & पादेन- all in पु. लिं. तृ. वि. ए. व. of श्लोकः- a hymn or a verse of praise, a proverb or a saying, तदर्धः- a half of that- अर्ध- adjctv- half, half part- तस्य अर्धः- ष. तत्पुरुष स., पादः- the fourth part of a stanza, a line, a part in general, एकाक्षरेण & तदर्धार्धाक्षरेण- both in न. लिं. तृ. वि. ए. व. of एकाक्षरम्- a single alphabet- एक- pronominal adjctv- one, single, अक्षरम्- a letter of a alphabet, a syllable- एकम् अक्षरम्- वि. पू. प. कर्मधारय स. & तदर्धार्धाक्षरम्- a quarter of a letter- तद्- that, अर्धम्- half, अर्धस्य अर्धम्- अर्धार्धम्- a half of a half- a quarter, तस्य अर्धार्धम्- तदर्धार्धम्- both ष. तत्पुरुष स. & तदर्धार्धम् अक्षरम्- तदर्धार्धाक्षरम्- वि. पू. प. कर्मधारय स., दानाध्ययनकर्मभिः- in न. लिं. तृ. वि. ब. व. of

दानाध्ययनकर्मन्- work of charity and study- दानम्- न. लिं.- giving, donation, charity, अध्ययनम्- study, learning, कर्मन्- न. लिं.- task, work, duty- दानम् च अध्ययनम् च- दानाध्ययनम्- द्वंद स. & दानाध्ययनस्य कर्मन्- दानाध्ययनकर्मन्- ष. तत्पुरुष स., दिवसम्- a day & अवन्ध्यम् (=अबन्ध्यम्)- productive, fruitful, worthwhile- बन्ध्य- to be bound, detained, unproductive, barren, useless- adjctv- बन्ध्य (also बन्धनीय & बन्धितव्य)- क. वि. धा. सा. वि. of बन्ध्- बध्नाति ९ ग. प. प. to bind, tie, stop, suppress- न बन्ध्यम्- अबन्ध्यम्- नञ् तत्पुरुष स., कुर्यात्- विध्यर्थ प्र. वि. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, वा- or, and- अव्यय

**धनहीनो न हीनश्च धनिकः स सुनिश्चय।**
**विद्यारत्नेन हीनो यः स हीनः सर्ववस्तुषु**॥१०.१॥

धनहीनः, (यदि सः विद्यया भूषितः अस्ति तदा सः) हीनः च न (अस्ति)। सः धनिकः सुनिश्चयः (अस्ति)। यः विद्यारत्नेन हीनः(अस्ति), सः सर्ववस्तुषु हीनः (एव भवति)॥

A poor person is not a destitute (if he is well educated). He is undoubtedly wealthy. (On the other hand), one devoid of jewel called knowledge is indeed deprived of all the things.

हीनः- a destitute, deficient, one who is devoid of or deprived of a thing- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to abandon, leave, give up, धनहीनः- one who is devoid of money, wealth, poor- धनम्- money, wealth, धनेन हीनः- तृ. तत्पुरुष स., धनिकः- a wealthy or resourceful person, सुनिश्चयः- very certainly, undoubtedly- सु- अव्यय- prefix implies: very, most, निश्चयः- certainly, definitely, यः (यद्)- who, सः -(तद्)- he- all in पु. लि. प्र. वि. ए. व., सर्ववस्तुषु- in न. लि. स. वि. ब. व. of सर्ववस्तु- all objects- सर्व- adjctv- all entire, वस्तु- article, object, item, विद्यारत्नेन- in न. लि. तृ. वि. ए. व. of विद्यारत्नम्- a jewel called Knowledge- विद्या- Knowledge, learning, रत्नम्- jewel, gem- विद्या रत्नम् इव-उपमान उ.प.कर्मधारय स.,च-and, न-no, not- both अव्यय

**सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत्सुखम्।**
**सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्**॥१०.३॥

(विद्यार्थी) सुखार्थी चेत्, (सः) विद्यां त्यजेत्। विद्यार्थी चेत्, (सः) सुखं त्यजेत्। सुखार्थिनः (विद्यार्थिनः) कुतः विद्या (लभते)? विद्यार्थिनः कुतः सुखं (लभते)?

A student, who wants to pursue happiness, should abandon seeking knowledge. A seeker of knowledge should forgo happiness (during student life). How can a student who wants to pursue (only) happiness gain knowledge? How can a student seeking great education also have comforts (during student life)?

*When a boy or a girl starts school, we do the thread ceremony -उपनयन or व्रतबन्ध. During the next 12 years, he or she is supposed to follow a strict code of conduct (व्रत) to gain a good education. With great education, he or she can pursue activities that bring happiness during the life as a married householder- ग्रहस्थाश्रम.*

सुखार्थी (सुखार्थिन्)- one , who is seeking to enjoy life, to be happy- सुखम्- न. लिं- joy, happiness, अर्थिन्- seeking a gain, obtain- सुखस्य अर्थिन् - षष्ठी तत्पु. विद्यार्थी (विद्यार्थिन्)- seeker of knowledge, learning, expertise- विद्या- स्त्री. लिं- knowledge, learning, expertise- विद्यायाःअर्थिन् - षष्ठी तत्पु स., सुखार्थिनः & विद्यार्थिनः- both in ष. वि. ए. व. of सुखार्थिन् & विद्यार्थिन्, विद्या & विद्याम्- in स्त्री. लि. प्र. वि & द्वि. वि. ए. व. of सुखम् & सुखम्- in न. लि. प्र. वि & द्वि. वि. ए. व., त्यजेत्- विध्यर्थ प्र. वि. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, कुतः (कुतस्)- from where, how, in what manner & चेद्- if, provided that, in case- both अव्यय

**कामं क्रोधं तथा लोभं स्वादं शृङ्गारकौतुके।**
**अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत्**॥११.१०॥

विद्यार्थी कामं, क्रोधं, तथा लोभं, स्वादं, शृङ्गारकौतुके, अतिनिद्रातिसेवे च अष्ट हि वर्जयेत्॥

A seeker of knowledge (a student) should avoid following eight things namely, desire/lust, anger, greed, relishing food, passion for dressing, impatience, too much sleep and excessive indulgence..

विद्यार्थी (विद्यार्थिन्)- a student, seeker of knowledge- विद्या- education, knowledge, learning, अर्थिन्- seeker, one who is desirous- विद्यायाः अर्थिन् - विद्यार्थिन्- ष. तत्पुरुष स.- in पु. लिं. प्र. वि. ए. व., कामम्, क्रोधम्, लोभम् & स्वादम्- all in पु. लिं. द्वि. वि. ए. व. of कामः- desire, wish, lust, क्रोधः- anger, wrath, लोभः- greed, covetousness & स्वादः- taste, flavour, relishing of food, शृङ्गारः- art of dressing, passion for dress, sentiment of love, कौतुकम्- curiosity, passion, impatience excessive eagerness- शृङ्गारः च कौतुकम् च- शृङ्गारकौतुकम् - द्वन्द्व स .- passion for dress and excessive eagerness in anything & अतिनिद्रातिसेवे- an habit of over sleeping and overdoing any service- both in द्वि. वि. द्वि. व. & both द्वंद्व स, अष्ट- eight- in पु. लिं. द्वि. वि. ब. व., वर्जयेत्- विध्यर्थ प्र. पु. ए. व. of वृज्- वर्जयेति- ते १० ग. उ. प. to shun, avoid, give up, abandon, हि- surely, indeed, also, च- and- both अव्ययs, सेवा - service, worship

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च**॥१२.२२॥

घटः जलबिन्दुनिपातेन क्रमशः पूर्यते। सः सर्वविद्यानां धर्मस्य च धनस्य च हेतुः (अस्ति)॥

A pot is filled by successive fall of water drops (over time). That is the way of acquiring all types of knowledge, Dharma and wealth.

घटः, सः & हेतुः- पु. लिं. प्र. वि. ए. व. of घट- pot, तद्- that, it & हेतु- cause, reason, means, क्रमशः- अव्यय- regularly, successively, gradually, जलबिन्दुनिपातेन- न. लिं. तृ. वि. ए. व. of जलबिन्दुनिपात- fall of water drops- जल- न. लिं.- water, बिन्दु- पु. लिं.-drop, निपात- fall, descent- (नि+पत्- पतति १ ग. प. प. to fall)- जलस्य बिन्दुः- जलबिन्दुः -जलबिन्दोः निपातः- जलबिन्दुनिपातः - both ष. तत्पुरुष स., पूर्यते- वर्त. प्र. पु. ए. व. of पूर्- ४ ग. आ. प. to fill, fill out, सर्वविद्यानाम्- स्त्री. लिं. ष. वि. ब. व. of सर्वविद्या- all knowledge, education, learning- सर्व- all, entire, विद्या- knowledge, education, learning- सर्वा विद्या- सर्वविद्या- कर्मधारय स., धर्मस्य & धनस्य- पु/न. लिं. ष. वि. ए. व. of धर्म- good code of conduct, religion & धन- wealth, money, च-and as well

**खनित्वा हि खनित्रेण भूतले वारि विन्दति।**
**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति**॥१३.१६॥

(यथा नरः) खनित्रेण खनित्वा हि भूतले वारि विन्दति, तथा शुश्रूषुः (विद्यार्थी) गुरुगतां विद्याम् अधिगच्छति॥

Just as a man digging ground with a spade (eventually) encounters water, a deeply attentive student acquires knowledge mastered by his teacher.

नरः- a person, man, शुश्रूषुः- adjctv- desirous to serve/attend/ listen, खनन्- digging- कर्तरि वर्त. का. धा. सा. वि. of खन्- खनति- ते १ ग. उ. प. to dig, excavate- all in पु. लिं. प्र. वि. ए. व., खनित्वा- पू. का. वा. धा. सा अव्यय of खन्- to dig, खनित्रेण- in न. लिं. तृ. वि. ए. व. of खनित्रम्- spade, वारि- water- न. लिं. द्वि. वि. ए. व. विन्दति & अधिगच्छति- both वर्त. प्र. पु. ए. व. of विद्- विन्दति- ते ६ ग. उ. प. to get, obtain, acquire & अधि+ गम्- to acquire, approach, meet- (गम्- गच्छति १ ग. प. प. to go), गुरुगताम् & विद्याम्- both in स्त्री. लिं. द्वि. वि. ए. व. of गुरुगता- that, which has been mastered by the teacher/Guru- गुरुः- teacher/Guru, elder, father, preceptor, गत- adjctv- gone, available with, acquired- क. भू. धा. वि. of गम्- गच्छति- गुरौ गता या सा- गुरुगता- बहुव्रीहि स. & विद्या- knowledge, expertise, learning, भूतले- पु. लिं. स. वि. ए..व. of भूतलः- surface of the earth-भूः- स्त्री. लिं- earth, land, तलः- surface- भुवः तलः- ष. तत्पुरुष स., यथा- like which, as, तथा- like that, similar to, हि- alone, only surely, merely- all अव्यय

**एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्।**
**पृथिव्यां नास्ति तद्द्रव्यं यद् दत्त्वा चानृणी भवेत्**॥१५.२॥

यः गुरुः एकम् एव अक्ष**रं** तु शिष्यं प्रबोधयेत्, पृथिव्यां तद् द्रव्यम् न अस्ति, यद् दत्त्वा (सः शिष्यः) च अनृणी भवेत् ॥

There is no wealth in this world, by giving which the student becomes debt free of his Guru (Teacher), who has taught him even a single letter of the alphabet.

यः, गुरुः, अनृणी, द्रव्यम् , यद्, तद् - all प्र. वि. ए. व. of यद्-(पु. लि. )-who, गुरु- (पु. लि. )-teacher अनृणिन् (पु. लि. )- one who is debt free -(न ऋणम् -अनृणम्- नञ्तत्पुरुष स.), द्रव्य-wealth, यद्-which- तद्- that- all न. लिं., एकम्, अक्षरम् & शिष्यम्, -द्वि. वि. ए. व. of एक- one, single, अक्षर- letter, alphabet- both -न. लिं. & शिष्य- student -पु. लि., एव- just, just so, तु- as to, but, as for, even , प्रबोधयेत् - विध्यर्थ प्र. पु. ए. व. of प्रयोजक of प्र+बुध्-to awaken, to make known- (बुध्-१ ग. उ. प. बोधति-ते & ४ ग. आ. बुध्यते- to know, comprehend, भवेत् - विध्यर्थ प्र. पु. ए. व of भू- भवति १ ग.प.प. to become, to happen दत्त्वा-पू. का. वा. त्वान्त धा. सा. अव्यय-of दा-यच्छति १ ग. प. प. & दा-ददाति-दत्ते-३ ग उ. प.- to give, grant, च-and, also पृथिव्याम्- स्त्री. लिं. स. वि. ए. व. of of पृथिवी - the world, earth, न-no, not, अस्ति- वर्त. तृ. पु. ए. व. of अस्- to be, to exist.

## *4.4 Educated Class (द्विजाः)*

During Cāṇakya's time, the Varṇa (वर्ण) system was well established. The Brāhmaṇas (ब्राह्मण) were the priestly class, educated in the Vedic literature. The Kṣtriya (क्षत्रिय) and Vaiśya (वैश्य) were trained warriors and merchants respectively. All three classes were called Dvijas (द्विजाः) twice born - first by natural birth and second after the thread ceremony. However, the term Dvija was more specifically referred to Brāhmaṇa class only. In broader sense, द्विजाः refers to educated people in the society.

**आर्तेषु विप्रेषु दयान्वितः च**
**श्रद्धेन यः स्वल्पमुपैति दानम्।**
**अनन्तपारं समुपैति दानं**
**यद्दीयते तन्न लभेद् द्विजेभ्यः**॥१२.२॥- त्रिष्टुभ

यः दयान्वितः आर्तेषु विप्रेषु श्रद्धेन स्वल्पं दानम् उपैति चेत्, (सः), यद् द्विजेभ्यः दीयते तद् दानं (हि) न लभेद्, (अपि तु) अनन्तपारं समुपैति॥

The compassionate person who gives even a small donation with sincerity to poor but learned men, not only receives back what was given but many times more than that was given to those wise men.
यः (यद्)-who, दयान्वितः- दया- compassion, sympathy, pity, अन्वित- struck with, possessed of, having- क. भू. धा. वि. of अनु+ इ- to follow, conform- (इ- एति २ ग. प. प. to go, come to)- both in पु. लिं. प्र. वि. ए. व., आर्तेषु & विप्रेषु- both in पु.

लिं. स. वि. ब. व. of आर्त- adjctv- afflicted, struck by, suffering, distressed & विप्रः- a member of the priestly class, Brahmin, a learned man, श्रद्धेन- in न. लिं. तृ. वि. ए. व. of श्रद्ध- faith, belief, conviction, स्वल्पम्- little bit, small, दानम्- giving in charity & अनन्तपारम्- very much more, multifold- अन्त- end, finish, न अन्त- अनन्त- endless, infinite, पारम्- limits, beyond- अनन्तस्य पारम्- ष. तत्पुरुष स.- all in न. लिं. द्वि. वि. ए. व., उपैति & समुपैति- both वर्त. प्र. पु. ए. व. of उप+ इ- to receive, get & सम् +उप + इ- to receive back, get back, द्विजेभ्यः- in पु. लिं. पञ्चमी वि. ब. व. of द्विजः- a member of the priestly class, Brahmin, learned man, यद्- what, which, दानम्- giving in charity & तद्- that, it- all in न. लिं. प्र. वि. ए. व., दीयते- कर्मणि प्रयोग प्र. पु. ए. व. of दा- यच्छति १ ग. प. प. to give, grant, लभेद्- विध्यर्थ प्र. पु. ए. व. of लभ्- लभते १ ग. आ. प. to get, receive, चेत्- in case, if, न- no, not- both अव्यय, श्रद्धेन- in स्त्री. लिं. तृ. वि. ए. व. to be corrected to- in न. लिं. तृ. वि. ए. व. of श्रद्ध - faith, belief, conviction

**धन्या द्विजमयी नौका विपरीता भवार्णवे।**
**तरन्त्यधोगताः सर्वे उपरिस्थाः पतन्त्यधः**॥१५.१३॥

(एता) द्विजमयी नौका धन्या (अस्ति)। (सा) भवार्णवे विपरीता (भवति), (यतः तस्याः) अधोगताः सर्वे तरन्ति (तथा तस्याः) उपरिस्थाः अधः पतन्ति॥

This ship, composed of Brahmins, is indeed a blessed one! It works in an opposite manner in this ocean of the worldly life! Those who stay under her, float safely, while those who try to stay over her sink (to the bottom).

*In the caste system, the verse meant to say that one should be under the direction or command of Brahmins; otherwise they would be doomed in this life. If we expand that meaning to "educated class", the message is still valid. Well educated, under the graduation cap (नौका) will easily enjoy the worldly life; those who trample it, will have hard time. This is so true, even today. I would change द्विजमयी to विद्यामयी to make it more universal!*

द्विजमयी- one formed by members of upper three classes द्विजः- twice-born- word used for a Brahmin, a member of a priestly class, a scholar well versed in scriptures- (द्विवारं जन्म यस्य सः- द्विजः- बहुव्रीहि स.), मय/मयी- adjctv- an affix used to indicate 'made of', 'consisting or composed of', 'full of'- द्विजैः मयी या. सा- बहुव्रीहि स., नौका- boat, ship, धन्या- blessed or fortunate one, lucky, विपरीता- adverse, acting in opposite way, contrary manner- विपरीत- क. भू. धा. वि. of वि+ परि+ इ- to act in contrary way- (इ- एति २ ग. प. प. to go, to reach)- all in स्त्री. लिं. प्र. वि. ए. व., भवार्णवे- in पु. लिं. स. वि. ए. व. of भवार्णवः- the ocean of worldly life- भवः- worldly life, worldly existence, अर्णवः- ocean, sea- भवः अर्णवः इव- उ. उ. प. कर्मधारय स., तरन्ति & पतन्ति- वर्त. प्र. पु. ब. व. of तॄ- तरति १ ग. प. प. to cross over, float, to go to the end of & पत्- पतति १ ग. प. प.

to fall, fall down, अधोगताः, सर्वे & उपरिस्थाः- all in पु. लिं. प्र. वि. ब. व. of अधोगतः- one who has gone down- अधः (अधस्)- अव्यय- below, down, गतः- gone, situated in- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. to go, to move in- अधः गतः यः सः- अधोगतः- बहुव्रीहि स., सर्वः- all, everyone & उपरिस्थः- one who has stayed on the top- उपरि- अव्यय- above, over, upon- उपरि तिष्ठति- उपरिस्थः- उपपद तत्पु स.

**दूतो न सञ्चरति खे न चलेच्च वार्ता**
**पूर्वं न जल्पितमिदं न च सङ्गमोऽस्ति।**
**व्योम्नि स्थितं रविशशिग्रहणं प्रशस्तं**
**जानाति यो द्विजवरः स कथं न विद्वान्**॥९.५॥ -शक्करी

खे दूतः न सञ्चरति, पूर्वं वार्ता न चलेत् च इदं न जल्पितं, सङ्गमः न च अस्ति। यः द्विजवरः व्योम्नि स्थितं रविशशिग्रहणं प्रशस्तं जानाति, सः कथं न विद्वान् (स्यात्)?

An emissary is not roaming around the sky. There is no prior news, nor is anyone talking about it. There is no contact with anyone. Is it not that the highly educated person is very brilliant, who predicts the eclipses of the Sun and the Moon up in the sky?

*This* Subhāṣita *suggests that even before 300 BCE, the astronomical science was well developed in India to predict the eclipses of the Sun and the Moon.*

खे & व्योम्नि- both in न. लिं. स. वि. ए. व. of खम् & व्योमन्- sky, दूतः- messanger, envoy, सङ्गमः- meeting, union, association, यः (यद्)- who, सः (तद्)- he, द्विजवरः- the best among the brahmin or learned class- द्विजः- normally a brahmin, a member of priestly class, वरः- best excellent, finest- द्विजेषु वरः- द्विजवरः- स. तत्पुरुष स., विद्वान्-(विद्वस्)- a learned person, intellectual, scholar- all in पु. लिं. प्र. वि. ए. व., सञ्चरति, जानाति & अस्ति- all in वर्त. प्र. पु. ए. व. of सं+ चर्- to move about, roam- (चर्- चरति १ ग. प. प. to walk, go, roam, ज्ञा- जानाति, जानीते- ९ ग. उ. प. to know, understand & अस्- २ ग. प. प. to be, to exist, वार्ता- information, news- in स्त्री. लिं. प्र. वि. ए. व., चलेत्- विध्यर्थ प्र. पु. ए. व. of चल्- चलति १ ग. प. प. to go, move, stir, set out, इदम्- this, it & जल्पितम्- said, spoken, conversed- जल्पित- क. भू. धा. वि. of जल्प्- जल्पति १ ग. प. प. to speak, say, utter- both in न. लिं. प्र. वि. ए. व., स्थितम्- located, standing, staying- स्थित- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stand, stay, be located, रविशशिग्रहणम्- eclipse of the Sun and Moon, रविः- sun, शाशिन्- moon, ग्रहणम्- seizure, eclipse, रविः च शशि च- रविशशिनौ- द्वंद्व स.& रविशशिनोः ग्रहणम्- रविशशिग्रहणम्- ष. तत्पुरुष स. & प्रशस्तम्- commendable, praiseworthy- प्रशस्त- क. भू. धा. वि. of प्र+ शंस्- to praise, extol, command (शंस्- शंसति to praise, extol)- all in न. लिं.

द्वि. वि. ए. व., पूर्वम्- before hand, previously, formerly, च- and, कथम्- how, what way, न- no, not- all अव्यय

**प्रातर्द्यूतप्रसङ्गेन मध्याह्ने स्त्रीप्रसङ्गतः।**
**रात्रौ चौरप्रसङ्गेन कालो गच्छन्ति धीमताम्**॥९.११॥

धीमतां काल: प्रात: द्युतप्रसङ्गेन, मध्याह्ने स्त्रीप्रसङ्गतः, रात्रौ चौरप्रसङ्गेन गच्छन्ति॥

Wise men spend their mornings in gambling, mid day from activities with women and the night by stealing!

*Really? No, this verse has a different meaning.*

*The first event refers to the gambling of King Yuddhisthira in Mahābhāraṭa. The second event refers to Sītā, the consort of Lord Rāma taken away forcibly by Rāvaṇa.The third event hints at the adorable childhood pastimes of Sri Kṛṣṇa who stole butter from the cowherd ladies of Gokula. Thus, wise persons spend the morning absorbed in Mahābhārata, the afternoon in studying Rāmāyaṇa and the evening by devotedly listening to the Srimad-Bhāgvatam.*

धीमताम् - ष. वि. ब. व of धीमत्-पु. लिं. a wise man, काल:- Time, प्रात: -adverb- in the morning,प्रसङ्ग - पु. लिं. - episode, occasion, time. द्युत- पु. लिं - gambling, द्युतप्रसङ्गः, चौरप्रसङ्गः, स्त्रीप्रसङ्गः - द्युतस्य, चौरस्य, स्त्रिय: प्रसङ्गः - All ष. तत्पुरुष स. द्युतप्रसङ्गेन, चौरप्रसङ्गेन - तृ . वि. ए. व. of द्युतप्रसङ्गः, चौरप्रसङ्गः, प्र स्त्रीप्रसङ्गतः - पं वि. ए. व. of स्त्रीप्रसङ्ग ,अहन् - न.पु.- a day, मध्याह्ने -स. वि. ए. व. of मध्यान्हः - पु. लिं-Noon, mid day, तः (तस्)- suffix implies पं. वि. - from, by, रात्रौ - स. वि. ए. व of रात्रि (स्त्री.) गच्छन्ति- प्र. पु. ब. व.of गम्- गच्छति १ ग. प. प. to go

**मातृवत् परदारेषु परद्रव्येषु लोष्टवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः**॥१२.१४॥

पाठभेद: मातृवत् परदाराणि परद्रव्याणि लोष्ठवत्। आत्मवत् सर्वभूतानि वीक्ष्यन्ते धर्मबुद्धयः॥

यः परदारेषु मातृवत्, परद्रव्येषु लोष्टवत्, सर्वभूतेषु आत्मवत्, पश्यति, सः पण्डितः (भवति)॥
(पाठभेद:. धर्मबुद्धयः परदाराणि मातृवत्, परद्रव्याणि लोष्ठवत्, सर्वभूतानि आत्मवत् वीक्ष्यन्ते॥)

One, who looks at others' wife as his mother, treats others' wealth as mere lumps of earth and all living beings as his own self, is indeed a wise man.

Alternate: Men, who follow strict codes of conduct (Dharma), look at others' wife as his mother, treat others' wealth as lumps of clay and consider all living beings as his own self.

यः, सः & पण्डितः -all पु. लिं. प्र. वि. ए. व. of यद्-who, which person, तद्-he & पण्डित- wiseman, intelligent person, परदारेषु, परद्रव्येषु & सर्वभूतेषु -स. वि. ब . व. of परदारा- wives of others-दारा-wife-स्त्री. लिं.-always plural- पर-adjctv-other, another, different- पराणाम् दारा- षष्ठी तत्पुरुष स., परद्रव्य- wealth of others-द्रव्यम्-wealth-न. लिं.- पराणाम् द्रव्यम्- षष्ठी तत्पुरुष स. & सर्वभूत-all living being-सर्व- entire, all, भूत-any living being- सर्वाणि भूतानि - कर्मधारय स., मातृ-mother, लोष्ट-lump, lump of earth, आत्मन्- पु. लि. -self, one's own, वत्-adjctv-an affix added to nouns indicates likeness, similarity, पश्यति-वर्त. प्र. पु. ए. व. of दृश्-१ ग. प. प. to see, look at

★★★★★★

## Chapter 5 - About Wealth (संपत्तिः)

As described in the first chapter, Artha (अर्थ) is one of the key objectives of human life. It directs a householder to earn sufficient wealth to support a family. In this chapter, Cāṇakya discusses the advantages of being wealthy and how to use wealth properly and its disposition.

**यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।**
**यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पण्डितः**॥६ .५॥

यस्य अर्थाः (सन्ति) तस्य मित्राणि (भवन्ति) यस्य अर्थाः (सन्ति) तस्य बान्धवाः (भवन्ति)। यस्य अर्थाः (सन्ति, सः लोके पुमान् (भवति)। यस्य अर्थाः (सन्ति), सः च पण्डितः (भवति)॥

A person of wealth has (plenty of friends). One with money has (lots of) relatives. One with riches is considered a real man. One with all resources is also an intelligent person.

यस्य- whose, who has & तस्य- for him, with him- both in पु. लिं. ष. वि. ए. व. यद्- who & तद्- he, अर्थाः & बान्धवाः- both in पु. लिं. प्र. वि. ब. व. of अर्थः- wealth, money, resource, riches & बान्धवः- a kinsman, relative, friend, brother, मित्राणि- in न. लिं. प्र. वि. ब. व. of मित्रम्- a friend, पुमान् (पुंस्)- a man, a male, a real person, सः (तद्)- he & पण्डितः- an intelligent person, expert, wise-man- all in पु. लिं. प्र. वि. ए. व., लोके- in the world/ among the people- in पु. लिं. स. वि. ए. व. of लोकः- world, people, जीवति- वर्त. प्र. पु. ए. व. of जीव्- १ ग. प. प. to live, to be alive,to survive, च- and-अव्यय

**सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम्।**
**न च तद्धनलुब्धानामितश्चेतश्च धावताम्**॥७.३॥

शान्तचेतसां, सन्तोषामृततृप्तानां (मनुष्याणां), यत् सुखं (लभते), तद् (सुखं) धनलुब्धानाम् इतः च इतः च धावतां न च (लभते)॥

The happiness of those with tranquil mind and of those who drink nectar of contentment is unavailable to those who run around here and there (in search of happiness) and those who are greedy about wealth.

सन्तोषामृततृप्तानाम्, शान्तचेतसाम्, धावताम् & धनलुब्धानाम्- all in पु. लिं. ष. वि. ब. व. of सन्तोषामृततृप्तः- one who is fully contented with nectar of happiness- सन्तोष- joy, happiness, satisfaction, अमृत- nectar, drink of immortality, तृप्तः- satisfied, contented- क. भू. धा. वि. of तृप्- तृप्यति- तृप्नोति & तृपति ४, ५ & ६ ग. प.

प. to be pleased, satisfied, contented- सन्तोषम् अमृतम् इव - सन्तोषामृतम्- उपमान उत्तर प. कर्मधारय स. & सन्तोषामृतेन तृप्तः- सन्तोषामृततृप्तः- तृ. तत्पुरुष स., शान्तचेतस्- one with a calm mind- शान्त- appeased, calm, tranquil- क. भू. धा. वि. of शम्- शाम्यति ४ ग. प. प. to be call & चेतस्- न. लिं.- thinking soul, consciousness, mind- शान्तम् चेतः यस्य सः- शान्तचेतस्- बहुव्रीहि स., धावत्- running, going after- कर्तरि वर्त. का. वा. धा. सा. वि. of धाव्- धावति १ ग. प. प. to run & धनलुब्धः- one who is greedy after wealth- धनम्- wealth, money, लुब्धः- greedy, desirous of, covetous- क. भू. धा. वि. of लुभ्- लुभ्यति ४ ग. प. प. to cover, long for- धनाय लुब्धः- धनलुब्धः- च. तत्पुरुष स., यत्- which, what, सुखम्- satisfaction, happiness, तद्- that- all in न. लिं. प्र. वि. ए. व., इतः (इतस्)- from here, hence, in this direction, च- and- इतः च इतः च- here and there, all around, न- no, not- all अव्यय

**उपार्जितानामर्थानां त्याग एव हि रक्षणम्।**
**तडागोदरसंस्थानां परीवाह इवाम्भसाम्**॥७ १४॥

तडागोदरसंस्थानाम् अम्भसां परीवाहः इव, उपार्जितानाम् अर्थानाम् त्यागः एव हि रक्षणं (भवति)॥

The quality of water in ponds is improved by natural overflow. Similarly, the earned riches are preserved by giving (them for the welfare of the society).

तडागोदरसंस्थानाम्, अम्भसाम्, उपार्जितानाम् & अर्थानाम्- all in न. लिं. ष. वि. ब. व. of तडागोदरसंस्थम्- collected water in a pool, tank- तडाग- a pool, tank, उदर- cavity, inside of anything, belly, संस्थम्- adjctv- staying, existing, stationary- (स्था- तिष्ठति १ ग. प. प. to stay) तडागस्य उदरम्- तडागोदरम्- ष तत्पुरुष स., तडागोदरे संस्थम्- तडागोदरसंस्थम्- स. तत्पुरुष स., अम्भस्- water, उपार्जित- earned, acquired, gained- क. भू. धा. वि. of उप+ अर्ज्- (अर्ज्- अर्जति १ ग. प. प. to procure, earn), अर्थ- wealth, riches, money, परीवाहः (परिवाहः)- natural overflow & त्यागः- giving up, to let go- both- पु. लिं. प्र. वि. ए. व., इव- अव्यय- like, in a same way as, एव- अव्यय- only, just, alone, हि- अव्यय- surely, indeed, रक्षणम्- न. लिं. प्र. वि. ए. व. of रक्षण- protection,

**अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।**
**उत्तमा मानमिच्छन्ति मानो हि महतां धनम्**॥८.१॥

अधमाः (नराः) धनम् इच्छन्ति। मध्यमाः धनं मानं च (इच्छन्ति)। उत्तमाः मानम् इच्छन्ति। मानः हि महतां (नराणां) धनं (भवति)॥

The mean people go after wealth alone, while the moderate ones desire for wealth and respect. However, the best among them strive for their honour. Self-respect alone is the real wealth of noble people.

अधमाः, मध्यमाः & उत्तमाः- पु. लिं. प्र. वि. ब. व. of अधमः- adjctv- the lowest, meanest, मध्यमः- adjctv- the middle one, intermediate, moderate & उत्तमः- adjctv- the excellent, best, one at the top, मानः- पु. लिं respect, honour, pride & धनम्- न. लिं- wealth, money, treasure- both in प्र. वि. ए. व. & also धनम् & मानम्- both in द्वि. वि. ए. व., इच्छन्ति वर्त. प्र. पु. ब. व. of इष्- इच्छति ६ ग. प. प. to desire, long for, want, महताम्- पु. लिं. ष. वि. ब. व. of महत्- afjctv- the great, big, noble, high, च- and & हि- indeed, surely, truly- both अव्यय

**वित्तं देहि गुणान्वितेषु मतिमन्नान्यत्र देहि क्वचित्**
**प्राप्तं वारिनिधेर्जलं घनमुखे माधुर्ययुक्तं सदा।**
**जीवान्स्थावरजङ्गमांश्च सकलान्संजीव्य भूमण्डलं**
**भूयः पश्य तदेव कोटिगुणितं गच्छन्तमम्भोनिधिम्**॥८.४॥शार्दूल विक्रीडित

मतिमन्, गुणान्वितेषु वित्तं देहि, न अन्यत्र क्वचित् देहि। वारिनिधेः जलं घनमुखे माधुर्ययुक्तं प्राप्तं, सदा सकलान् स्थावरजङ्गमान् जीवान् भूमण्डलं च संजीव्य, तद् भूयः एव कोटिगुणितम् अम्भोनिधिं गच्छन्तं पश्य॥

Oh Wise-one! Give the wealth to virtuous people only; never give it to anybody else. The (saline) water obtained from the ocean, sweetened in the cloud's mouth, supports the life (through rains) of the entire world of mobile and immobile beings. Then see it goes back again to the ocean, multiplied in millions of different ways!

*Proper distribution of wealth benefits lots of people and still is returned back to the donors in multiple ways.*

मतिमन्- पु. लिं. सं. वि. ए. व. of- मतिमन्- wise or Knowledgeable person, गुणान्वितेषु- पु. लिं. स. वि. ब. व. of गुणान्वित्- endowed with wisdom- गुण- quality, virtue, अन्वित- endowed with, possessed of- क. भू. धा. वि. of अनु+ इ- (इ- एति २ ग. प. प. to go)- गुणेन अन्वितः यः सः - बहुव्रीहि स., वित्तम्- money, wealth, जलम्- water, प्राप्तम्- got, received- क. भू. धा. वि. of प्र+आप्- (आप्- आप्नोति ५ ग. प. प. to get), माधुर्ययुक्तम्- full of sweetness- माधुर्य- sweetness, युक्तम्- comprised of- क. भू. धा. वि. of युज्- युनक्ति- युंक्ते ७ ग. उ. प. to add, furnish- माधुर्येण युक्तम्- तृ. तत्पुरुष स., कोटि- स्त्री. लिं.- a crore, गुणितम्- multiplied, increased- गुणित- क. भू. धा. वि. of गुण्- गुणयति- ते १० ग. उ. प. to multiply- कोट्या गुणितम्- तृ. तत्पुरुष स., अम्भोनिधिम्- ocean- अम्भस्- न. लिं.-water, निधि- source, treasure- अम्भसः निधिम्- ष. तत्पुरुष स., तद्-that, it & भूमण्डलम्- universe- भू- स्त्री. लिं.- earth, मण्डलम्- group, multitude- भुवः मण्डलम्- ष. तत्पुरुष स.- all in न. लिं. द्वि. वि. ए.

व., देहि & पश्य- आज्ञार्थ म. पु. ए. व. of दा-यच्छति १ ग. प. प. & ददाति- दत्ते ३ ग. उ. प. to give & दृश्- पश्यति १ ग. प. प. to see, look, वारिनिधेः- पु. लि. ष. वि. ए. व. of वारिनिधि- ocean, sea- वारि- न. लि. water & निधि- treasure, source- वारिणः निधिः- तृ. तत्पुरुष स., घनमुखे- स. वि. ए. व. of घनमुख- through the cloud, घन- cloud & मुख- mouth- घनस्य मुखम्- ष. तत्पुरुष स., सकलान्, स्थावरजङ्गमान् & जीवान्- पु. लिं. द्वि. वि. ब. व. of सकल- entire, all, स्थावरजङ्गम- immobile and mobile- स्थावर- immobile, जङ्गम- mobile- स्थावरम् च जङ्गमम् च- द्वंद्व स., & जीव- living being, न- no, not, क्वचित् (कः+ चित्)- sometimes- न क्वचित्-never, अन्यत्र- elsewhere, संजीव्य- after restoring life, rejuvenating - पू. का. वा. ल्यबन्त धा. सा. अव्यय of सं+ जीव्- (जीव्- जीवति १ ग. प. प. to live), सदा always, च-and, भूयः (भूयस्)- exceedingly, greatly, & एव- just, alone-अव्यय

**क्षीयन्ते सर्वदानानि यज्ञहोमबलिक्रियाः।**
**न क्षीयते पात्रदानमभयं सर्वदेहीनाम्**॥१६ १४॥

सर्वदेहीनां, सर्वदानानि (तथा) यज्ञहोमबलिक्रियाः क्षीयन्ते, (परन्तु) पात्रदानं (तथा) अभयं न क्षीयते॥

{Meritorious credits (पुण्यम्) earned through} philanthropy and sacrificial offerings diminish over time. However, the credit earned by helping any deserving person and the protection offered to any living being is never diminished.

सर्वदेहीनाम्- पु. लिं. ष. वि. ब. व. of सर्वदेहिन्- every living being- सर्व- every, देहिन्- living being- सर्वः देही- सर्वदेहिन्- वि. पु. प. कर्मधारय स., सर्वदानानि- all kinds of charities- न. लिं. प्र. वि. ब. व. of सर्वदान- सर्व- all, every, entire, दान- charity, donation- सर्वम् दानम्- सर्वदानम्- कर्मधारय स., यज्ञहोमबलिक्रियाः- all types of sacrificial offerings during Yajna-Yagas- स्त्री. लिं. प्र. वि. ब. व. of यज्ञहोमबलिक्रिया- यज्ञ- पु. लिं- sacrificial rite, an act of worship, होम- पु. लिं- consecrated fire for offerings to Gods, बलि- offering, oblation, क्रिया- स्त्री. लिं.- doing, action, activity- यज्ञः च होमः च बलिः च - यज्ञहोमबलिः- द्वंद्व स. & यज्ञहोमबलीनाम् क्रिया- यज्ञहोमबलिक्रिया- ष. तत्पुरुष स., क्षीयन्ते & क्षीयते- कर्मणि प्रयोग प्र. पु. ब. व. & ए. व. of क्षि- १, ५ & ९ ग. प. प.- क्षयति, क्षिणोति & क्षिणाति to diminish, reduce, decay, ruin, पात्रदानम्- charity done to deserving- पात्र- deserving, worthy, दानम्- donation, grant, charity- पात्रेभ्यः दानम्- पात्रदानम्- च. तत्पुरुष स., अभयम्- removal of fear, protection from fear, security, safety- भय-fear, danger- न भयम्- अभयम्- नञ् तत्पुरुष स.- न. लिं. प्र. वि. ए. व., न- no, not

**अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति।**
**प्राप्ते एकादशे वर्षे समूलं तद्विनश्यति**॥१५.६॥

(मनुष्यस्य) अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति। तद् (द्रव्यं), प्राप्ते एकादशे वर्षे, समूलं विनश्यति॥

Improperly acquired wealth may last ten years. That wealth, along with its source, will be destroyed once it reaches eleven years.

*A person who earns wealth improperly will eventually lose it.*

अन्यायोपार्जितम्- one that is acquired by improper, unjust means- न्यायः- justice, method, righteousness- न न्यायः- अन्यायः- unlawful, improper- नञ् तत्पुरुष स., उपार्जितम्- earned, acquired, gained- उपार्जित- क. भू. धा. वि. of उप+ अर्ज्- to procure, acquire- (अर्ज्- अर्जति १ ग. प. प. to take up, gain, secure)- अन्यायेन उपार्जितम्- अन्यायोपार्जितम्- तृ. तत्पुरुष स., द्रव्यम्- wealth, property, money, समूलम्- along with roots, completely- मूलम्- root, origin, extremity of anything- मूलेन सह- समूलम्- सहबहुव्रीही स. & तद्- that, it- all in न. लिं. प्र. वि. ए. व., दशवर्षाणि- in न. लिं. प्र. वि. ब. व. of दशवर्षम्- ten years- दशन्- ten, वर्षम्- year- दषाणां वर्षाणां समाहारः- द्विगु स., तिष्ठति- stands, survives & विनश्यति- gets destroyed, perished- both in- वर्त. प्र. पु. ए. व. of स्था- १ ग. प. प. to stand, & वि + नश्- to be destroyed, perish- (नश्- नश्यति ४ ग. प. प. to to be lost, vanish), प्राप्ते, एकादशे & वर्षे- all in न. लिं. स. वि. ए. व. of प्राप्तम्- having completed, arrived, reached- प्राप्त- क. भू. धा. वि. of प्र+ आप्- to reach, get- (आप्- आप्नोति ५ ग. प. प. to obtain), एकादशन्- eleven & वर्षम्- year

**वरं वने व्याघ्रगजेन्द्रसेवितं**
**द्रुमालये पत्रफलाम्बुभोजनम्।**
**तृणेषु शय्या शतजीर्णवल्कलं**
**न बन्धुमध्ये धनहीनजीवनम्** ॥१०.१२॥ - जगति

वने व्याघ्रगजेन्द्रसेवितं, द्रुमालये पत्रफलाम्बुभोजनं, तृणेषु शय्या (तथा) शतजीर्णवल्कलं वरम् (अस्ति)। (किन्तु) बन्धुमध्ये धनहीनजीवनं न (वरम् भवति)॥

It is preferable to live in a forest inhabited by tigers and mighty elephants or under a shelter of trees, eating leaves, fruits and water or on a bed of grass wearing bark garments, worn-out at hundred places, than to live with relatives if one has no money.

वने, द्रुमालये & बन्धुमध्ये- all न. लिं. स. वि. ए. व. of वनम्- forest, द्रुमालयम्- house or abode under a tree- द्रुमः- a tree, आलयम्- a house, abode, place- द्रुमस्य आलयम्- ष. तत्पुरुष स. & बन्धुमध्यम्- amidst kinsmen, relationship- बन्धुः- kinsman, मध्यम्- adjctv- amidst, among- बन्धुषु मध्यम्- स. तत्पुरुष स., व्याघ्रगजेन्द्रसेवितम्- one which is inhabited tigers and mighty elephants- व्याघ्रः- tiger, गजेन्द्रः- king elephant- गजः- elephant, इन्द्रः- lord, king- गजानाम्

इन्द्रः- गजेन्द्रः-ष. तत्पुरुष स. & सेवितम्- one that is inhabited- सेवित- क. भू. धा. वि. of सेव्- सेवते १ ग. आ. प. to serve, to resort to, व्याघ्राः च गजेन्द्राः च- व्याघ्रगजेन्द्राः - द्वंद्व स. & व्याघ्रगजेन्द्रैः सेवितम्- व्याघ्रगजेन्द्रसेवितम्- तृ. तत्पुरुष स. & पत्रफलाम्बुभोजनम्- a meal of leaves, fruits and water- पत्रम्- a leaf, फलम्- a fruit, अम्बु- water, भोजनम्- a meal, lunch, feeding- पत्रम् च फलम् च अम्बु च- पत्रफलाम्बु- द्वंद्व स. & पत्रफलाम्बूनाम् भोजनम्- ष. तत्पुरुष स., शतजीर्णवल्कलम्- शतम्- hundred, जीर्णम्- worn out- जीर्ण- क. भू. धा. वि. of जृ(दीर्घ)- १, ४ & ९ प. प. & १० उ. प. -जरति, जीर्यति, जृणाति & जारयति-ते- to wear out, grow old, वल्कलम्- bark- garment- शतस्थानेषु जीर्णम्- शतजीर्णम्- स तत्पुरुष स. & शतजीर्णम् वल्कलम्- शतजीर्णवल्कलम्- वि. पू. प. कर्मधारय स. & धनहीनजीवनम्- living in poverty- धनम्- wealth, money, हीनम्- devoid of, without- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon, जीवनम्- life, survival- धनेन हीनः- धनहीनः- तृ. तत्पुरुष स. & धनहीनस्य जीवनम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., तृणेषु- in न. लिं. स. वि. ब. व. of तृणम्- grass, शय्या- bed- in स्त्री. लिं. प्र. वि. ए. व., वरम्- preferable to, better than & न- no, not- both अव्यय

**त्यजन्ति मित्राणि धनैर्विहीनं,**
**पुत्राश्च दाराश्च सुहृज्जनाश्च।**
**तमर्थवन्तं पुनराश्रयन्ति**
**अर्थो हि लोके मनुजस्य बन्धुः**॥१५.५॥ - त्रिष्टुभ

मित्राणि, पुत्राः च दाराः च सुहृत् जनाः च धनैः विहीनं त्यजन्ति। तम् अर्थवन्तं ते पुनः आश्रयन्ति। लोके अर्थः हि मनुजस्य बन्धुः (अस्ति)॥

Friends, sons, wife and (even) kind-hearted people desert a person without wealth. If he then becomes wealthy, they all seek his refuge again. Wealth alone is the man's brother in this world.

हा-जहाति २ प. प-हीन-(p.p.-क. भू. धा. वि), वि+हीन =leave, abandon, दाराः (always plural) a wife ( Note दारः - means, rent, gap, hole, cleft), सुहृत्- सु+हृद्=having kind heart, friendly, loving त्यज्- त्यजति १ प.प Leave, let go, shun, avoid, श्रि- श्रयति,श्रयते १ उ.प, To go, resort, cling, serve, use, आश्रयन्ति- प्र.पु. ब.व. of आ-श्रि- आश्रयति-ते, To seek refuse, follow, depend, undergo अर्थः -money, अर्थवन्तम्- द्वि. वि. ए.व. of अर्थवत् - wealthy, पुनः- adverb- again धनैः -तृ. वि. ब. व. of धनम् (न पु)-wealth, मित्राणि, पुत्राः -प्र. वि. ब.व of प्र. वि. ब. व. of मित्रम् (न. पु)- friend, पुत्र (पु. लि)-son

**अतिक्लेशेन ये चार्थाः धर्मस्यातिक्रमेण तु।**
**शत्रुणां प्रणिपातेन ते ह्यर्थाः न भवन्तु मे**॥१६.११॥

ये च अर्थाः अतिक्लेशेन तु धर्मस्य अतिक्रमेण (अर्जिताः सन्ति ), (तथा ये ) शत्रुणां प्रणिपातेन (अर्जिताः सन्ति) ते हि अर्थाः मे न भवन्तु॥

Let those material prosperities not happen to me, which have to be earned by excessive suffering or by violation of Dharma or by surrendering to an enemy.

ये, ते & अर्थाः- all in पु. लिं. प्र. वि. ब. व. of यद्- who, which, तद्- that, he & अर्थः- wealth, property, अतिक्लेशेन, अतिक्रमेण & प्रणिपातेन- all in पु. लिं. तृ. वि. ए. व. of अतिक्लेशः- excessive suffering- अति- अव्यय- prefix implies: excessive, very much, great, क्लेशः- suffering, anguish, trouble, distress- क्लेशम् अतिकृत्य- अतिक्लेशः & अतिक्रमः- अति- अव्यय- prefixed with verb implies- to over-step, violate, क्रमः- course, proper method, way- क्रमम् अतिकृत्य- अतिक्रमम्- both अव्ययीभाव स. & प्रणिपातः- submission, falling at one's feet, prostration- (प्र+ नि+ पत्- to prostrate- पत्- पतति १ ग. प. प. to call), मे (मम)- mine- ष. वि. ए. व. of अस्मद्- I, धर्मस्य- पु. लिं. ष. वि. ए. व. of धर्मः- right codes of conduct, religion (Dharma), शत्रुणाम्- in पु. लिं. ष. वि. ब. व. of शत्रुः- enemy, adversary, भवन्तु- आज्ञार्थ प्र. पु. ब. व. of भू- भवति १ ग. प. प. to be, to happen, become, तु- but, and, now, but, हि- surely, indeed, certainly, न- no, not, च- and- all अव्यय

**अहो बत विचित्राणि चरितानि महाऽऽत्मनाम्।**
**लक्ष्मीं तृणाय मन्यन्ते तद्भारेण नमन्ति च**॥१३. ४॥

अहो बत महाऽऽत्मनां चरितानि विचित्राणि (भवन्ति)। (ते) लक्ष्मीं तृणाय मन्यन्ते, (परन्तु ते) तद्भारेण नमन्ति च॥

Oh look, the behaviour of these great souls is indeed very surprising! They treat wealth as a mere straw and yet they bend down under its weight!

*The great people are humbled by their riches.*

महाऽऽत्मनाम्- in पु. लि. ष. वि. ब. व. of महाऽऽत्मन्- a great person, magnanimous man- महत्- adjctv- high, great, noble, आत्मन्- soul, mind- महान् आत्मा यस्य सः- बहुव्रीहि स., चरितानि & विचित्राणि- both in न. लि. प्र. वि. ब. व. of चरितम्- behaviour, practice, act, doing- चरित- क. भू. धा. वि. of चर्- चरति १ ग. प. प. to walk, go about, practice, perform & विचित्रम्- adjctv- varied strange, wonderful, surprising, लक्ष्मीम्- in स्त्री. लि. द्वि. वि. ए. व. of लक्ष्मीः- wealth, riches, Goddess of wealth, तृणाय- in न. लि. च. वि. ए. व. of तृणम्- a blade of grass, straw, reed, तद्भारेण- in न. लि. तृ. वि. ए. व. of तद्भारम्- weight of that- तद्- that, it, भारम्- load, weight- तस्य भारम्- ष. तत्पुरुष स., नमन्ति & मन्यन्ते- वर्त. प्र. पु. ब. व. of नम्- नमति- ते १ ग. उ. प. to bow, bend & मन्- मन्यते ४ ग. आ. प. to think, consider, believe, अहो- a particle showing surprise or

wonder- Oh, बत- a particle used for addressing, calling (with wonder, surprise), च- and- all अव्यय

★★★★★★

# Chapter 6 - Life Observations (जीवन निरीक्षा)

Cāṇakya compiled many verses that described his observations about the lives of different people. Some of his observations can be described as good, others as unfortunate. Many of these observations are very much valid today in any society from any country on Earth.

## *6.1 Good Observations (सुन्दर निरीक्षा)*

**समाने शोभते प्रीतिः राज्ञि सेवा च शोभते।**
**वाणिज्यं व्यवहारेषु दिव्या स्त्री शोभते गृहे**॥२.२०॥

प्रीतिः समाने शोभते, सेवा राज्ञि च शोभते, वाणिज्यं व्यवहारेषु (शोभते), गृहे दिव्या स्त्री शोभते॥

Friendship (love) is beautiful among the equals. Service to the King is rewarding. Trade shines among businesses. A wonderful woman brightens a household.

*Friendship or love among compatible persons from similar backgrounds lasts because there are fewer causes for friction. Service to the King or in government creates prestige and stability. Trading in various goods by business people brings prosperity. A charming, caring woman shines a household.*

प्रीतिः- love, affection, amity, friendship सेवा- service, attendance, दिव्या- charming, wonderful, heavenly, beautiful & स्त्री- a woman, wife- all in स्त्री. लिं. प्र. वि. ए. व., समाने, राज्ञि & गृहे- all in पु/न. लिं. स. वि. ए. व. of समान- adjctv- equal, same, alike, similar, राजन्- king, Ruler & गृहम्- house, home, शोभते- वर्त. प्र. पु. ए. व. शुभ्- १ ग आ. प. -to shine, look splendid, वाणिज्यम्- trade- in न. लिं. प्र. वि. ए. व., व्यवहारेषु- in पु. लिं. स. वि. ब. व. of व्यवहारः- dealing, business commerce, च- and- अव्यय

**मूर्खा यत्र न पूज्यन्ते धान्यं यत्र सुसंचितम्।**
**दंपत्यो कलहो नास्ति तत्र श्रीः स्वयमागता**॥३.२१॥

यत्र मूर्खाः न पूज्यते, यत्र धान्यं सु-संचितम् (अस्ति), (यत्र) दंपत्योः कलहः न अस्ति, तत्र श्रीः स्वयम् आगता॥

Where fools are not honoured, where grain (food stock) is well stored, (where) couples do not quarrel, the Goddess of wealth (prosperity) comes willingly on her own.पूज्-पूजयति-ते- १० ग. उ. प. to worship, revere, honour- पूज्यते- कर्मणी प्रयोग- प्र. पु. ब. व get worshipped., संचित- क.भू.धा.वि. of सं+चि - collect (चि-चिनोति-चिनुते-५ ग. उ. प. to collect, gather, hoard), सु-(indeclinable-अव्यय) meaning well, good, दंपती-(always masculine -द्वि. वचन), दंपत्योः-ष. वि. द्वि.व., कलहः -हं-quarrel, strife, अस्-अस्ति-२ प.प. to be, exist, आगत – क .भू. धा. वि of आ+गम्- -come, (गम्-गच्छति १ ग. प. प.-to go), स्वयम्-अव्यय-oneself, one's own धान्यम्- grains, श्रीः-wealth, Goddess of wealth

**अभ्यासाद्धार्यते विद्या कुलं शीलेन धार्यते।**
**गुणेन ज्ञायते त्वार्य: कोपो नेत्रेण गम्यते**॥५.८॥

पाठभेद: द्वि. चरणः ->गुणैर्मित्राणि धार्यन्ते अक्ष्णा क्रोधश्च धार्यते॥

विद्या अभ्यासात् धार्यते। कुलम् शीलेन धार्यते। आर्य: तु गुणेन ज्ञायते (तथा) कोपः नेत्रेण गम्यते। (मित्राणि गुणैः धार्यन्ते (तथा) क्रोधः च अक्ष्णा धार्यते)॥

Knowledge is supported by constant study. Dignity of a family name is maintained by the conduct of its members. A person is respected by his virtues. Anger of a person is conveyed through his eyes. (Friends are sustained by their virtues and anger is indicated through one's eyes)

विद्या- knowledge, scholarship- स्त्री. लिं. प्र. वि. ए. व., कुलम्- family, race, noble descent- न. लिं. प्र. वि. ए. व., आर्य:- a respectable or honourable man, कोपः & क्रोधः- anger, wrath- all in पु. लिं. प्र. वि. ए. व., अभ्यासात्- in पु. लिं. पं. वि. ए. व. of अभ्यासः- repeated practice, exercise, use- धार्यते- gets consolidated, sustained, ज्ञायते- gets known & गम्यते- gets evident, gets conveyed- all- कर्मणि प्रयोग प्र. पु. ए. व. of धृ- १ प. प. & १० उ. प. धरति, धारयति- ते- to bear, hold, sustain, maintain, ज्ञा- जानाति- जानीते ९ ग. उ. प. to know, understand & गम्- गच्छति १ ग. प. प. to go approach, शीलेन, गुणेन, नेत्रेण & अक्ष्णा- all न. लिं. तृ. वि. ए. व. of शीलम्- conduct, character, behaviour, गुणम्- virtue, quality नेत्रम् & अक्षि- eye, मित्राणि- न. लिं. प्र. वि. ब. व. of मित्रम्- a friend, गुणैः- न. लिं. तृ. वि. ब. व. of गुणम्- see above, धार्यन्ते- कर्मणि प्रयोग प्र. पु. ब. व. of धृ- see above, तु- but, on the other hand, च- and- both अव्यय

**दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम्।**
**अज्ञाननाशिनी प्रज्ञा भावना भयनाशिनी**॥५.११॥

दानं दारिद्र्यनाशनम् (अस्ति)। शीलं दुर्गतिनाशनम् (अस्ति)। प्रज्ञा अज्ञाननाशिनी (भवति। तथा) भावना भयनाशिनी (अस्ति)॥

Donation eliminates poverty. A good moral conduct avoids any misfortune. Knowledge removes ignorance. Faith (in God) removes any fear.

*Donations remove poverty of poor persons. It can also remove the donor's poverty with social honour !*

दानम्- charity, donation, giving away, शीलम्- character, good behaviour, दारिद्र्यनाशनम्- one that eradicates poverty- दारिद्र्य- poverty, नाशनम्- destroying,

removing- (नश्- नश्यति४ ग. प. प. to get destroyed, perish, to be lost)- दारिद्र्यम् नाशनम् यद् तद् & दुर्गतिनाशनम्- one that eradicates गतिः- situation, condition, going- दुरिता गतिः- दुर्गतिः- misfortune, calamity- प्रादि कर्मधारय स. & दुर्गतिम् नाशनम् यद् तद्- दुर्गतिनाशनम्- both बहुव्रीहि स.- all in न. लिं. प्र. वि. ए. व., प्रज्ञा- intelligence, wisdom, discrimination, भावना- conception, contemplation, hypothesis, faith in something ज्ञानम्- knowledge, understanding- न ज्ञानम्- अज्ञानम्- नञ्तत्पुरुष स.- ignorance- अज्ञानम् नाशिनी या सा- अज्ञाननाशिनी- one that eradicates ignorance & भयनाशिनी- one that eradicates fear- भयम्- fear, dread, threat, भयम् नाशिनी या सा- both बहुव्रीहि स.- all in स्त्री. लिं. प्र. वि. ए. व.

**नास्ति मेघसमं तोयं नास्ति चात्मसमं बलम्।**
**नास्ति चक्षुःसमं तेजो नास्ति चान्नसमं प्रियम्**॥५.१७॥

मेघसमं तोयं न अस्ति, आत्मसमं बलं च न अस्ति, चक्षुःसमं तेजः न अस्ति (तथा) अन्नसमं (धान्यसमं) प्रियं च न अस्ति॥

No water is as (pure) as that from the clouds. No power is better than self-confidence. There is no better light (of knowledge) than eyes. Moreover, there is nothing loved more than the food.

मेघसमम्- comparable to cloud, आत्मसमम्- like one's own, चक्षुःसमम्- like that of eyesight, अन्नसमम् /धान्यसमम्- matching the importance of food/ grains- मेघः- पु. लिं- cloud, आत्मन्- पु. लिं- self, one's own, चक्षुः (चक्षुस्)- न. लिं- an eye, अन्नम्- food, rice/ धान्यम्- grain- मेघस्य समम्, आत्मनः समम्, चक्षुसः समम्, अन्नस्य समम् /धान्यस्य समम्- ष. तत्पुरुष स., तोयम्- water, बलम्- strength, power, ability, तेजः (तेजस्)- sharpness, brilliance, light, प्रियम्- dear one, beloved, welcome, अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, च-and & न- no, not- both अव्यय

**नाग्निहोत्रं विना वेदा न च दानं विना क्रिया।**
**न भावेन विना सिद्धिस्तस्माद्भावो हि कारणम्**॥८.१०॥

अग्निहोत्रं विना वेदाः न (प्रयोजनम् अस्ति)। दानम् विना क्रिया न च (भवति)। भावेन विना सिद्धिः न (भवति)। तस्मात् भावः हि कारणम् (अस्ति)॥

Study of Vedas is useless without oblations to fire-God (Agnihotra). A religious ritual cannot be performed without donations. Absence of devotion (or lack of sincerity in any action) does not yield results. Therefore, devotion is indeed at the root (of all accomplishments.)

अग्निहोत्रम्- an oblation to the fire-god, maintenance of sacred fire- अग्निः- fire-god, होत्रम्- sacrifice, offering oblation- अग्नये होत्रम्- च. तत्पुरुष स. & दानम्- charity giving, donation- both in न. लिं. द्वि. वि. ए. व., वेदाः- in पु. लिं. प्र. वि. ब. व. of वेदः- sacred scriptures, क्रिया- action, activity, doing, a religious rite & सिद्धिः- accomplishment, fulfilment, perfection- both in स्त्री. लिं. प्र. वि. ए. व., भावः- feeling, sincerity, devotion, disposition, emotion- in पु. लिं. प्र. वि. ए. व., भावेन- in पु. लिं. तृ. वि. ए. व. of भावः, कारणम्- generative cause, motive, means- in न. लिं. प्र. वि. ए. व., तस्मात्- therefore, hence, विना- without, devoid of, absence of, हि- surely, indeed, truly, न- no, not & च- and- all अव्यय

**सर्वौषधीनाममृता प्रधाना,**
**सर्वेषु सौख्येष्वशनं प्रधानम्।**
**सर्वेन्द्रियाणां नयनं प्रधानं,**
**सर्वेषु गात्रेषु शिरः प्रधानम्**॥९.४॥ - त्रिष्टुभ

अमृता सर्वौषधीनां प्रधाना (अस्ति)। अशनं सर्वेषु सौख्येषु प्रधानम् (अस्ति)। नयनं सर्वेन्द्रियाणां प्रधानम् (अस्ति)। सर्वेषु गात्रेषु शिरः प्रधानम् (अस्ति)॥

Ambrosia is the best among all medicines. Eating is the foremost among the sensual pleasures! An eye is the most important among all the sense organs. The head is the most important among the body organs,

अमृता- drink for longevity or immortality, spirituous liquor, ambrosia - स्त्री. लिं. प्र. वि. ए. व., प्रधाना- स्त्री. लिं. & प्रधानम् - न. लिं. - प्र. वि. ए. व. of प्रधान- adjctv- principal, chief, main, the best, अशनम्, नयनम् & शिरः- न. लिं. प्र. वि. ए. व. of अशन- food, eating, नयन- eye, sight & शिरस्- head, सर्वेषु, सौख्येषु & गात्रेषु- न. लिं. स. वि. ब. व. of सर्व-all, entire, whole, सौख्य- satisfaction, pleasure, enjoyment & गात्र- limb, part of the body, सर्वेन्द्रियाणाम् & सर्वौषधीनाम्- ष. वि. ब. व. of सर्वेन्द्रियम्- न. लिं.- all organ- इन्द्रियम्- organ, सर्वम् इन्द्रियम्- कर्मधारय स. & सर्वौषधिः- पु. लिं or सर्वौषधी- स्त्री. लिं.- all medicine- ओषधिः /ओषधी- medicine- सर्वः ओषधिः or सर्वा ओषधी- कर्मधारय स.

**स्वहस्तग्रथिता माला स्वहस्तघृष्टचन्दनम्।**
**स्वहस्तलिखितं स्तोत्रं शक्रस्यापि श्रियं हरेत्॥९.१२॥**

स्वहस्त-ग्रथिता माला, स्वहस्त-घृष्ट-चन्दनं, स्वहस्त-लिखितं स्तोत्रं शक्रस्य अपि श्रियं हरेत्॥

A garland strung by one's own hand, sandalwood powdered by one's own hand and a hymn of praise written by one's own hands can take away even the splendour of King of Gods, Indra.

*It is blissful to worship God by self-made items. The efforts that go into making them can earn more blessings than the opulence of King of Gods.*

स्वहस्तग्रथिता- strung by one's own hand- स्व- one's own, self, हस्तः- hand, ग्रथिता- strung or tied together- ग्रथित- क. भू. धा. वि. of ग्रंथ्- ग्रंथति & ग्रथ्नाति- १ & ९ प. प. & ग्रंथयति- ते १० ग. उ. प. to string together, fasten, tie- स्वस्य हस्तः- स्वहस्तः- one's own hand- ष. तत्पुरुष स. & स्वहस्तेन ग्रथिता- तृ. तत्पुरुष स. & माला- garland- both in स्त्री. लिं. प्र. वि. ए. व., स्वहस्तघृष्टचन्दनम्- sandalwood paste made in one's own hand- स्वहस्त- see above, घृष्ट- crushed, powdered- क. भू. धा. वि. of घृष्- घर्षति- १ ग. प. प. to rub, crush, grind- चन्दनम्- sandalwood, स्वहस्तेन घृष्टम्- स्वहस्तघृष्टम्- तृ. तत्पुरुष स. & स्वहस्तघृष्टम् चन्दनम्- वि. पू. प. कर्मधारय स., स्वहस्तलिखितम्- written by one's own hand- स्वहस्त- as above, लिखितम्- written, composed- लिख्- लिखति- ६ ग. प. प. to write, to write down- स्वहस्तेन लिखितम्- तृ. तत्पुरुष स., स्तोत्रम्- a hymn of praise- all in न. लिं. प्र. वि. ए. व., शक्रस्य- in पु. लिं. ष. वि. ए. व. of शक्रः- name of Indra- King of Gods, श्रियम्- in स्त्री. लिं. द्वि. वि. ए. व. of श्रीः- excellence, grace, richness, हरेत्- विध्यर्थ प्र. पु. ए. व. of हृ- हरति १ ग. प. प. to carry away, take away, अपि- also, -अव्यय

**इक्षुदण्डास्तिलाः क्षुद्राः कान्ता हेम च मेदिनी।**
**चन्दनं दधि ताम्बूलं मर्दनं गुणवर्धनम्॥९.१३॥**

इक्षुदण्डाः (मर्दनं), तिलाः (मर्दनं), क्षुद्राः (मर्दनं), कान्ता (मर्दनं), हेम (मर्दनं), मेदिनी (मर्दनं), चन्दनं (मर्दनम्), दधि (मर्दनं) ताम्बूलं मर्दनं च गुणवर्धनं (भवन्ति)॥

Squeezing of sugarcane, crushing of sesame seeds, control over mean people, taking good care of wife, beating of gold, ploughing the field, rubbing a sandalwood piece, churning the curds and chewing of a tamboola (Pan) increase their (inherent) qualities.

इक्षुदण्डाः, तिलाः & क्षुद्राः- all in पु. लिं. प्र. वि. ब. व. of इक्षुदण्डः- sugarcane, तिलः- sesamum seed & क्षुद्रः- low, mean person, कान्ता- wife, woman, मेदिनी- earth, ground- both in स्त्री. लिं. प्र. वि. ए. व., हेम (हेमन्)- gold, चन्दनम्- sandalwood, दधि- curd, ताम्बूलम्- betel-nut, pan and other ingredients

generally chewed after meals, मर्दनम्- crushing, grinding, rubbing, anointing, pressing, kneading- (मृद्- मृद्नाति ९ ग. प. प. to squeeze, , press, stroke, rub against)- गुणवर्धनम्- enhancement of quality- गुणः/गुणम्- quality, property, nature, वर्धनम्- enhancement, increase, improvement, (वृध्- वर्धते १ ग. आ. प. to increase)- गुणस्य वर्धनम्- ष. तत्पुरुष स., च-and-अव्यय

**हस्ती स्थूलतनुः स चाङ्कुशवशः किं हस्तिमात्रोऽङ्कुशः**
**वज्रेणाभिहताः पतन्ति गिरयः किं शैलमात्रः पविः।**
**दीपे प्रज्वलिते विनश्यति तमः किं दीपमात्रं तमः**
**तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः॥**१४.९॥-शा. वि.

हस्ती स्थूल-तनुः (भवति)। सः च अङ्कुश-वशः (अस्ति)। अङ्कुशः हस्ति-मात्रः किम्? गिरयः वज्रेण अभिहताः पतन्ति । पविः शैल-मात्रः किम्? प्रज्वलिते दीपे तमः विनश्यति। तमः दीप-मात्रम् किम्? यस्य तेजः विराजते सः बलवान् (भवति)। स्थूलेषु प्रत्ययः कः?

The elephant has a huge body but it is controlled by a goad. Is the goad as big as the elephant? Mountains fall when struck by a thunderbolt. Is the thunderbolt as strong as the mountain? When a lamp is lit, darkness goes away. Is the darkness as small as the lamp? One's energy alone shines. Therefore, is there any real the strength in a bulky person?

*A small but proper item can defeat a bulky item.*

हस्ती- प्र. वि. ए. व. of हस्तिन्-an elephant, स्थूल - adjctv- bulky, big, तनुः - body- स्थूलः तनुः- स्थूलतनुः कर्मधारय स., सः & अङ्कुशवशः both प्र. वि. ए. व. of तद्- he, she it & अङ्कुशवश (अङ्कुशेन वशः-तृ. तत्पुरुष स.- अङ्कुशः - goad & वशिन्- subdued, under control), मात्र- adjctv- an affix added to nouns in the sense of' measuring as much as', किम्- pronominal adjctv.-what, which who, गिरयः & अभिहताः -both प्र. वि. ब. व. of गिरि -mountain & अभिहत- struck - क. भू. धा. वि. of अभि+ हन् to strike ( हन् -हन्ति-२ ग. प. प. to kill, destroy,) वज्रेण- तृ. वि. ए. व. of -वज्रः- वज्रम् - thunderbolt, पतन्ति- प्र. पु. ब. व of पत्-पतति १ ग. प. प. to fall , पविः- thunderbolt, शैलः- mountain, प्रज्वलिते & दीपे - स. वि. ए. व. of प्रज्वलित- lit, to burn & दीपम् - lamp, तमः- darkness, विनश्यति- प्र. पु. ए. व. of वि+नश् - get destroyed - (नश् –नश्यति ४ ग. प. प.), यस्य- ष. वि. ए. व. of यद्- which, what, तेजः - प्र. वि. ए. व. of तेजस्- brilliance, fire of energy, विराजते- प्र पु. ए. व. of वि+ राज् to shine (राज् राजति-ते १ ग. उ. प to shine), बलवान्- strong-- प्र. वि. ए. व. of बलवत्, स्थूलेषु- स. वि. ब. व. of स्थूल, प्रत्ययः & कः - प्र. वि. ए. व. of प्रत्यय- surety, certainty & किम्- which, what

**अनागतविधाता च प्रत्युत्पन्नमतिश्च यः।**
**द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति॥**१३.६॥

यः अनागत-विधाता च (यः) प्रत्युत्पन्नमतिः च द्वौ एव सुखम् एधेते।(यः) दीर्घसूत्री (सः) विनश्यति॥

Only these two, one who plans for the unforeseen events and the one has presence of mind (to act promptly), prosper happily. A procrastinating person will perish.

*A person who does not plan for expected events like old age or unforeseen events like robbery at home and thinks too much without taking appropriate actions will suffer.*

यः -who, अनागतविधाता- planer of unforeseen & प्रत्युत्पन्नमतिः- one has presence of mind-all in पु. लिं. प्र. वि. ए. व. of यद्-who, अनागतविधातृ -अनागत-future-न आगत-नञ्तत्पुरुष स.-आगत-present, arrived-क. भू. धा. वि. of आ+गम् - (गम्-गच्छति १ ग. प. प.), विधातृ-creator, maker-अनागतानाम् विधातृ-ष. तत्पुरुष स. & प्रत्युत्पन्नमति -प्रत्युत्पन्न- prompt, ready, मतिः-mind-(प्रत्युत्पन्ना मतिः यस्य सः - बहुव्रीहि स.), च -and, द्वौ-प्र. वि. द्वि. व. of द्वा- two, एव-अव्यय-only, just so, सुखम्-happiness, एधेते- प्र. पु. द्वि. व. of एध्-एधते १ ग. आ. प. to prosper, grow, दीर्घसूत्री-Dilatory person, procrastinator - in पु. लिं. प्र. वि. ए. व., विनश्यति- प्र. पु. ए. व. of वि+ नश्-to get destroyed (नश्-नश्यति ४ ग. प. प. to perish)

**अत्यासन्ना विनाशाय दूरस्था न फलप्रदा:।**
**सेवितव्यं मध्यभागेन राजा वह्निर्गुरुः स्त्रिय:**॥१४.११॥

अत्यासन्नाः राजा, वह्निः, गुरुः (तथा) स्त्रियः, विनाशाय (कारणानि भवन्ति)। (ते) दूरस्थाः न फलप्रदा: (भवन्ति) । (ते) मध्यभागेन सेवितव्यं (सन्ति)॥

Staying too close to a King or to a fire or to a teacher or towards women leads to disaster. However, staying away from them is not beneficial either! They should be served from a moderate distance (for the best gains).

राजा, वह्निः & गुरुः-all in पु. लिं. प्र. वि. ए. व., स्त्रियः- स्त्री. लिं. प्र. वि. ब. व. of स्त्री-woman, female, अत्यासन्नाः, दूरस्थाः & फलप्रदा: - पु. लिं. प्र. वि. ब. व. of अत्यासन्न-staying in too much proximity, stayed very close- क. भू. धा. वि. of अति+ आ+ सद्- (सद्- सीदति १ ग. प. प. to sit, lie, live), दूरस्थ- keeping distance, staying far away- दूर- far way- दूरे तिष्ठति इति- दूरस्थः- उपपद तत्पुरुष स. & फलप्रद-yielding result, fruitful- फलम्- fruit, प्रद- giving- फलम् प्रदाति इति- फलप्रद-उपपद तत्पुरुष स., विनाशाय- for disaster, ruin- च. वि. ए. व. of विनाश- disaster, मध्यभागेन- तृ. वि. ए. व. of मध्यभाग- by middle path- मध्य- middle, centre, भाग-part, portion, position- मध्यः भागः - मध्यभागः - कर्मधारय स., सेवितव्यम्- to be

served, attended to- (also सेवनीय & सेव्य)- कर्मणि वि. धा. सा. वि. of सेव्-सेवते- १ ग. आ. प. to serve, attend to, न- no, not

**तावन्मौनेन नीयन्ते कोकिलैश्चैव वासराः।**
**यावत्सर्वजनानन्ददायिनी वाक् प्रवर्तते**॥१४.१८॥

तावत् कोकिलैः मौनेन च एव वासराः नीयन्ते, यावत् (तेषां) सर्वजनानन्ददायिनी वाक् प्रवर्तते॥

The Koyals (Cuckoos) pass their days in total silence, until their melodious voice providing joy to everyone is fully developed.

*If you do not have anything pleasant to say, silence is golden. It also suggests that one should wait until one is fully ready to start a new project.*

सर्वजनानन्ददायिनी- one that is providing happiness/joy to everyone- सर्व- pronominal adjctv- all, entire, whole, जनः- person, people, आनन्दः- happiness/joy, दायिनी (दायिन्)- provider, giver, granting- सर्वः जनः- सर्वजनः- वि. पू. प. कर्मधारय स., सर्वजनानां आनन्दः- सर्वजनानन्दः- षष्ठी तत्पुरुष स. & सर्वजनानन्दम् दायिन् इति- सर्वजनानन्ददायिन्- द्वि. तत्पुरुष स.& वाक् (वाच्)- an assertion, an assurance, a promise- both in स्त्री. लि. प्र. वि. ए. व., प्रवर्तते- वर्त. प्र. पु. ए. व. of प्र+ वृत्- to commence, happen, to take place, to develop, to appear- (वृत्- वर्तते- १ ग. आ. प. to be, to exist, remain, कोकिलैः- in पु. लि. तृ. वि. ब. व. of कोकिलः- cuckoo bird- Koyal, मौनेन- in न. लि. तृ. वि. ए. व. of मौनम्- silence, वासराः- in पु. लि. प्र. वि. ब. व. of वासरः- a day, नीयन्ते- कर्मणि प्रयोग वर्त. प्र. पु. ब. व. of नी- नयति-ते १ ग. उ. प. to lead, carry, conduct, to pass (time), च- and, एव- just, merely, only, यावत्- till which time, until & तावत्- till that time, so far, as long as- all अव्यय

**अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम्।**
**अमृतं राहवे मृत्युर्विषं शंकरभूषणम्**॥१५.७॥

स्वामिनः अयुक्तं युक्तं (भवति, परन्तु) नीचस्य युक्तम् (अपि) दूषणं (भवति)। अमृतं राहवे मृत्युः (करोति किन्तु) विषं शंकरस्य भूषणम् (अस्ति)॥

An improper action by a master is accepted while even a proper action by a lowly person can be disgraceful. The nectar of immortality caused Rahu to die but the poison is an ornament for Lord Śiva.

*This verse has reference to Hindu mythological story of churning of the ocean by Gods and Demons. The demon Rāhu's body was severed by Lord Viṣṇu for stealing and drinking the nectar of immortality. On the other*

*hand, when Lord Śiva drank the poison, his neck appeard decortaed with blue color.*

स्वामिनः, नीचस्य, राहवे & शंकरस्य - all in पु. लिं. ष. वि. ए. व. of स्वामिन्- a master, powerful person, proprietor, King, नीचः- a lowly, mean, worthless person, राहुः- name of a demon whose head was cut off when detected in his disguise during distribution of Amrut, the nectar of immortality & शंकर- a name of Shiva, युक्तम्- proper, fit, useful, worthy, suitable, good & न युक्तम्- अयुक्तम्- useless, improper, bad, harmful- (युक्त- क. भू. धा. वि. of युज्- युनक्ति युंक्ते ७ ग. उ. प. to deploy, use, harness, join), दूषणम्- a cause of censure, blame, fault- ( दुष्- दुष्यति ४ ग. प. प. to be bad, corrupted, अमृतम्- nectar of immortality- (मृत- dead, ruined- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die- न मृत- अमृत- immortal), विषम्- poison, venom, भूषणम्- an ornament, an item of decoration, मृत्युः- death.

**यद्दूरं यद्दुराराध्यं यच्च दूरे व्यवस्थितम्।**
**तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्॥**१७.३॥

यद् दूरं, यद् दुराराध्यं, यद् च दूरे व्यवस्थितं, तद् सर्वं तपसा साध्यं (भवति)। तपः हि दुरतिक्रमम् (अस्ति)॥

Anything that is far away, anything that is most difficult to accomplish and anything that is well settled at a distant place, can all be achieved by sustained rigorous effort (penance). This effort can never be bypassed. (There is no short cut to success)!

यद्- which, what, दूरम्- at a distance, remote, long way off, दुराराध्यम्- one which is very difficult to propitiate, accomplish, attain- दुर्- अव्यय- prefix implies hard, difficult, bad- आराध्यम्- to be propitiated, accomplished, attained- आराध्य (also आराद्धव्य & आराधनीय)- क. वि. धा. सा.वि. of आ+ राध्- रध्नोति, दुखं आराध्यं इति- दुराराध्य- प्रादि कर्मधारय स., तद्- that, it, सर्वम्- all, entire, whole, व्यवस्थितम्- placed in order, firmly located- व्यवस्थित- क. भू. धा. वि. of वि+अव+ स्था-to be placed properly- (स्था - तिष्ठति १ ग. प. प. to stay, stand), साध्यम्- possible to achieve, accomplish- साध्य- (also साद्धव्य & साधनीय)- क. वि. धा. सा.वि. of साध्- साध्नोति ५ ग. प. प. to accomplish, complete, तपः (तपस्)- penance, sustained rigorous efforts & दुरतिक्रमम्- difficult to be overcome, conquered, दुखं अतिक्रमं इति- प्रादि कर्मधारय स.- all in- न. लिं. प्र. वि. ए. व., दूरे- न. लिं. स. वि. ए. व. of दूरम्- see above, तपसा- न. लिं. तृ. वि. ए. व. of तपस्, च- and & हि- indeed, certainly- both अव्यय

**व्यालाश्रयाऽपि विफलाऽपि सकण्टकाऽपि**
**वक्राऽपि पङ्किलभवाऽपि दुरासदाऽपि।**
**गन्धेन बन्धुरसि केतकि सर्वजन्तोः**
**एको गुणः खलु निहन्ति समस्तदोषान्**॥१७.२१॥ -शक्करी

केतकि, (त्वं) व्यालाश्रया अपि, विफला अपि, सकण्टका अपि, वक्रा अपि, पङ्किलभवा अपि, दुरासदा अपि असि, (तथा अपि त्वं) गन्धेन (सर्वजन्तोः) बन्धुः असि। सर्वजन्तोः एकः गुणः खलु समस्तदोषान् निहन्ति॥

Oh Ketaki flower, you are an abode of snakes, you do not bear fruits, you are thorny, you are crooked, you are in deep mud (and) you are very difficult to approach. Still you are a dear friend because of your fragrance. For all living beings, a single good quality, indeed, strikes out all their faults.

केतकि- स्त्री. लिं. सं. वि. ए. व. of केतकी- lotus like flower, व्यालाश्रया- an abode of snake- व्यालः- a snake, आश्रयः- refuge, resting place- व्यालानाम् आश्रया या सा- बहुव्रीहि स. विफला- one without fruits- फलम्- न. लिं- fruit- विना फलम् या सा- बहुव्रीहि स., सकण्टका- one which thorny- कण्टकः/कम्- a thorn- कण्टकैः सह- सकण्टका- सह बहुव्रीहि स., वक्रा (वक्र- adjctv)- crooked, winding, पङ्किलभवा- growing in a muddy thickets- पङ्कः- mud, more, thick mass- पङ्किल- adjctv- muddy, dirty, dense growth- पङ्किले भवति इति- पङ्किलभवा- उपपद तत्पुरुष स., दुरासदा- difficult to reach, approach- दुखेन सादयति -उपपद तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., सादयति - प्रयोजक of सद्- सीदति ६ ग. प. प.-to go, walk गन्धेन- with fragrance, smell- पु. लिं. तृ. वि. ए. व. of गन्धः, बन्धुः- a kinsman, friend, dear one, एकः- one, single & गुणः- quality, virtue, property- all in पु. लिं. प्र. वि. ए. व., असि- वर्त. म. पु. ए. व. of अस्- अस्ति- २ ग. प. प. to be, to exist, सर्वजन्तोः- in पु. लिं. ष. वि. ए. व. of सर्वजन्तुः- सर्वः- all, entire, whole, जन्तुः- living being, creature- सर्वः जन्तुः- वि. पू. प. कर्मधारय स, निहन्ति- वर्त. प्र. पु. ब. व. of नि+ हन्-to strike of, eliminate- (हन्- हन्ति २ ग. प. प. to kill, strike), समस्तदोषान्- in पु. लिं. द्वि. वि. ब. व. of समस्तदोषः- disadvantages, entire bad qualities- समस्त- entire, compounded- all- क. भू. धा. वि. of सं+ अस्- to unite, bring together- (अस्- see above) दोषः- fault, weakness- समस्ताः दोषाः- समस्तदोषाः- वि. पू. प. कर्मधारय स, अपि- also, even & खलु- indeed, surely-both अव्यय

## *6.2 Sad Observations (दुःखी निरीक्षा)*

**मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च।**
**दुःखितैः सम्प्रयोगेण पण्डितोऽप्यवसीदति**॥१.४॥

मूर्खशिष्योपदेशेन, दुष्टस्त्रीभरणेन च दुःखितैः सम्प्रयोगेण, पण्डितः अपि अवसीदति॥

Even a wise (tolerant) man gets exhausted while teaching a foolish student, maintaining a bad woman (wife) or meeting unhappy people!

मूर्खशिष्योपदेशेन, दुष्टस्त्रीभरणेन & सम्प्रयोगेण- all in पु. लिं. तृ. वि. ए. व. of मूर्खशिष्योपदेशः- teaching a foolish student- मूर्खः- adjctv- stupid, dull-headed, foolish, शिष्यः- student, disciple, उपदेशः- teaching, advice, instruction- मूर्खः शिष्यः- वि. पू. प. कर्मधारय स. & मूर्खशिष्याय उपदेशः- च. तत्पुरुष स., दुष्टस्त्रीभरणः- दुष्ट- adjctv- cruel, wicked, bad- क. भू. धा. वि. of दुष्- दुष्यति ४ ग. प. प. to be bad, unchaste, to sin, स्त्री- woman, wife, भरण- adjctv- maintaining, supporting, bearing- दुष्टा स्त्री- वि. पू. प. कर्मधारय स. & दुष्टस्त्रियः भरणः- दुष्टस्त्रीभरणः- ष तत्पुरुष स. & सम्प्रयोगः- connection, contact, meeting, दुःखितैः- in पु. लिं. तृ. वि. ब. व. of दुःखितः- distressed, afflicted, unhappy, miserable, पण्डितः- a wise man, an intelligent person अवसीदति- वर्त. प्र. पु. ए. व. of अव+ सद्- to get ruined, disheartened, exhausted, perished- (सद्- सीदति- १ ग प. प. to sit, sit down, plunge into), च- and, अपि- also, even- both अव्यय

**दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः।**
**ससर्पे गृहे वासो मृत्युरेव न संशयः**॥१.५॥

दुष्टा भार्या, शठं मित्रं, भृत्यः च उत्तरदायकः, ससर्पे गृहे वासः, मृत्युः एव (अस्ति इति) न संशयः (भवेत्) ॥

Each one of these - a cruel wife, a dishonest friend, a disobedient servant and staying in a house with a snake - is as good as death without any doubt.

*I think the author may be suggesting a spy as a snake or an enemy.*

दुष्टा- wicked cruel & भार्या- wife- both in स्त्री. लिं. प्र. वि. ए. व., शठम्- crafty, dishonest, fraudulent & मित्रम्- friend- both in न. लिं. प्र. वि. ए. व.,भृत्यः- servant, dependant- भृत्य (also भरणीय & भर्तव्य)- क. वि. धा. सा. वि. of भृ- बिभर्ति, बिभृते ३ ग. उ. प. to support, best, protect, provide for, उत्तरदायकः- one who answers- उत्तरम्- reply, answer, दायक: - दायं (gift, present) करोति इति -उपपद तत्पुरुष स. उत्तरस्य दायक: - ष तत्पुरुष., वासः- stay, habitation, संशयः- doubt, uncertainty, hesitation & मृत्युः- death - all in पु. लिं. प्र. वि. ए. व., ससर्पे & गृहे- both in न. लिं. स. वि. ए. व. of ससर्पम्- along with a snake सर्पः- serpent, snake- सर्पेण सहितम् यद् तद्- ससर्पम्- सह बहुव्रीहि स. & गृहम्- house, abode, एव- just, mere, only, च- and, likewise, न- no, not -all अव्यय

**यो ध्रुवाणि परित्यज्य ह्यध्रुवं परिसेवते।**
**ध्रुवाणि तस्य नश्यन्ति चाध्रुवं नष्टमेव तत्**॥१.१३॥

यः ध्रुवाणि परित्यज्य, अध्रुवं हि परिसेवते, तस्य ध्रुवाणि नश्यन्ति, तत् अध्रुवं नष्टम् एव च (अस्ति)॥

A person, who after abandoning achievable objectives, goes after the non-achievable ones, loses his achievable objectives as well. That non-achievable objective is destroyed any way.

(A bird in hand is worth is two in the bush)

यः- प्र.वि.ए. व. of यद्-who, ध्रुवाणि- न. लिं. द्वि. वि. ब. व. of ध्रुव-achievable, sure one, certain one, परित्यज्य-पू. का. वा. ल्यबन्त धा. सा. अव्यव of परि+त्यज्-leave, abandon ( त्यज् -त्यजति १ ग. प. प. to leave), हि-अव्यव-surely, indeed, अध्रुवम् -न ध्रुवम्- नञ्तत्पुरुष स., परिसेवते- वर्त. प्र. पु. ए. व. of परि+सेव्-to attempt, go after- सेव्-सेवते १ ग. आ. प. to serve,तस्य-ष. वि. ए. व. of तद् - he, नश्यन्ति--तृ. पु. ब. व. of नश्- नश्यति ४ ग. प. प. to get destroyed, perish, तत् , अध्रुवम्, नष्टम् -प्र. वि. ए. व. of तद्-that, अध्रुव-not achievable, नष्ट- lost -क. भू. धा. वि. of नश्- नश्यति, एव- अव्यव- just, just so, च-and

**कष्टं च खलु मूर्खत्वं कष्टं च खलु यौवनम्।**
**कष्टात्कष्टतरं चैव परगेहनिवासनम्**॥२. ८॥

मूर्खत्वं खलु कष्टम् (अस्ति)। यौवनं च (अपि) कष्टं च खलु (भवति)। (परन्तु) परगेहनिवासनं कष्टात् कष्टतरं च एव (भवति)॥

Being stupid is indeed hurtful. In addition, youth is surely a difficult period (in one's life). However, staying in somebody else's house is more hurtful than any other hardship.

मूर्खत्वम्- stupidity, ignorance- मूर्खः- a fool, stupid, ignorant, त्वम्- suffix implies: quality, property, कष्टम्- difficult, hardship, hurtful, suffering, boding evil, यौवनम्- youth, prime age, puberty, कष्टतरम्- much more hurtful or hard- तरम्- suffix implies: comparative degree, परगेहनिवासनम्- a stay in a house belonging to others- परः- other, another, गेहम्- house, abode, habitation, निवासनम्- staying, residing- परस्य गेहम्- परगेहम्- ष. तत्पुरुष स. & परगेहे निवासनम्- परगेहनिवासनम्- स. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., कष्टात्- in न. लिं. पं. वि. ए. व. of कष्टम्- see above, च-and, खलु- indeed, surely, certainly, एव- only, just, merely- all अव्यय

**आलस्योपहता विद्या परहस्तं गतं धनम्।**
**अल्पबीजं हतं क्षेत्रं हतं सैन्यमनायकम्**॥५.७॥

आलस्योपहता विद्या (हता भवति)। परहस्तं गतं धनम् (हतं भवति)। (परहस्तगताः स्त्रियः (हताः भवन्ति)। ) अल्पबीजम् क्षेत्रं हतं (तथा) अनायकं सैन्यं हतं (भवति)॥

Knowledge struck by laziness is lost. One's wealth gone into hands of others is lost. Women gone into custody of others may be abused. A field (sowed with) scanty seeds will die. An army with no leader is destroyed.

आलस्योपहता- आलस्य- laziness, उपहता- struck & विद्या- knowledge, expertise, skill, learning- आलस्येण उपहता- तृ. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., परहस्तम्- hands of others- परः- the other, हस्तम्- hand- परस्य हस्तम्- ष. तत्पुरुष स., गतम्- gone, reached- गत- क.भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, धनम्- wealth, money, अल्पबीजम्- very little seeds- अल्प- adjctv- scanty, trickling, unimportant, बीजम्- seed- अल्पम् बीजम्- वि. पू. प. कर्मधारय स., हतम्- struck, destroyed, ruined- हत- क.भू. धा. वि. of हन्- हन्ति २ ग. प. प. to strike, kill, क्षेत्रम्- field, ground, अनायकम्- one that is without a leader- नायकः- leader, conductor, guide- न नायकः यस्य तद्- अनायकम्- नञ्बहुव्रीहि स., सैन्यम्- army, fighting forces- all in न. लिं. प्र. वि. ए. व., परहस्तगताः & स्त्रियः- both in स्त्री. लिं. प्र. वि. ब. व. of परहस्तगता- परहस्तेषु गताः - स. तत्पु. स. & स्त्री- woman, wife

**भ्रमन् सम्पूज्यते राजा भ्रमन् सम्पूज्यते द्विजः।**
**भ्रमन् सम्पूज्यते योगी स्त्री भ्रमन्ती विनश्यति**॥६.४॥

भ्रमन् राजा सम्पूज्यते। भ्रमन् द्विजः सम्पूज्यते। भ्रमन् योगी सम्पूज्यते। (परन्तु) भ्रमन्ती स्त्री (तु) विनश्यति॥

A King is highly respected if he goes around (understanding the ground situation of his subjects). A Priest is honoured if he walks (wherever he has to provide his services). An ascetic on the move is (also) revered. (However) a woman who moves (without protection or for illicit trade) is ruined.

*Although things have significantly improved around the world, the women travelling alone or in the illicit business continue to face serious crimes against them. This is unfortunate.*

भ्रमन्- wandering, going about, moving around- भ्रमत्- कर्तरि वर्त. का. वा. धा. सा. वि. of भ्रम्- भ्रमति १ ग. प. प. to roam, wander around, move around, राजा (राजन्)- King, Ruler, द्विजः- one, who is twice born, a member of a priestly class (Brahmin) & योगी (योगिन्)- an ascetic, saint, a follower of 'Yoga'

system of philosophy- all in पु. लिं. प्र. वि. ए. व., स्त्री- a woman, wife & भ्रमन्ती (=भ्रमत्- see above)- both in स्त्री. लिं. प्र. वि. ए. व., सम्पूज्यते- कर्मणि प्रयोग प्र. पु. ए. व. of सं+ पूज्- highly honoured, respected, revered- (पूज्- पूजयति-ते १० ग. उ. प. to worship, honour, respect, विनश्यति- वर्त. प्र. पु. ए. व. of वि+ नश्- to be destroyed, ruined- नश्- नश्यति- ४ ग. प. प. to be lost, ruined

**राजा राष्ट्रकृतं पापं राज्ञः पापं पुरोहितः।**
**भर्ता च स्त्रीकृतं पापं शिष्यपापं गुरुस्तथा**॥६.१०॥

राजा राष्ट्रकृतं पापं, पुरोहितः राज्ञः (कृतं) पापं, भर्ता च स्त्रीकृतं पापं तथा गुरुः शिष्य(कृतं) पापं गुरुः (उत्तरदायकाः सन्तिः )॥

The King is responsible for the sin committed by his country. The family-priest is accountable for a sin committed by his King. The husband is responsible for a sin committed by his wife. The teacher is accountable for a sin committed by his student.

*It is also true that a wife may suffer for the ill doings of her husband!*

राजा (राजन्)- King, पुरोहितः- family-priest, advisor, भर्ता (भर्तृ)- husband & गुरुः- teacher, elder, father- all in पु. लि. प्र. वि. ए. व., राष्ट्रकृतम्- committed by a country- राष्ट्र- country, nation, कृतम्- done, made (कृत- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make)- राष्ट्रेण कृतम्- राष्ट्रकृतम्- तृ. तत्पुरुष स., पापम्- sin, crime, स्त्रीकृतम्- committed by a wife- स्त्री- wife, woman- स्त्रिया कृतम्- स्त्रीकृतम्- तृ. तत्पुरुष स. & शिष्यपापम्- sin or crime of a pupil/ student- शिष्य- pupil/ student- शिष्यस्य पापम्- शिष्यपापम्- ष. तत्पुरुष स.-all in न. लि. द्वि. वि. ए. व., राज्ञः- पु. लि. ष. वि. ए. व. of राजन्- King, च-and, तथा- अव्यय- and, like that, in that manner. उत्तरदायकः - responsible, the one who has to answer

**आत्मद्वेषात् भवेन्मृत्युः परद्वेषात् धनक्षयः।**
**राजद्वेषात् भवेन्नाशो ब्रह्मद्वेषात् कुलक्षयः**॥१०.११॥

आत्मद्वेषात् (मनुष्यस्य) मृत्युः भवेत्। परद्वेषात् धनक्षयः (भवेत्)। राजद्वेषात् नाशः भवेत्। (तथा) ब्रह्मद्वेषात् कुलक्षयः (भवेत्)॥

Self-hate (depression) may drive one towards his death. Hostility to others may lead to loss of wealth. Enmity towards the ruler may result in one's own ruin. Hostility towards the learned and intellectuals may destroy the family.

*A person who does not respect himself may get depressed and may lead to his own downfall. To live in a society and earn money requires cooperatively dealing with others. Obviously, one must respect the rule of*

*law established by the Government. Finally, one must respect all the teachers and wise men to follow the righteous paths so that the family prospers.*

आत्मद्वेषात्, परद्वेषात्, राजद्वेषात् & ब्रह्मद्वेषात्- all in पु. लिं. पं. वि. ए. व. of आत्मद्वेष- self-hate, hostility towards/of Self- आत्मन्- पु. लिं.- Self, one's own, द्वेष- hate, enmity, hostility- आत्मने द्वेषः- परद्वेष- hostility towards others- पर- other, another- परेभ्य: द्वेषः, राजद्वेष- hostility towards the ruler (King)- राजन्- पु. लिं.- King- राज्ञे द्वेषः & ब्रह्मद्वेष- hatred towards learned, intellect, the Supreme- ब्रह्मन्- न. लिं.- learned, intellect, the Supreme- ब्रह्मणे द्वेषः- all four चतुर्थी तत्पुरुष स, मृत्यु:- death धनक्षय:- loss of wealth- धन- wealth, money, क्षय- destruction, loss- धनस्य क्षयः- धनक्षय:- ष. तत्पुरुष स, नाशः- destruction & कुलक्षय:- elimination of the family/ race- कुल- family,race - कुलस्य क्षय: - ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., भवेत्- would occur, may occur- विध्यर्थ प्र. पु. ए. व. of भू-भवति- १ ग. प. प. to be, exist, happen

**आत्मवर्गं परित्यज्य परवर्गं समाश्रयेत्।**
**स्वयमेव लयं याति यथा राज्यमधर्मतः**॥११.२॥

(यः) आत्मवर्गं परित्यज्य परवर्गं समाश्रयेत्, यथा राज्यम् अधर्मतः लयं याति (तथा सः) स्वयम् एव (लयं याति)॥

One, who leaves his own people and seeks refuge with strangers, suffers his own destruction, like a country that gets destroyed without law and order.

आत्मवर्गम्, परवर्गम् & लयम्- all in पु. लिं. द्वि. वि. ए. व. of आत्मवर्गः- one's own group or society- आत्मन्- पु. लिं.- oneself, one's own, soul, वर्गः- class, group company, society, division- आत्मनः वर्गः- आत्मवर्गः , परवर्गः- society or group of others- परः- the, other, another- परस्य वर्गः- परवर्गः- both ष. तत्पुरुष स., & लयः- extinction, destruction, end, समाश्रयेत्- विध्यर्थ प्र. पु. ए. व. of समा+ श्रि- to take refuge, to resort to, to have recourse to- (श्रि- श्रयति- ते to go to, approach, अधर्मतः- that is being governed without any law and order- धर्मः- law, order, right codes of conduct- (Dharma)- न धर्मः- अधर्मः- नञ् तत्पुरुष स.- तः (तस्)- suffix to a noun converts it to its पं. वि. ए. व., namely, 'by it' or 'from it', राज्यम्- kingdom, royalty, country- in न. लिं. प्र. वि. ए. व., याति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, become, to come to, परित्यज्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of परि+ त्यज्- to leave entirely- (त्यज्- त्यजति- १ ग. प. प. to leave, abandon, quit, स्वयम्- oneself, of his own self, himself, एव- just, only, merely, यथा- as, like, similar to, in which manner- all अव्यय

**गृहाऽऽसक्तस्य नो विद्या नो दया मांसभोजिनः।**
**द्रव्यलुब्धस्य नो सत्यं स्त्रैणस्य न पवित्रता**॥११.५॥

गृहाऽऽसक्तस्य नो विद्या (लभते)। मांसभोजिनः नो दया (अस्ति)। द्रव्यलुब्धस्य नो सत्यं (वर्तते)। स्त्रैणस्य न पवित्रता (विद्यते)॥

A very homebound person cannot get (good) education. A meat eater cannot have compassion. A person greedy for wealth is not honest. One who runs after women cannot be pure.

*One must travel outside his home or even outside his town to get good education and gain knowledge as travel itself is educational. A meat eater cannot have compassion for animals. A greedy person may obtain wealth by dishonest means. A person running after women is likely to visit brothels and can suffer from diseases.*

गृहाऽऽसक्तस्य, मांसभोजिनः, द्रव्यलुब्धस्य & स्त्रैणस्य- all in पु. लिं. ष. वि. ए. व. of गृहाऽऽसक्तः- one who is home bound- गृहम्- न. लिं- house, abode, home- आसक्तः- interested in, involved in- आसक्त- क. भू. धा. वि. of आ+ संज्- to adhere to, to be interested in- (संज्- सजति १ ग. प. प. to stick or adhere to)- गृहे आसक्तः- स. तत्पुरुष स., मांसभोजिन्- a flesh eater, one who par takes meat- मांसम्- flesh, meat, भोजिन्- eater- मांसम् भोजिन् इति- मांसभोजिन्- द्वितीया तत्पुरुष स., द्रव्यलुब्धः- one who is only after wealth, greedy about money- द्रव्यम्- money, wealth, property, लुब्धः- one who is desirous, greedy- लुब्धः- क. भू. धा. वि. of लुभ्- लुभ्यति ४ ग. प. प. to covet, long for, desire eagerly- द्रव्यस्य लुब्धः- ष. तत्पुरुष स. & स्त्रैणः- one who is only after women- स्त्री- woman- स्त्रैण- adjctv- related to women or connected with women, सत्यम्- truth, honesty- in न. लिं. प्र. वि. ए. व., पवित्रता- sense of purity, sinlessness, sacredness- पवित्र- sacred, sinless, pure- ता- suffix implies quality, दया- compassion, kindness & विद्या- pursuit of knowledge or education- all in स्त्री. लिं. प्र. वि. ए. व., न & नो= न उ- no, not - अव्यय

**न वेत्ति यो यस्य गुणप्रकर्षं,**
**स तं सदा निन्दति नात्र चित्रम् ।**
**यथा किराती करिकुम्भलब्धां,**
**मुक्तां परित्यज्य बिभर्ति गुञ्जाम्**॥ ११ ८॥ -त्रिष्टुभ

यथा किराती, करि-कुम्भ-लब्धां मुक्तां परित्यज्य, गुञ्जां बिभर्ति, (तथा), यः यस्य गुणप्रकर्षं न वेत्ति, सः तं सदा निन्दति । अत्र न चित्रम् (अस्ति)॥

A tribal woman, rejecting precious pearl obtained from the temple of an elephant, adorns herself with (cheap) seeds of red-black berry. Similarly,

one who cannot comprehend the excellent qualities (of a person) always criticizes him! It is not surprising!

यथा-अव्यय-which manner, which way, किराती-स्त्री. लिं-tribal woman, करिकुम्भलब्धाम्, मुक्ताम् & गुञ्जाम् स्त्री. लिं. द्वि. वि. ए. व. of करिकुम्भलब्ध-obtained from in an elephant's temple- करिन्- elephant, कुम्भ- temple or frontal, globe on the forehead of an elephant, लब्ध-obtained-जात-produced- both क. भू. धा. वि. of लभ्-लभते १ ग. आ. प. to obtain, get & जन्-जायते ४ ग. आ. प. to produce, to be born, करिनः कुम्भः-षष्ठी तत्पुरुष, करिकुम्भात् लब्धा -पञ्चमी तत्पुरुष स., मुक्ता- pearl & गुञ्जा- seed of red-black berry, परित्यज्य-totally abandoning or leaving- पू. का. वा. ल्यबन्त धा. सा. अव्यय of परि+त्यज्- (त्यज्- त्यजति-१ ग. प. प. to abandon, leave, discard) बिभर्ति, वेत्ति & निन्दति- वर्त. प्र.. पु. ए. व. of भृ- ३ ग. प. प. to uphold, retain, bear -(भृ- भरति-ते १ ग. उ. प. & बिभर्ति- बिभृते -३ ग. उ. प to fill, , bear, support, maintain), विद्-२ ग. प. प. to know, recognise & निन्द्- १ ग. प. प. to blame, abuse, यः & सः -पु. लिं. प्र. वि. ए. व. of यद्-who & तद्-he, यस्य-whose- पु. लिं. ष. वि. ए. व. of यद्-who गुणप्रकर्षम् -पु/न. लिं. द्वि. वि. ए. व. of गुणप्रकर्ष -value, importance-गुण- quality, virtue, प्रकर्ष- eminence, excellence, न - no, not, तम्- him- पु. लिं. द्वि. वि. ए. व. of तद्- he, सदा-अव्यय- always, daily, regularly, अत्र-अव्यय- here, in this place, चित्रम् -अव्यय- strange, surprising

**अनालोक्य व्ययं कर्ता ह्यनाथः कलहप्रियः।**
**आतुरः सर्वक्षेत्रेषु नरः शीघ्रं विनश्यति**॥१२.१९॥

अनालोक्य व्ययं कर्ता, अनाथः हि कलहप्रियः, सर्वक्षेत्रेषु आतुरः नरः शीघ्रं विनश्यति॥

A person, who spends money without thinking, who is quarrelsome, who does not have a guardian and who is impatient (for quick results) in all fields, is quickly destroyed.

अनालोक्य- without perceiving, thoughtlessly- - पू. का वा ल्यबन्त धा. सा. अव्यय of आ+ लोक्- to perceive, behold, see- (लोक्- लोकते १ ग. आ. प. to see, view)- न आलोक्य- अनालोक्य- नञ् तत्पुरुष स., व्ययम्- पु. लिं. द्वि. वि. ए. व. of व्ययः- expenditure, spending- (व्यय्- व्यययति- ते १० ग. उ. प. to expend, give away), कर्ता (कतृ)- doer, indulger, maker- (कृ-करोति कुरुते -८ ग. उ. प. to do), अनाथः- one without support, orphan- नाथः- master, protector, न नाथः- अनाथः- नञ् तत्पुरुष स., कलहप्रियः- quarrel monger, fond of quarrels- कलहः- strife, quarrel, प्रिय- dear, liking- कलहः प्रियः यस्य सः- बहुव्रीहि स., आतुरः- sick, hurt, injured, over anxious, impatient & नरः- man, person- all in पु. लिं. प्र. वि. ए. व., सर्वक्षेत्रेषु- न. लिं. स. वि. ब. व. of सर्वक्षेत्रम्- all fields, ventures- सर्वम्- all, entire, क्षेत्रम्- field, area- सर्वम् क्षेत्रम्- वि. पू. प. कर्मधारय स., विनश्यति- वर्त. प्र. पु. ए. व. of

वि+ नश्- to get destroyed completely- (नश्- नश्यति ४ ग. प. प. to get destroyed, to be lost), हि- indeed, & शीघ्रम्- quickly- both अव्यय

**तृणाल्लघुतरः तूलः तूलादपि च याचकः।**
**वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति**॥१६.१६॥

तूलः तृणात् लघुतरः, याचकः तूलात् अपि च (लघुतरः अस्ति)। 'असौ वायुना किं न नीतः '? 'अयं मां प्रार्थयेत् इति' (वायुना चिन्तितम्)॥

Cotton is lighter than grass. A beggar is even lighter than cotton. Then, why is he not carried away by the wind? (Because, the wind thinks) "He may beg from me".

तूलः, लघुतरः, याचकः, नीतः - all प्र. वि. ए. व. of तूल- cotton, लघुतर- lighter - लघु- adjctv- light, small, weak, feeble, याचक- beggar, नीत- taken (नीत- क. भू. धा. वि. Of नी- नयति-ते १ ग. उ. प. to carry, take away) , तृणात् & तूलात्- पं. वि. ए. व. of तृणम् -grass & तूलः or तूलम्- cotton, अपि- अव्यय -also, असौ- पु. लिं. प्र. वि. ए. व. of अदस् -he,she, it, that, वायुना-पु. लिं. तृ. वि. ए. व. of वायु- wind, किम् pronominal adjctv- why, who, अयम्- पु. लिं. प्र. वि. ए. व. of इदम् this, he, she, it, माम् - पु. लिं. द्वि. वि. ए. व. of अस्मद् I, we, प्रार्थयेत् - विध्यर्थ तृ. पु. ए. व. of प्र+अर्थ् -अर्थयति-ते १० ग. उ. प. to pray, beg, ask, इति- अव्यय -like, this, as follows

**वरं प्राणपरित्यागो मानभङ्गेन जीवनात्।**
**प्राणत्यागे क्षणं दुःखं मानभङ्गे दिने दिने**॥१६.१७॥

मानभङ्गेन जीवनात् प्राणपरित्यागः वरं (भवति)। प्राणत्यागे क्षणं दुःखं (भवति)। मानभङ्गे (दुःखं) दिने दिने (भवति)॥

It is better to give up the life rather than being humiliated. Giving up one's life is painful for a moment but humiliation hurts every day.

प्राणत्यागे & मानभङ्गे- पु. लिं. स. वि. ए. व. of प्राणत्याग- giving up life- प्राणः- life, breath of life, त्याग- forsaking, give-up, abandoning- (त्यज्- त्यजति १ ग. प. प. to leave, abandon- प्राणस्य त्यागः- प्राणत्यागः- ष. तत्पुरुष स. & मानभङ्ग- humiliation- मानः- respect honour- भङ्ग- breaking, shattering, tearing down- (भङ्ज्- भनक्ति -७ ग. प. प. to break, tear down)- मानस्य भङ्गः- मानभङ्गः- ष. तत्पुरुष स., मानभङ्गेन- पु. लिं. तृ. वि. ए. व. of मानभङ्ग- जीवनात्- न. लिं. पं. वि. ए. व. of जीवन- life, surviving, प्राणपरित्यागः- giving up life all together- परि- अव्यय- prefix to verb & noun implies- excessively, all together- त्यागः परिकृत्य- परित्यागः- अव्ययीभाव स. & प्राणस्य परित्यागः- प्राणपरित्यागः- ष. तत्पुरुष स. -in -पु. लिं. प्र. वि. ए. व., क्षणम्- a moment, an instant & दुःखम्- sorrow, pain- both in- न.

लिं. प्र. वि. ए. व., दिने- न. लिं. स. वि. ए. व. of दिनम्- a day- दिने दिने- every day, वरम्- better than, preferable to, rather than, -अव्यय

**अशक्तस्तु भवेत्साधुर्ब्रह्मचारी च निर्धनः।**
**व्याधिष्ठो देवभक्तश्च वृद्धा नारी पतिव्रता**॥१७.६॥

अशक्तः तु साधुः भवेत्। निर्धनः ब्रह्मचारी च (भवेत्)।व्याधिष्ठः देवभक्तः च (भवेत्। वृद्धा नारी पतिव्रता (भवेत्)॥

A weak person becomes a virtuous man. A poor person remains a bachelor. A sick person becomes a devotee of a God. An old woman becomes faithful to her husband.

*Many people have no choice in life because of their unfortunate circumstances.*

अशक्तः- a weak person, incapable man- शक्तः- capable, competent-person- (शक्त- क. भू. धा. वि. of शक्- शक्नोति ५ ग. प. प. to be able)- न शक्तः- अशक्तः- नञ् तत्पुरुष स., साधुः- a sage, good virtuous man, pious person, निर्धनः- a poor person, one without wealth- धनम्- wealth, property- निर्गतम् धनम् यस्मात् सः- बहुव्रीहि स., ब्रह्मचारी (ब्रह्मचारिन्)- a religious, celibate student, ब्रह्मन्- न. लिं.- the Supreme being Vedas, sacred texts, celibacy, chastity- चारिन्- Follower, walker ब्रह्मन: चारिन्-षष्ठी तत्पु. स., व्याधिष्ठः- a sick person, one suffering with ailment- व्याधिः- sickness, ailment- व्याधिना ग्रस्तः यः सः- व्याधिष्ठः- बहुव्रीहि स., देवभक्तः- a devotee of God- देवः- god, भक्तः- a devotee- (भक्त- क. भू. धा. वि. of भज्- भजति-ते १ ग. उ. प. to worship, attend upon, serve)- देवस्य भक्तः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., वृद्धा- old, aged- वृद्ध- क. भू. धा. वि. of वृध्- वर्धते १ ग. आ. प. to grow, increase, age, नारी- woman, female, पतिव्रता- a devoted, faithful, loyal wife- पतिः- a husband, master, व्रतः/व्रतम्- a religious act, devotion, a vow- पतौ व्रता या सा- बहुव्रीहि स.- all in स्त्री. लिं. प्र. वि. ए. व., भवेत्- विध्यर्थ प्र. पु. ए. व. of भूष-भवति १ ग. प. प. to be, to exist, to become, तु- but, on one hand, as to, and now, च-and- both अव्यय

**राजा वेश्या यमो ह्यग्निस्तस्करो बालयाचकौ।**
**परदुःखं न जानन्ति अष्टमो ग्रामकण्टकः**॥१७.१९॥

राजा, वेश्या, यमः हि, अग्निः, तस्करः, बालयाचकौ (तथा) अष्टमः ग्रामकण्टकः (एते) परदुःखं न जानन्ति॥

A King, a prostitute, the God of death, the fire, a thief, a child and a beggar and the eighth- the village troublemaker do not understand the sorrow felt by others.

राजा (राजन्)- King, Ruler, यमः- Yama- the God of Death, अग्निः- fire, तस्करः- a thief, robber, अष्टमः- the eighth, ग्रामकण्टकः- a habitually troublesome person in a village- ग्रामः- village, community, कण्टकः- a troublesome person, thorn, source of annoyance- ग्रामस्य कण्टकः- ष. तत्पुरुष स.- all in पु. लि. प्र. वि. ए. व., वेश्या- a prostitute, courtesan, concubine- in स्त्री. लि. प्र. वि. ए. व., बालयाचकौ- a child and a begger- in पु. लि. प्र. वि. द्वि. व.- बालः- a child, याचकः- a begger, seeker of alm- बालः च याचकः च- द्वंद्व स., परदुःखम्- difficulty or hardship of others- परः- the other, another, दुःखम्- sorrow, trouble- परस्य दुःखम्- ष. तत्पुरुष स.-in न. लि. द्वि. वि. ए. व., जानन्ति- वर्त. प्र. पु. ब. व. of ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand, realise, हि- surely, certainly & न- no, not- both अव्यय

★★★★★★

# Chapter 7- That is the Way it is (वस्तुस्थिति:)

Cāṇakya has compiled many verses where he discusses the facts of life based upon human behaviour. They are discussed in this chapter.

**कान्तावियोगः स्वजनापमानो**
**ऋणस्य शेषं कुनृपस्य सेवा।**
**दरिद्रभावो विषमा सभा च**
**विनाग्निना ते प्रदहन्ति कायम्**॥२.१४॥ - त्रिष्टुभ

कान्तावियोगः, स्वजनापमानः, ऋणस्य शेषं, कुनृपस्य सेवा, दरिद्रभावः, विषमा सभा च, ते अग्निना विना कायं प्रदहन्ति॥

Loss of a beloved wife, humiliation from relatives, unpaid debts, serving a mean King, poverty ridden existence, unruly assembly- all these happenings scorch the body without actually getting burnt in fire.

कान्तावियोगः- loss of beloved wife- कान्ता- स्त्री. लिं.- beloved woman, wife, वियोगः- separation, loss- कान्तायाः वियोगः- ष. तत्पुरुष स., स्वजनापमानः- humiliation from one's own people- स्व- one's own, self, जनः- people, अपमानः- humiliation insult- स्वस्य जनः- स्वजनः- ष. तत्पुरुष स. & स्वजनेन अपमानः- स्वजनापमानः- तृ. तत्पुरुष स. & दरिद्रभावः- poverty ridden existence- दरिद्र- adjctv- distressed, poor, भावः- existence, state- दरिद्रः भावः- दरिद्रभावः- वि. पू. प. कर्मधारय स.- all in पु. लिं. प्र. वि. ए. व., ऋणस्य- न. लिं. ष. वि. ए. व. of ऋणम्- debt, obligation, शेषम्- balance, remainder- in न. लिं. प्र. वि. ए. व., कुनृपस्य- पु. लिं. ष. वि. ए. व. of कुनृपः- a bad King, Ruler- कु- अव्यय- prefix implies bad, mean- नृ- a man, a person- नृण् पाति इति- नृपः- उपपद तत्पुरुष स. & कुत्सितः नृपः- कुनृपः- प्रादि कर्मधारय स., सेवा- service, attendance, विषमा- troublesome, rough, painful, course, सभा- court, assembly, council, gathering- all in स्त्री. लिं. प्र. वि. ए. व., ते- they- in पु. लिं. प्र. वि. ब. व. of तद्- he, अग्निना- in पु. लिं. तृ. वि. ए. व. of अग्निः- fire, कायम्- in पु/न. लिं. द्वि. वि. ए. व. of कायः, कायम्- body, प्रदहन्ति- वर्त. प्र. पु. ब. व. of प्र+ दह्- to scorch badly, burn completely- (दह्- दहति १ ग. प. प. to burn, scorch) च- and & विना- without, - both अव्यय

**गृहीत्वा दक्षिणां विप्रास्त्यजन्ति यजमानकम्।**
**प्राप्तविद्या गुरुं शिष्या दग्धारण्यं मृगास्तथा**॥२.१८॥

विप्राः दक्षिणां गृहीत्वा यजमानकं त्यजन्ति। प्राप्तविद्या: शिष्याः गुरुं (त्यजन्ति) तथा दग्धारण्यं मृगाः (त्यजन्ति)॥

The priests leave the host after receiving their fees. The students leave their teacher after having received their training. Similarly, the wild animals abandon a forest that is burnt down.

विप्राः, शिष्याः & मृगाः- पु. लिं. प्र. वि. ब. व. of विप्रः- officiating priest, शिष्यः- disciple, pupil, student & मृगः- an animal, दक्षिणाम्- स्त्री. लिं. द्वि. वि. ए. व. of दक्षिणा- fee or present offered to a priest on conclusion of the religious rite, गृहीत्वा- after getting hold of, after acceptance- पू. का. वा. त्वान्त धा. सा. अव्यय of ग्रह्- गृह्णाति- गृह्णीते ९ ग. उ. प. to take hold of, seize, यजमानकम् & गुरुम्- both in पु. लिं. द्वि. वि. ए. व. of यजमानकः- relationship with the host, यजमानः- the head of the family, a host, patron, - क- suffix implies relationship, belonging & गुरुः- teacher, elder, father, त्यजन्ति- वर्त. प्र. पु. ब. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, प्राप्तविद्या- the knowledge or expertise having obtained- in स्त्री. लिं. प्र. वि. ए. व.- प्राप्त- having obtained, gained- क. भू. धा. वि. of प्र+ आप्- to get, obtain- (आप्- आप्नोति ५. ग. प. प. to get) विद्या- knowledge, education- प्राप्ता विद्या- प्राप्तविद्या- वि. पू. प. कर्मधारय स., दग्धारण्यम्- burnt or scorched forest- दग्ध- burnt, scorched- क. भू. धा. वि. of दह्- दहति १ ग. प. प. to burn, scorch, अरण्यम्- forest, wilderness- दग्धम् अरण्यम्- दग्धारण्यम्- वि. पू. प.कर्मधारय स.- in न. लिं. द्वि. वि. ए. व., तथा- similarly- अव्यय

**कस्य दोषः कुले नास्ति व्याधिना को न पीडितः।**
**व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम्**॥३ .१॥

पाठभेद : कस्य सौख्यं निरन्तरम्--> श्रियः कस्य निरन्तराः ?

कस्य कुले दोषः न अस्ति? कः व्याधिना न पीडितः (अस्ति)? केन व्यसनं न प्राप्तम् (अस्ति)? कस्य निरन्तरं सौख्यम् (अस्ति)? (कस्य श्रियः निरन्तराः सन्ति?)

Whose family is without any blemish? Who has not been sick with disease? Who has never faced any misfortune? Who has enjoyed perpetual happiness? (Or wealth or prosperity)

कः, केन & कस्य- प्र. वि., तृ. वि. & ष. वि.- ए. व. of किम्- पु. लिं.- who, कुले- न. लिं. स. वि. ए. व. of कुलम्- family, race, दोषः- fault, blemish, defect & पीडितः- one who suffered, troubled- पीडित- क. भू. धा. वि of पीड्- पीडयति- ते १० ग. उ. प. to torment, trouble- both in पु. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. - to be, to exist, व्याधिना- स्त्री. लिं. तृ. वि. ए. व. of व्याधि- sickness, disease, व्यसनम्- misfortune, calamity, bad time & प्राप्तम्- got, received- प्राप्त- क. भू. धा. वि of प्र+ आप्- to get, receive- (आप्- आप्नोति ५ ग. प. प. to obtain)- both in- न. लिं. द्वि. वि. ए. व., निरन्तरम्- निर्- अव्यय- prefix implies

without, away from अन्तरम्- interval, term, period & सौख्यम्- happiness, well-being- both in न. लिं. प्र. वि. ए. व., न- no, (श्रियः & निरन्तराः- स्त्री. लिं. प्र. वि. ब. व. of श्री- wealth, prosperity & निरन्तर-perpetual, always)

**आचारः कुलमाख्याति देशमाख्याति भाषणम्।**
**सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम्**॥३.२॥

आचारः कुलम् आख्याति। भाषणं देशम् आख्याति। सम्भ्रमः स्नेहम् आख्याति (तथा) वपुः भोजनम् आख्याति॥

The conduct (of a person) reveals his upbringing (family). His/her talk indicates his/her country (of birth). Receiving hospitality shows affection. His/her body figure indicates his /her eating habits.

आचारः- conduct, behaviour, custom & सम्भ्रमः- respect, zeal, hospitality, confusion, pleasant surprise- both in पु. लिं. प्र. वि. ए. व., वपुः (वपुस्)- body, form, figure & भाषणम्- talk, speech both in न. लिं. प्र. वि. ए. व., कुलम्- race, family & भोजनम्- food, eating- both in न. लिं. द्वि. वि. ए. व., देशम्- place, region, country & स्नेहम्- affection, love, friendship- both in पु. लिं. द्वि. वि. ए. व., आख्याति- वर्त. प्र. पु. ए. व. of आ+ ख्या- to declare, reveal, communicate- (ख्या- ख्याति २ ग. प. प. to tell)

**उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्।**
**मौने च कलहो नास्ति नास्ति जागरिते भयम्**॥३.११॥

उद्योगे दारिद्र्यं न अस्ति। जपतः पातकं न अस्ति। मौने च कलहः न अस्ति (तथा) जागरिते भयं न अस्ति॥

There is no poverty for an industrious person. There is no sin for a person who prays. There is no quarrel if one keeps quite. There is no fear for an attentive person.

उद्योगे, मौने & जागरिते- all in पु/न. लिं. स. वि. ए. व. of उद्योगः- effort, industry, work, exertion, मौनम्- silence, keeping quiet & जागरितः- adjctv- one who is awake- जागरित- क. भू. धा. वि. of जागृ- जागर्ति २ ग. प. प.- to be awake, watchful, attentive, दारिद्र्यम्- poverty, indigence, भयम्- fear, dread & पातकम्- sin, crime- all in न. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, जपतः- in पु. लिं. ष. वि. ए. व. of जपत्- one who is engaged in changing ( God's name)- कर्तरि वर्त. का. वा. धा. सा. वि. of जप्- जपति १ ग. प. प. to chant (pray), कलहः- quarrel, strife- in पु. लिं. प्र. वि. ए. व., न- no, not, च- and- both अव्यय

**सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः।**
**सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत्**॥४.११॥

राजानः सकृत् जल्पन्ति। पण्डिताः सकृत् जल्पन्ति। कन्याः सकृत् प्रदीयन्ते। एतानि त्रीणि सकृत् सकृत् (भवन्ति)॥

Kings give an order (instruct) only once. The scholars (learned people) speak out only once. Daughters are given away (in marriage) only once. All these three things happen only once.

राजानः & पण्डिताः- पु. लिं. प्र. वि. ब. व. of राजन्- King & पण्डित- learned, scholar, expert, कन्याः- स्त्री. लिं. प्र. वि. ब. व. of कन्या- daughter, girl, एतानि & त्रीणि- न. लिं. प्र. वि. ब. व. of एतद्- this, it & त्रि- three, जल्पन्ति- वर्त. तृ. पु. ब. व. of जल्प्- जल्पति १ ग.प. प. to speak, talk, utter, प्रदीयन्ते- कर्मणि प्रयोग तृ. पु. ब. व. of प्र+ दा- to give away, offer- (ददाति-दत्ते ३ ग. उ. प. to give), सकृत्- अव्यय- only once

**कुग्रामवासः कुलहीनसेवा,**
**कुभोजनं क्रोधमुखी च भार्या।**
**पुत्रश्च मूर्खो विधवा च कन्या,**
**विनाग्निमेते प्रदहन्ति कायम्**॥४.८॥ -त्रिष्टुभ

कुग्रामवासः, कुलहीनसेवा, कुभोजनं, क्रोधमुखी च भार्या, पुत्रः च मूर्खः, विधवा च कन्या, एते, विना अग्निं, कायं प्रदहन्ति ॥

Living in a bad village, serving a person from bad family, eating very bad food, a wife with an angry mouth, having a stupid son and a widowed daughter- these six things burn the body without fire.

कुग्रामवासः- stay in a wretched village- कु- अव्यय- prefix implies: bad, deficiency, littleness, ग्रामः- village, वासः a stay, residence- कुत्सितः ग्रामः- कुग्रामः- प्रादि कर्मधारय स. & कुग्रामे वासः- कुग्रामवासः- स. तत्पुरुष स., पुत्रः- son, child, मूर्खः- stupid, foolish- all in पु. लिं. प्र. वि. ए. व., कुलहीनसेवा- serving a person of low/mean family background- कुलम्- family, हीन- mean, low, devoid of, defective, सेवा- service, attendance- हीनम् कुलम् यस्य सः- कुलहीनः- बहुव्रीहि स. & कुलहीनस्य सेवा- ष. तत्पुरुष स., क्रोधमुखी- a woman with a angry face- क्रोधम्- anger, मुखम्- face, head, क्रोधम् मुखे यस्याः सा- क्रोधमुखी- बहुव्रीहि स., भार्या- wife, विधवा- a widow- वि- अव्यय- as a prefix it expresses separation, disjunction, धवः- a husband, man- विगतः धवः यस्याः सा- बहुव्रीहि स., कन्या- daughter, girl- all in स्त्री. लिं. प्र. वि. ए. व., कुभोजनम्- a hopeless meal, bad lunch- भोजनम्- a meal, lunch, food- कुत्सितम् भोजनम्- प्रादि कर्मधारय स.- in न. लिं. प्र. वि. ए. व., एते (एतद्) & षट्- both in पु. लिं. प्र. वि. ब. व., अग्निम् & कायम्- both in पु. लिं. द्वि. वि. ए. व. of अग्निः- fire & कायः- the body, विना

अग्निना- in पु. लिं. तृ. वि. ए. व. of अग्निः- fire, प्रदहन्ति- वर्त. प्र. पु. ब. व. of प्र+ दह्- scorch, torment- (दह्- दहति १ ग. प. प. to burn), च-and & विना- without, devoid of- both अव्यय

**एकोदरसमुद्भूता एक नक्षत्र जातकाः।**
**न भवन्ति समाः शीले यथा बदरिकण्टकाः**॥५.४॥

एकोदर-समुद्भूताः, एक नक्षत्र जातकाः, समाः शीले न भवन्ति, यथा बदरिकण्टकाः॥

(Persons) born out of the same womb and born under the same star constellation (with same horoscope) may not evolve with same qualities and nature! (Look at) the (edible) fruits and (hurting) thorns of Jujube tree!

एकोदरसमुद्भूताः, जातकाः, समाः & बदरिकण्टकाः -पु. लिं. प्र. वि. ब. व. of एकोदरसमुद्भूत- born out of same womb, एक-one, single, उदर- stomach, womb, एकः उदरः-एकोदरः - कर्मधारय स., समुद्भूत-born, spring up -क. भू. धा. वि. of सं+उद्+ भू- (भू-भवति १ ग. प. प. to be, exist), एकोदरे समुद्भूतः- एकोदरसमुद्भूतः -स. तत्पुरुष स., जातक-adjctv-born, produced, horoscope, सम-adjctv-equal, similar & बदरिकण्टक-jujube fruit and thorn-बदरिः च कण्टकः च -द्वंद्व स., बदरिः -(बेर in Hindi/ बोर in Marathi), एक नक्षत्र- (under) one star constellation, शीले- स. वि. ए. व. of शीलम्-न. लिं- character, nature, quality, न- no, not, भवन्ति-वर्त. प्र पु. ब. व. of भू-भवति, यथा-अव्यय- like, similar to

**मूर्खाणां पण्डिता द्वेष्या अधनानां महाधनाः।**
**वाराङ्गनाः कुलस्त्रीणां सुभगानां च दुर्भगाः**॥५.६॥

मूर्खाणां पण्डिताः, अधनानां महाधनाः, कुलस्त्रीणां वाराङ्गनाः (तथा) सुभगानां दुर्भगाः च द्वेष्याः (भवन्ति)॥

Stupid people hate the wise men. Poor people envy the wealthy.
Courtesans dislike women from noble household. Unlucky women envy lucky women.

मूर्खाणाम् & अधनानाम्- both in पु. लिं. ष. वि. ब. व. of मूर्खः- a stupid or foolish person & अधनः- a poor person, Person without wealth- धनम्-न. लिं.- wealth, money, धनात् विहीनः यः सः- अधनः- बहुव्रीहि स., सुभगानाम् & कुलस्त्रीणाम्- both in स्त्री. लिं. ष. वि. ब. व. of सुभगा- a lucky woman , a favourite wife, an honoured mother- सु- अव्यय- prefix implies: good, well, plenty, भगः- fame, glory, good fortune, happiness- (सुष्ठु भगः यस्याः सा- सुभगा- बहुव्रीहि स.) & कुलस्त्री- a woman from a good noble family- (कुलीन- adjctv- of high descent, of a good family- कुलीना स्त्री - कुलस्त्री- कर्मधारय स.), पण्डिताः & महाधनाः- both in

पु. लिं. प्र. वि. ब. व. of पण्डितः- learned, scholar, wise & महाधनः- one having great wealth- महत्- adjctv- great, big, plenty- महत् धनम्- महद्धनम्- वि. पू. प. कर्मधारय स. & महद्धनम् यस्य सः- महाधनः- बहुव्रीहि स., वाराङ्गानाः & दुर्भगाः- both in स्त्री. लिं. प्र. वि. ब. व. of वाराङ्गाना- a courtesan, a common woman, a woman of multitude- (वारः- multitude, large number, अङ्गाना- woman- वारा अङ्गाना- वाराङ्गाना- वि. पू. प. कर्मधारय स.) & दुर्भगा- unlucky or unfortunate woman- दुष्टः भगः यस्याः सा- दुर्भगा- बहुव्रीहि स., द्वेष्याः- in पु/स्त्री. लिं. प्र. वि. ब. व. of द्वेष्यः/द्वेष्या- to be hated, disliked, to have hostility, enmity- द्वेष्य (also द्वेष्टव्य & द्वेषणीय)- क. वि. धा. सा. वि. of द्विष्- द्वेष्टि- द्विष्टे २ ग. उ. प. to hate, dislike, be hostile towards, च- and- अव्यय

**वृथा वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनम्।**
**वृथा दानं धनाढ्येषु वृथा दीपो दिवापि च**॥५ .१६॥

समुद्रेषु वृष्टिः वृथा (भवति) । तृप्तेषु भोजनम् वृथा (भवति)। धनाढ्येषु दानं वृथा (भवति)। (तथा) दिवा दीपः अपि च (वृथा भवति) ॥

A rainfall in oceans serves no purpose. Offering food to a satisfied person after a full meal is useless. Donation to a person who is abundantly rich is meaningless. Similarly lighting a lamp during the daytime is of no use.

समुद्रेषु, तृप्तेषु & धनाढ्येषु -all in पु. लिं. स. वि. ब. व. of समुद्रः- sea, ocean, तृप्तः- one who is satiated, contented, satisfied- तृप्त- क. भू. धा. वि. of- तृप्- तृप्यति, तृप्नोति & तृपति ४, ५ & ६ ग. प. प. to be satisfied, satiated, pleased & धनाढ्यः- abundantly rich- धनम्- न. लिं.- wealth, money, riches, आढ्य- adjctv- possessing abundantly, rich in- यस्य धन: आढ्य: अस्ति स:- बहुव्रीहि स.- धनाढ्यः, वृष्टिः- स्त्री. लिं.- Shower of rain, rainfall, भोजनम्- feeding, lunch & दानम्- giving, charity, donation- both in न. लिं. प्र. वि. ए. व., दीपः- lamp- in पु. लिं. प्र. वि. ए. व., वृथा- no purpose, in vain, useless, unnecessary, दिवा- at day time, by day, अपि- also, even, च- and

**न पश्यति च जन्मान्धः कामान्धो नैव पश्यति।**
**न पश्यति मदोन्मत्तो स्वार्थी दोषान्न पश्यति**॥६.८॥

जन्मान्धः च न पश्यति। कामान्धः (अपि) न एव पश्यति। मदोन्मत्तः न पश्यति। (तथा) स्वार्थी दोषान् न पश्यति॥

A born blind person cannot see the external world. A lustful person is also blind (irrational). An excessively intoxicated person cannot see (has no control over his actions). A selfish person does not see any faults (in himself or his actions).

जन्मान्धः- one who is born blind- जन्मन्- न. लि.- birth, अन्धः- पु. लिं.- blind, devoid of sight- जन्मेन अन्धः- जन्मान्धः- तृ तत्पुरुष स., कामान्धः- one who is blind with lust, desire of carnal gratification- कामः- lust, desire of carnal gratification, कामेन अन्धः- कामान्धः- तृ तत्पुरुष स., मदोन्मत्तः- one who is excessively arrogant with pride- मदः- pride, arrogance, conceit, उन्मत्तः- intoxicated, wild, puffed up, insane, mad- क. भू. धा. वि. of उद्+ मद्- to be excessively arrogant- (मद्- माद्यति- ४ ग. प. प. to be intoxicated, mad)- मदेन उन्मत्तः- तृ. तत्पुरुष स. & स्वार्थी (स्वार्थिन्)- one who is purely selfish- स्व- pronominal adjctv- one's own, oneself, अर्थिन्- one who seeks, solicits- स्वस्य अर्थिन्- स्वार्थिन्- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., दोषान्- पु. लिं. द्वि. वि. ब. व. of दोषः- a fault, blemish, offence, guilt, पश्यति- वर्त. प्र. पु. ए. व. of दृश्- १ ग. प. प. to see, look at, न- no, not, च- and, एव- just, merely only- all अव्ययs

**कुराजराज्येन कुतः प्रजासुखं**
**कुमित्रमित्रेण कुतोऽस्ति निवृत्तिः।**
**कुदारदारैश्च कुतो गृहे रतिः**
**कुशिष्यमध्यापयतः कुतो यशः**॥६.१४॥- जगति

कुराजराज्येन प्रजासुखं कुतः (अस्ति)? कुमित्रमित्रेण निवृत्तिः कुतः अस्ति? कुदारदारैः च कुतः गृहे रतिः (अस्ति)? कुशिष्यम् अध्यापयतः यशः कुतः (अस्ति)?

How can the people be happy in a country ruled by a bad King? How can one obtain peace of mind with a bad friend? How can a husband find happiness in his home with an ill-behaved wife? How can one achieve success by educating a bad student?

कुराजराज्येन & कुमित्रमित्रेण- both in न. लिं. तृ. वि. ए. व. of कुराजराज्यम्- a country ruled by a bad king- कु- अव्यय- prefix implies bad, harsh, wicked, राजन्- पु. लिं- king, राज्यम्- न. लि.- country, state- कुत्सितः राजा- कुराजा- प्रादि कर्मधारय स. & कुराज्ञः राज्यम्- कुराजराज्यम्- ष. तत्पुरुष स. & कुमित्रमित्रम्- a friend who is a bad friend- मित्रम्- न. लि.- a friend- कुत्सितं मित्रम्- कुमित्रम्- a bad friend- प्रादि कर्मधारय स. & कुमित्रमित्रम् -यस्य मित्रम् कुमित्रम् अस्ति सः- बहुव्रीहि स., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, कुदारदारैः- in पु. लिं. तृ. वि. ब. व. of कुदारदारः- one with ill-behaved wife- दारा- स्त्री. लिं-(always in ब. व.)- कुत्सिताः दाराः- कुदाराः- प्रादि कर्मधारय स. & कुदाराः दाराः यस्य सः- कुदारदारः- बहुव्रीहि स., गृहे- in न. लिं. स. वि. ए. व. of गृहम्- house, home, कुशिष्यम्- in न. लिं. द्वि. वि. ए. व. of कुशिष्यः- a hopelessly bad student- शिष्यः- student, disciple- कुत्सितः शिष्यः- कुशिष्यः- प्रादि कर्मधारय स., अध्यापयतः- from educating or instructing- अध्यापनम्- teaching, training- (प्रयोजक of अधि+ इ- २ ग. प. प.- अध्यापयति)- यतः (यतस्)- अव्यय- a suffix implies: by which, for, निवृत्तिः- peace of mind, rest, reirement, escape (नि+ वृत्- to retreat, to escape, to be freed or absolved

from- १ ग. आ. प.- वर्तते) & रतिः- delight, pleasure, attachment or devotion to- (रम्- रमते १ ग. आ. प. to be pleased, to get attached to)- both in न. लिं. प्र. वि. ए. व., प्रजासुखम्- happiness or satisfaction of the subjects- प्रजा- स्त्री. लिं.- subjects, people, mankind, सुखम्- न. लिं.- happiness or satisfaction- प्रजायाः सुखम्- ष. तत्पुरुष स. & यशः यशः(स्)- fame, name, glory, success- both in न. लिं. प्र. वि. ए. व., कुतः (कुतस्)- from where, whence, how, in what mannar, च- and- both अव्ययs

**बाहुवीर्यं बलं राज्ञो ब्राह्मणो ब्रह्मविद् बली।**
**रूपयौवनमाधुर्यं स्त्रीणां बलमुत्तमम्**॥७.११॥

राज्ञः बलं बाहुवीर्यं (अस्ति)। ब्रह्मविद् ब्राह्मणः बली (भवति)। स्त्रीणां रूपयौवनमाधुर्यम् उत्तमम् बलम् (अस्ति)॥

The strength of a King is the power of his arms. A Brahmin's strength is in his knowledge of all-pervading Self. A woman's strength is in her physical beauty, youth and pleasant nature.

राज्ञः- in पु. लिं. ष. वि. ए. व. of राजन्- a King, ruler, बाहुवीर्यम्- muscle power, prowess or valour of arms- बाहुः- the arm, fore-arm, वीर्यम्- heroism, prowess, valour- बाह्वोः वीर्यम्- ष. तत्पुरुष स., बलम्- strength, power, might, रूपयौवनमाधुर्यम्- beautiful form, youthfulness and pleasantness- रूपम्- beautiful form, appearance, यौवन- youth, youthfulness, माधुर्यम्- pleasantness, sweetness- रूपम् च यौवनम् च माधुर्यम् च- द्वंद्व स.,उत्तमम्- the superior, best, excellent- all in न. लिं. प्र. वि. ए. व., ब्रह्मविद्- ब्रह्मन्- न. लिं- the Supreme Being, regarded as impersonal and divested of all quality and action, all-pervading soul and spirit of the universe, विद्- knowledge, understanding- ब्रह्मनः विद् - ष.तत्पुरुष स., ब्राह्मणः- a member of a priestly class, theologian, बली (बलिन्)- adjctv- one who is powerful, mighty- both in पु. लिं. प्र. वि. ए. व., स्त्रीणाम्- in स्त्री. लिं. ष. वि. ब. व. of स्त्री- a woman,

**गम्यते यदि मृगेन्द्रमन्दिरं,**
**लभ्यते करिकपालमौक्तिकम्।**
**जम्बुकालयगते च प्राप्यते,**
**वत्सपुच्छखरचर्मखण्डनम्**॥७.१८॥ -त्रिष्टुभ

यदि (केन अपि) मृगेन्द्रमन्दिरं गम्यते, (तदा तेन) करिकपालमौक्तिकं लभ्यते। (यदि) जम्बुकालयगते च (तेन) वत्स-पुच्छ-खर-चर्म-खण्डनं प्राप्यते॥

If one goes into an abode of the King of animals (Lion), he will get a pearl from the skull of an elephant. If one goes to a dwelling of a jackal, he will get only pieces of a tail of a calf or hide of an ass.

*The message here is that one should take risk and aim for high achievements. Higher the risks, higher the rewards!*

मृगेन्द्रमन्दिरम्- dwelling king of all animals- मृगः- an animal, इन्द्रः- lord, king, मन्दिरम्- abode, house, dwelling- मृगाणाम् इन्द्रः- मृगेन्द्रः & मृगेन्द्रस्य मन्दिरम्- मृगेन्द्रमन्दिरम्- ष. तत्पुरुष स., करिकपालमौक्तिकम्- a pearl from the skull of an elephant- करिन्- पु. लिं- an elephant, कपाल- skull, मौक्तिकम्- pearl- करिनः कपालः- करिकपालः- ष. तत्पुरुष स. & करिकपालस्थितम् मौक्तिकम्- करिकपालमौक्तिकम्- म. प. लोपी स., वत्सपुच्छखरचर्मखण्डनम्- वत्स- a calf, पुच्छ- a tail, hairy tail- वत्सस्य पुच्छम्- वत्सपुच्छम् & खरः- an ass, mule, चर्मन्- न. लिं- skin, hide- खरस्य चर्म- खरचर्म- both ष.तत्पुरुष स., वत्सपुच्छम् च खरचर्म च- वत्सपुच्छखरचर्म- द्वंद्व स., खण्डनम्- cutting, piece- वत्सपुच्छखरचर्मनः खण्डनम्- वत्सपुच्छखरचर्मखण्डनम्- ष. तत्पुरुष स.- all in न. लिं. द्वि. वि. ए. व., गम्यते, लभ्यते & प्राप्यते- all in कर्मणि प्रयोग प्र. पु. ए. व. of गम्- गच्छति १ ग. प. प. to go, approach, लभ्- लभते १ ग. आ. प. to get, obtain & प्र+ आप्- to get, obtain- (आप्- आप्नोति ५ ग. प. प. to get, obtain), जम्बुकालयगते- in पु. लिं. स. वि. ए. व. of जम्बुकालयगतः- one who has gone to abode of a jackal- जम्बुकः- jackal, fox, आलय- house, abode, गतः- gone, reached- गत- क. भू. धा. वि. of गम्- (see above)- जम्बुकस्य आलयः- जम्बुकालयः- ष. तत्पुरुष स. & जम्बुकालये गतः- -जम्बुकालयगतः- स. तत्पुरुष स. & यदि- if, in case, च- and- both अव्यय

**दीपो भक्षयते ध्वान्तं कज्जलं च प्रसूयते।**
**यदन्नं भक्षयेन्नित्यं जायते तादृशी प्रजा॥८.३॥**

दीपः ध्वान्तं भक्षयते कज्जलम् च प्रसूयते। यद् अन्नम् नित्यम् भक्षयेत्, तादृशी प्रजा जायते॥

The lamp consumes darkness and produces black soot (eye shadow). One produces children according to what food is consumed every day.

*Here, the food is a metaphor for the way a person earns his livelihood and how he utilizes it. The results of his daily activities will bear fruits, good or bad, depending upon how the money was earned and used.*

दीपः- lamp- पु. लिं. प्र. वि. ए. व., ध्वान्तम्, कज्जलम्, यद् & अन्नम्- न. लिं. द्वि. वि. ए. व. of ध्वान्त- darkness, कज्जल- soot, collyrium, यद्- what, which & अन्न- food, भक्षयते, प्रसूयते & जायते- वर्त. तृ. पु. ए. व. of भक्ष्- भक्षयति-ते १० ग. उ. प. to eat, consume, प्र+सू- bring forth, beget, produce -( सू-सूते २ ग. आ. प. & सूयते ४ ग. आ. प. to beget, produce) & जन्- ४ ग. आ. प. to be produced, to be born, च-

and, नित्यम्- अव्यय- every day, daily, constantly, भक्षयेत्- विध्यर्थ प्र. पु. ए. व. of भक्ष्- भक्षयति-ते १० ग. उ. प. to eat, consume, तादृशी & प्रजा- स्त्री. लिं. प्र. वि. ए. व. of तादृक्ष-तादृश्- adjctv- like that, such like & प्रजा- production, procreation, children, offspring

**अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।**
**भोजने चामृतं वारि भोजनान्ते विषप्रदम्** ॥८.७॥

वारि अजीर्णे भेषजम् (अस्ति)। वारि जीर्णे बलप्रदम् (अस्ति)। वारि भोजने च अमृतम् (अस्ति)। (तथा वारि) भोजनान्ते विषप्रदं (भवति)॥

Water is a remedy for indigestion. Water gives energy after full digestion. Water is the nectar of immortality. However, after completion of a meal, drinking water is like a poison!

वारि- water, भेषजम्- medicine, remedy, बलप्रदम्- provider of strength or vigour- बलम्- strength, vigour- बलम् प्रदाति इति- बलप्रदम्- उपपद तत्पुरुष स., अमृतम्- nectar of immortality & विषप्रदम्- one like a poison- विषम्- poison- विषम् प्रदाति इति- विषप्रदम्- उपपद तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., अजीर्णे, जीर्णे, भोजने & भोजनान्ते- all in न. लिं. स. वि. ए. व. of अजीर्णम्- indigestion, जीर्णम्- digested- जीर्ण- क.भू. धा. वि. of जृ(दीर्घ)- १, ४, ९ प. प. & १० उ. प.- जरति, जीर्यति, जृणाति & जारयति-ते - to be consumed, digested, dissolved, to grow old, wear out- न जीर्णम्- अजीर्णम्- नञ् तत्पुरुष स., भोजनम्- meal, taking food & भोजनान्तम्- at the end of a meal- भोजनस्य अन्तम्- भोजनान्तम्- ष. तत्पुरुष स., च- and- अव्यय

**हतं ज्ञानं क्रियाहीनं हतश्चाज्ञानतो नरः।**
**हतं निर्णायकं सैन्यं स्त्रियो नष्टा ह्यभर्तृकाः**॥८.८॥

क्रियाहीनं ज्ञानं हतं (भवति)। अज्ञानतः नरः हतः च (भवति)। निर्-नायकं सैन्यं हतं (भवति)। (तथा) अभर्तृकाः स्त्रियः हि नष्टाः (भवन्ति)॥

Knowledge without its application is lost. An ignorant person gets destroyed. An army without a commander gets perished. Women without protectors are ruined.

क्रियाहीनम्- one without action or performance- क्रिया- स्त्री. लिं.- performance, action, labour, हीनम्- devoid of, without- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon- क्रियाया: हीनम्- क्रियाहीनम्- ष. तत्पुरुष स., ज्ञानम्- knowledge, learning, हतम्- killed, destroyed, ruined- हत- क. भू. धा. वि. of हन्- हन्ति- २ ग. प. प. to kill, strike, destroy, निर्णायकम्- one without a leader- निर्- अव्यय- prefix implies: devoid of, without- नायकः- leader, master,

conductor- नायकेन विना - निर्णायकम्- तृ. तत्पु. स., सैन्यम्- army, troop- all in न. लिं. प्र. वि. ए. व., नरः- man, human, person & हतः- ruined, killed- हत- (see above)-both in पु. लिं. प्र. वि. ए. व., अभर्तृकाः, स्त्रियः & नष्टाः- all in स्त्री. लिं. प्र. वि. ब. व. of अभर्तृका- a woman without a protector, provider, husband- भर्तृ- protector, supporter, husband, न भर्तृका- अभर्तृका- नञ् तत्पुरुष स., स्त्री- a woman, female & नष्टा- ruined, destroyed- नष्ट- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, destroyed, अज्ञानतः- due to foolishness or stupidity- ज्ञानम्- knowledge, intelligence- न ज्ञानम्- अज्ञानम्- absence of knowledge, stupidity, foolishness- तस् or तः- suffix implies: from, by, (It is commonly substituted in place of पं. वि.) च- and, हि- indeed, surely, - both अव्यय

**वृद्धकाले मृता भार्या बन्धुहस्ते गतं धनम्।**
**भोजनं च पराधीनं तिस्रः पुंसां विडम्बनाः**॥८.९॥

वृद्धकाले मृता भार्या, बन्धुहस्ते गतं धनं, पराधीनं च भोजनं तिस्रः पुंसां विडम्बनाः (भविष्यन्ति)॥

These three things make life of a man painful- death of a wife in the old age, wealth taken away by relatives and dependence on others for a meal.

वृद्धकाले & बन्धुहस्ते- both in पु. लिं. स. वि. ए. व. of वृद्धकालः- oldage- वृद्ध- adjctv- old, aged, grown up- क. भू. धा. वि. of वृध्- वर्धते १ ग. आ. प. to grow, increase, prosper,

कालः- time, period- वृद्धः कालः- वृद्धकालः- वि. पू. प. कर्मधारय स. & बन्धुहस्तः- hand of relative or kinsman- बन्धुः- kinsman, relation, हस्तः- hand- बन्धोः हस्तः- बन्धुहस्तः- ष. तत्पुरुष स., मृता- dead, deceased- मृत- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die, perish & भार्या- wife- both in स्त्री. लिं. प्र. वि. ए. व., गतम्- gone, fallen into- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, pass, धनम्- wealth, money, valuable, पराधीनम्- depend on other, subservient- पर- adjctv- other, another, आधीन- dependent, subservient- परस्य आधीनम्- पराधीनम्- ष. तत्पुरुष स., भोजनम्- food, meal- all in न. लिं. प्र. वि. ए. व., पुंसाम्- in पु. लिं. ष. वि. ब. व. of पुंस्- man, human being, तिस्रः & विडम्बनाः- both in स्त्री. लिं. प्र. वि. ब. व. of त्रि- three & विडम्बना- distressing, paining, disappointing, mockery, च-and- अव्यय

**गुणो भूषयते रूपं शीलं भूषयते कुलम्।**
**सिद्धिर्भूषयते विद्यां भोगो भूषयते धनम्**॥८.१५॥

गुणः रूपं भूषयते। शीलं कुलं भूषयते। सिद्धिः विद्यां भूषयते। भोगः धनं भूषयते॥

A good virtue enhances the appearance of a person. An exemplary character dignifies one's family. Success (in any endeavour) celebrates one's education. Proper utilisation (enjoyment) brings grace to one's wealth.

गुणः- quality, virtue, merit, excellence, रूपम्- figure, appearance, beauty/handsomeness & भोगः- utility, enjoyment, experiencing- all in पु. लिं. प्र. वि. ए. व., शीलम्- character, nature behaviour, disposition, custom- in न. लिं. प्र. वि. ए. व., कुलम्- family, race, noble descent & धनम्wealth, money, riches- both in न. लिं. द्वि. वि. ए. व., सिद्धिः- accomplishment, fulfillment, success- in स्त्री. लिं. प्र. वि. ए. व., विद्याम्- in स्त्री. लिं. द्वि. वि. ए. व. of विद्या- knowledge, learning, education, expertise, भूषयते- प्रयोजक वर्त. प्र. पु. ए. व. of भूष्- to cause to enhance beauty, grace, adorn, decorate- भूष्- भूषति १ ग. प. प. to adorn, grace

**निर्गुणस्य हृतं रूपं दुःशीलस्य हृतं कुलम्।**
**असिद्धस्य हृता विद्या अभोगेन हृतं धनम्**॥८.१६॥

निर्गुणस्य रूपं हृतं (भवति)। दुःशीलस्य कुलं हृतं (भवति)।असिद्धस्य विद्या हृता (भवति), तथा) अभोगेन धनं हृतं (भवति)॥

The good appearance of a person without virtue(s) is taken away (quickly). The family of a person with bad character is tarnished. The education of an unsuccessful person is wasted. Wealth is destroyed if not enjoyed.

निर्गुणस्य, दुःशीलस्य & असिद्धस्य- all in पु. लिं. ष. वि. ए. व. of निर्गुणः- one who is devoid of any virtue, merit- गुणः- virtue, merit- निर्गुण: - निर्गता: गुणा: यस्मात् सः- प्रादि बहुव्रीहि & दुःशीलः -दुष्टम् शीलम् यस्य सः - प्रादि बहुव्रीहि स., दुःशीलः- one who is of a bad character- शीलम्- character, behaviour, nature- & असिद्धः- one who is a failure (in any achievement)- सिद्धः- one who is accomplished, successful- सिद्ध- क. भू. धा. वि. of सिध्- सिध्यति ४ ग. प. प. to be accomplished, successful- न सिद्धः- असिद्धः- नञ् तत्पुरुष स., हृतम्- destroyed, ruined, lost- हृत- क. भू. धा. वि. of हृ- हरति- ते- to carry, take away, रूपम्- appearance, beauty, कुलम्- family, race & धनम्- wealth, money, riches- all in न. लिं. प्र. वि. ए. व., हृता- (हृत) & विद्या- knowledge, expertise, education- both in स्त्री. लिं. प्र. वि. ए. व., अभोगेन- in पु. लिं. तृ. वि. ए. व. of अभोगः- non-utilisation, non-enjoyment- भोगः- enjoyment, utility- न भोगः- अभोगः- नञ् तत्पुरुष स.

**यस्मिन् रुष्टे भयं नास्ति तुष्टे नैव धनागमः।**
**निग्रहोऽनुग्रहो नास्ति स रुष्टः किं करिष्यति**॥९.९॥

यस्मिन् रुष्टे भयं न अस्ति, तुष्टे धनागमः न एव (भवति), सः रुष्टः किं करिष्यति? (सः) निग्रहः अनुग्रहः (अपि) न अस्ति॥

What will such an angry person do from whom there is no fear if he is angry and no acquisition of wealth if he is happy? He cannot punish you nor can he do you any favours.

यस्मिन्, रुष्टे & तुष्टे- all in पु. लिं. स. वि. ए. व. of यद्- who, रुष्टः- one who is angry & तुष्टः- one who is satisfied, pleased- both क. भू. धा. वि. of रुष्- रुष्यति ४ ग. प. प. to be angry, offended & तुष्- तुष्यति ४ ग. प. प.- to be pleased, satisfied, सः ( तद्)- he, धनागमः- gain of wealth- धनम्- न. लिं- wealth, money & आगमः- coming, arriving, acquisition (आ+ गम्-to come, १ ग. प. प.)- धनस्य आगमः- ष. तत्पुरुष स., निग्रहः- obstruction, check, control & अनुग्रहः- favour, obligation- (नि+ ग्रह्- to control & अनु+ ग्रह्- to favour, oblige- ग्रह्- गृह्णाति- गृह्णीते ९ ग. उ. प. to hold), रुष्टः- angry- all n पु. लिं. प्र. वि. ए. व., भयम्- fear, dread, danger- in न. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- to exist, to be & करिष्यति- द्वि. भविष्य प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, एव- only, just, न- no, not, किम्- a particle used in the sense of interrogation: what- all अव्यय

**दरिद्रता धीरतया विराजते**
**कुवस्त्रता शुभ्रतया विराजते।**
**कदन्नता चोष्णतया विराजते**
**कुरूपता शीलतया विराजते**॥९.१४॥- जगति

दरिद्रता धीरतया विराजते। कुवस्त्रता शुभ्रतया विराजते। कदन्नता चोष्णतया विराजते। कुरूपता शीलतया विराजते॥

Poverty shines with courage. Bad clothes shine with whiteness. Tasteless food tastes better when served hot. Ugliness is overshadowed by good character.

The suffix -ता indicates possession. दरिद्रता- poverty, कुवस्त्रता-having bad cloths, poor clothings, कदन्नता-having bad food, कुरूपता-having ugliness- all in स्त्री. लिं. प्र. वि. ए. व. of दरिद्र -poor, कुवस्त्र- Bad clothing, कदन्न- bad food, कुरूप - Ugaly. धीरतया, शुभ्रतया, उष्णतया, शीलतया -all in स्त्री. लिं. तृ. वि. ए. व. of धीरता-having courage, शुभ्रता- bright, white, उष्णता-having heat, warmness, शीलता-having good character, च- and, विराजते-वर्त. आ. प.प्र. पु. ए. व. of वि+राज्- to shine, look beautiful, to appeal, feel nice ( राज्-राजति-ते १ ग. उ. प. to shine, appear splendid, beautiful), कु, कद्-(अव्यय)- particles, prefix of these imply badness, deterioration, depreciation, littleness or 'want'. कुवस्त्र, कदन्न, कुरूप - all प्रादि कर्मधारय स.

**कवयः किं न पश्यन्ति किं न खादन्ति वायसाः।**
**मद्यपाः किं न जल्पन्ति किं न कुर्वन्ति योषितः**॥१०.४॥

कवयः किं न पश्यन्ति? वायसाः किं न खादन्ति? मद्यपाः किं न जल्पन्ति? योषितः किं न कुर्वन्ति?

What poets cannot see (imagine)? What crows do not eat? What drunkards do not babble? What women cannot achieve?

कवयः, वायसाः & मद्यपाः- पु. लिं. प्र. वि. ब. व. of कविः- a poet, a thinker, wise man, वायस- a crow & मद्यप- a drunk, intoxicated- मद्यम्- spirituous liquor, intoxicating drink- मद्यम् पिबति इति- उपपद तत्पुरुष स., पश्यन्ति, खादन्ति, जल्पन्ति & कुर्वन्ति- all in वर्त. प्र. पु. ब. व. of दृश्- पश्यति- १ ग. प. प. to see, behold, खाद्- खादति- १ ग. प. प. to eat, devour, जल्प्- जल्पति- १ ग. प. प. to speak inarticulately, babble, prattle & कृ- करोति- कुरुते- ८ ग. उ. प. to do, act, & योषितः- स्त्री. लिं. प्र. वि. ब. व. of योषित्- a woman, a girl, किम्- a interrogative particle: what, न- no, not- both अव्ययs

**एकवृक्षसमारूढा नाना वर्णा विहङ्गमाः।**
**प्रभाते दिक्षु दशसु यान्ति का तत्र वेदना** ॥१०.१५॥

नाना वर्णाः विहङ्गमाः, एकवृक्षसमारूढाः (सन्ति)। प्रभाते दशसु दिक्षु यान्ति का तत्र वेदना (परिदेवना)॥

Different species of birds assemble on a single tree (for a night halt). They fly away to ten different directions at the dawn of next morning. Why anguish over that?

*We meet many people at various functions such as a wedding. After the celebrations, we depart to our own homes without any further contacts with them ever. There is no reason to be sorrowful if that happens.*

विहङ्गमाः, एकवृक्षसमारूढाः & वर्णाः- पु. लिं. प्र. वि. ब. व. of विहङ्गमः- bird- (विहायस्- पु. लिं- sky, atmosphere- विहायसि गच्छति इति- उपपद तत्पुरुष स.), एकवृक्षसमारूढः- climbed upon (assembled) on a single tree- एकम्- one, single, वृक्षम्- tree, समारूढ- mounted, got upon- क. भू. धा. वि. of सम+आ+ रुह्- to mount, climb upon -(रुह्- रोहति १ ग. प. प. to grow, increase, rise)- एकम् वृक्षम्- एकवृक्षम्- वि. पू. प. कर्मधारय स. & एकवृक्षे समारूढः- एकवृक्षसमारूढः- स. तत्पुरुष स. & वर्णः- colour, hue, class, race, रूढः- क. भू. धा. वि of रुह्- रोहति. प्रभाते- न. लिं. स. वि. ए. व. of प्रभातम्- day break, dawn- प्रभात- क. भू. धा. वि. of प्र+ भा- to appear, to begin to dawn (भा- भाति २ ग. प. प. to shine), दशसु & दिक्षु- both in- स्त्री. लिं. स. वि. ब. व. of दशन्- ten & दिश्- direction, cardinal

point, यान्ति- वर्त. प्र. पु. ब. व. of या- याति २ ग. प. प. to go, to go to, का- what, why, वेदना- anguish, pain, agony - स्त्री. लिं. प्र. वि. ए. व., नाना- various, of different kind, manifold & तत्र- there, in that case- both अव्यय

**धनधान्यप्रयोगेषु विद्यासंग्रहणेषु च।**
**आहारे व्यवहारे च त्यक्तलज्जस्सुखीभवेत्**॥७.२॥

त्यक्तलज्जः धन-धान्य-प्रयोगेषु, विद्या-संग्रहणेषु, आहरे, व्यवहारे च सुखी भवेत्॥

A person who abandons normal rules of conduct becomes successful (happy) in acquiring wealth, food, knowledge, meals and business.

*One can be aggressive but should not employ illegal means in acquiring food, wealth or knowledge.Yes, he may be happy for some time with illegally aquired wealth but that will not last too long.*

धनधान्यप्रयोगेषु & विद्यासंग्रहणेषु- both in स. वि. ब. व. of धनधान्यप्रयोगः- पु. लिं.- acquiring wealth and grains- धनम्- wealth, money, धान्यम्-grains, प्रयोगः- application, use- धनम् च धान्यम् च- धनधान्यम्- द्वंद्व स. & धनधान्यस्य प्रयोगः- ष. तत्पुरुष स. & विद्यासंग्रहणम्- न. लिं.- collection of knowledge, acquisition of education- विद्या- knowledge, संग्रहणम्- collection- विद्यायाः संग्रहणम्- विद्यासंग्रहणम्- षष्ठी तत्पुरुष स., आहारे & व्यवहारे- both in पु. लिं. स. वि. ए. व. of आहार:- food, diet & व्यवहारः- business, dealing, त्यक्तलज्जः- one who has abandoned modesty- त्यक्त- abandoned, left, relinquished- क. भू. धा. वि. of त्यज्-त्यजति १ ग. प. प. to leave, abandon, quit, let go, लज्जा- modesty, shame- त्यक्ता लज्जा येन सः- बहुव्रीहि स. & सुखी (सुखिन्)- happy or satisfied person- both in पु. लिं. प्र. वि. ए. व.,भवेत्- विध्यर्थ. प्र. पु. ए. व. of भू- भवति १ ग. प. प.- to become, च- अव्यय

**राज्ञि धर्मिणी धर्मिष्ठाः पापे पापाः समे समाः।**
**राजानमनुवर्तन्ते यथा राजा तथा प्रजाः**॥१३. ८॥

धर्मिणी राज्ञि, (प्रजाः) धर्मिष्ठाः (भवन्ति)। पापे (राज्ञि), (प्रजाः) पापाः (भवन्ति)। समे (राज्ञि), (प्रजाः) समाः (भवन्ति)। (प्रजाः) राजानम् अनुवर्तन्ते। यथा राजा (भवति), तथा प्रजाः (भवन्ति)॥

If the King follows the right code of conduct (धर्म), the subjects will follow right code of conduct (धर्म). If the King is a sinner, the subjects will also be sinners. If the King is just, the subjects will also be just. The subjects follow the King. As is the King, so are (his) subjects.

धर्मिणी, राज्ञि, पापे, समे all-पु. लिं. सति सप्तमि वि. ए. व. of धर्मिन्-virtuous, pious, राजन्-king, पापिन्-sinful, wicked, सम-upright /just, प्रजाः, धर्मिष्ठाः पापाः, समाः - all-स्त्री. लिं. प्र. वि. ब. व. of प्रजा- subjects, citizen, धर्मिष्ठा- virtuous, pious, पापा-sinful, wicked, समा-upright/just, राजानम् - द्वि. वि. ए. व. & राजा-प्र. वि. ए. व. of राजन्-king (पु. लिं.), अनुवर्तन्ते-वर्त. प्र. ब. व. of अनु+वृत् to follow, act according to (वृत् +वर्तते १ ग. आ. प. to be, exist), यथा-as, in the manner mentioned, तथा-in that manner-both अव्यय

**अनवस्थितकार्यस्य न जने न वने सुखम्।**
**जने दहति संसर्गो वने सङ्गविवर्जनम्** ॥१३ .१५॥

अनवस्थितकार्यस्य (मनुष्यस्य) न जने सुखं (भवति) न वने (सुखं भवति)। (तस्य) जने संसर्गः दहति, (तथा) वने सङ्गविवर्जनं (दहति)॥

A person with poor work habits would be happy neither among the people nor in a forest. In a society, people would avoid him and in a forest, their absence would hurt him.

अनवस्थितकार्यस्य- in पु. लिं. ष. वि. ए. व. of अनवस्थितकार्यः- one with disorganised work habit, poor work management- अनवस्थित- disorganised, unsteady nature- क. भू. धा. वि. of अन्+ अव+ स्था- (स्था- तिष्ठति १ ग. प. प. to stay, stand), कार्यम्- work, thing that ought to be done- कार्य (also करणीय, कर्तव्य & कृत्य,)- क. वि. धा. सा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do)- अनवस्थितम् कार्यम् यस्य सः- बहुव्रीहि स., जने & वने- both in स. वि. ए. व. of जनः- पु. लिं.- people, society & वनम्- न. लिं.- forest, wilderness, संसर्गः- association, contact, co-existence, intimate relation- in पु. लिं. प्र. वि. ए. व., सङ्गविवर्जनम्- absence of a company, association- सङ्गः- company, association, विवर्जनम्- abandoning, leaving, exclusion- (वि+ वृज्- १ ग. प. प. to shun, avoid, deprive of)- सङ्गस्य विवर्जनम्- ष. तत्पुरुष स.- in न. लिं. प्र. वि. ए. व., दहति- वर्त. प्र. पु. ए. व. of दह्- to burn, scorch, afflict, destroy, consume, सुखम्- satisfaction, happiness, joy- here used as adverb, न-no, not- अव्यय

**उत्पन्नपश्चात्तापस्य बुध्दिर्भवति यादृशी।**
**तादृशी यदि पूर्वं स्यात्कस्य स्यान्न महोदयः**॥१४.७॥

उत्पन्नपश्चात्तापस्य (मनुष्यस्य) यादृशी बुध्दिः भवति, तादृशी (बुध्दिः) यदि पूर्वम् (एव) स्यात्, (तदा) कस्य न महोदयः स्यात्?

If one had that wisdom before, which he develops after repentance, would he not experience a great prosperity?

*Many people do wrong things to gain some advantage in life. After they are caught and pay their dues, they learn to do right things. If they had done the right things from beginning, they would have surely prospered.*

उत्पन्नपश्चात्तापस्य & कस्य- both in पु. लिं. ष. वि. ए. व. of उत्पन्नपश्चात्तापः- one who has developed a sense of repentance- उत्पन्न- adjctv- developed, generated, produced- क. भू. धा. वि. of उद्+ पद्- (पद्- पद्यते- ४ ग. आ. प. to go, to approach), पश्चात्तापः- repentance- पश्चात्- अव्यय- afterwards, subsequently, तापः- pain, torment affliction- पश्चात् कृतः तापः- मध्यम प. लोपी कर्मधारय स. & उत्पन्नः पश्चात्तापः- वि. पू. प. कर्मधारय स. & कः (किम्)- who, भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, महोदयः- great prosperity, rise- महत्- adjctv- great, high, big & उदयः- rise, uplifting- महान् उदयः- वि. पू. प. कर्मधारय स.- in पु. लिं. प्र. वि. ए. व., स्यात्- विध्यर्थ प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, यादृशी (यादृश्- adjctv)- of which kind, of which type, तादृशी (तादृश्- adjctv)- of that kind, of that type, बुध्दिः- mind, thinking, understanding- all in स्त्री. लिं. प्र. वि. ए. व., यदि- if, in which case, पूर्वम्- before, at first, before hand & न- no, not- all अव्यय

**पुनर्वित्तं पुनर्मित्रं पुनर्दाराः पुनर्मही।**
**एतद् सर्वं पुनर्लभ्यं न शरीरं पुनः पुनः**॥१४.३॥

वित्तं पुनः (लभ्यं भवति)। मित्रं पुनः (लभ्यं भवति)। दाराः पुनः (लभ्याः भवन्ति)।मही पुनः (लभ्या भवति)। एतद् सर्वं पुनः लभ्यं (अस्ति)। (किन्तु) शरीरं न पुनः पुनः (लभ्यं भवति)॥

Wealth can be earned again. A friend can be acquired again. One can have a wife again. Lost land can be acquired again. All these can be obtained again. But this body cannot be acquired again and again.

वित्तम्, मित्रम्, एतद्, सर्वम्, शरीरम् & लभ्यम्- all न. लिं. प्र. वि. ए. व. of वित्त -wealth, riches, मित्र -friend एतद्-this, सर्व- pronominal adjctv-all, every, शरीर-body & लभ्य- acquirable, obtainable- (also लभितव्य, लभनीय) कर्मणि विध्यर्थ धा. सा. वि. of लभ्-लभते १ ग. आ. प. to get, gain, acquire, पुनः (पुनर्)- अव्यय-again, a new, once more, दाराः -स्त्री. लिं. प्र. वि. ब. व. -(always plural)-a wife, मही-स्त्री. लिं. प्र. वि. ए. व. - earth, land, estate, न-no, not

**बहूनामप्यसाराणां समवायो हि दुर्जयः।**
**तृणैरावेष्ट्यते रज्जुर्येन नागोपि बध्यते**॥१४.४॥

बहूनाम् असाराणां समवायः अपि दुर्जयः हि (भवति)। रज्जुः तृणैः आवेष्ट्यते, येन नागः अपि बध्यते॥

An association of large number of even very weak individuals is indeed undefeatable. Even a (mighty) elephant is bound by a rope strung together by multiple (but very weak) grass threads.

*Strength in numbers!*

बहूनाम् & असाराणाम्- पु/न. लिं. ष. वि. ब. व. of बहु- many, numerous & असार- weak, useless, without strength- सार-essence- न सार-नञ्तत्पुरुष स., समवायः -association, aggregation, collection, दुर्जयः -undefeatable, unconquerable- दुर्लभः जय -प्रादि कर्मधारय स., रज्जुः -rope & नागः - an elephant- all in- पु. लिं. प्र. वि. ए. व., अपि- even, also, and & हि- surely, indeed, तृणैः -न. लिं. तृ. वि. ब. व. of तृणम्- grass, straw, आवेष्ट्यते- gets wrapped, enveloped & बध्यते- gets arrested, tied- कर्मणि प्रयोग तृ. पु. ए. व. of आ+ विष्- to wrap, envelope- (विष्- वेवेष्टि-वेविष्टे ३ ग. उ. प. to surround, spread) & बंध्- बध्नाति ९ ग. प. प. to bind, fasten, capture, येन- पु/न. लिं. तृ. वि. ए. व. of यद्- who

**जले तैलं खले गुह्यं पात्रे दानं मनागपि।**
**प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः**॥१४.५॥

जले तैलं, खले गुह्यं, पात्रे दानं (तथा) प्राज्ञे शास्त्रं, मनाक् अपि (कृतं), वस्तुशक्तितः, स्वयं विस्तारं याति॥

Oil spilled on water surface, a secret revealed to a bad person, charity to a deserving person and knowledge given to an intelligent person, even in a small measure, spread widely on their own due to their inherent characteristics.

जले, खले, पात्रे & प्राज्ञे- all in स. वि. ए. व. of जलम्- न. लिं.- water, खलः- पु. लिं.- wicked or mischievous person, पात्र- पु/न. लिं.-fit, worthy, deserving, receptacle of any kind & प्राज्ञः- पु. लिं.- wise, intelligent, clever, तैलम्- oil, गुह्यम्- secret, to be hidden- गुह्य- (also गुहनीय & गुहितव्य)- क. वि. धा. सा. वि. of गुह्- गूहति-ते १ ग. उ. प. to hide, cover, keep secret, दानम्- a thing given in charity, donation & शास्त्रम्- science, scripture- all in- न. लिं. प्र. वि. ए. व., वस्तुशक्तितः- by virtue of its inherent characteristics- वस्तु- material, object, matter, शक्ति- strength, power, prowess- वस्तुना शक्तिः- वस्तुशक्तिः- तृ. तत्पुरुष स. & तः (तस्) - suffix implies quality, nature, विस्तारम्- द्वि. वि. ए. व. of याति- वर्त. प्र. पु. ए. व. of या- to go, to come to, विस्तार- spread, expansion, extension, vastness- (वि+ स्तृ- to spread, diffuse, expand- स्तृ- स्तृणाति- स्तृणुते- ५ ग. उ. प. to spread, cover, strew), मनाक्- little, small quantity, अपि- even, also & स्वयम्- by oneself, of its own- all अव्यय

**दाने तपसि शौर्ये च विज्ञाने विनये नये।**
**विस्मयो न हि कर्तव्यो बहुरत्ना वसुन्धरा**॥१४.८॥

दाने, तपसि, शौर्ये, विज्ञाने, विनये, नये च विस्मयः न हि कर्तव्यः वसुन्धरा बहुरत्ना (अस्ति)॥

One must not become arrogant for being charitable, doing penance, being brave, being wise, being polite and knowing ways of life, (because), this rich world is full of gems (with those who excel in these fields).

दानम्-charity, giving, तपस्- penance, warmth, शौर्यम्- valour, heroism, विज्ञानम्-wisdom, knowledge, विनयम्- politeness, decorum, नयम्- prudence, way of life, विस्मयम् -pride, arrogance, vanity, All words - न. लिं. स. वि. ए. व., कर्तव्य -what is ought to be done- कर्मणि विध्यर्थ धा. वि. of कृ-करोति-कुरुते ८ ग. उ. प., वसुन्धरा- Earth-स्त्री. लिं, बहुरत्ना- full of jewels, gems- बहुना रत्नैः युक्ता या सा- बहुव्रीहि स. वसुन्धरा -वसून धरति इति- उपपद तत्प, वसु -riches

**दूरस्थोऽपि न दूरस्थो यो यस्य मनसि स्थितः।**
**यो यस्य हृदये नास्ति समीपस्थोऽपि दूरतः**॥१४.९॥

यः यस्य मनसि स्थितः (अस्ति,सः) दूरस्थः अपि न दूरस्थः (भवति)। यः यस्य हृदये न अस्ति, (सः) समीपस्थः अपि दूरतः (इति वर्तते)॥

A person in one's mind is not too far, even if he stays far away. However, a person not in one's heart, is far away, even if he stays very close by.

यः -who & यस्य- whose- पु. लिं. प्र. & ष. वि. ए. व. of यद्- who, मनसि & हृदये- स. वि. ए. व. of मनस्- न. लिं.- mind, heart & हृदय- heart, mind- पु/न. लिं.- स्थितः- staying, standing, living- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stand, stay, दूरस्थः & समीपस्थः -पु. लिं. प्र. वि. ए. व. of दूरस्थ- one who is staying far away & समीपस्थ- one who is staying close, nearby- दूर- far away, at a distance & समीप- close, nearby- दूरे/ समीपे तिष्ठति इति -दूरस्थ/ समीपस्थ- उपपद तत्पुरुष स., दूरतः (दूरतस्)- from afar, far away, at a distance & अपि- even, also- both- अव्यय, न- no, not, अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist

**कुचैलिनं दन्तमलोपसृष्टं,**
**बह्वाशिनं निष्ठुरभाषिणं च।**
**सूर्योदये वाऽस्तमिते शयानं,**
**विमुञ्चति श्रीर्यदि चक्रपाणिः**॥१५. ४॥ - त्रिष्टुभ

कुचैलिनं, दन्त-मल-उपसृष्टं, बह्वाशिनं, निष्ठुरभाषिणं, च सूर्योदये वा अस्तमिते शयानं, यदि चक्रपाणिः (अपि भवति, तदा अपि) श्रीः (तां) विमुञ्चति॥

A person who wears dirty clothes, a person with dirty teeth, a person who eats too much, a harsh speaker and the one who is asleep at sunrise or sunset, even if he is Lord Vishnu, Goddess of wealth (Lakshmi) abandons him.

कुचैलिनम्, दन्त-मल-उपसृष्टं , बह्वाशिनम्, निष्ठुरभाषिणम्, शयानम् -all द्वि. वि. ए. व. of कुचैलिन्-wearer of dirty cloth-चैलम्-cloth, कु-अव्यय-a prefix implying bad, dirty - कुत्सित: चैलिन्- प्रादि कर्मधारय स., दन्तमलोपसृष्टं-person having unclean teeth- दन्त-tooth, मल-dirt, उपसृष्ट -possessor, carrier-दन्तानाम् मलम्-दन्तमलम्, दन्तमलस्य उपसृष्ट: both ष. तत्पुरुष स., बह्वाशिन्-gluttonous, over eater- बहु-plenty, repeated, abundant-आशिन्- eater- बहूनिआशिन् - वि. पु. प. कर्मधारय स., निष्ठुरभाषिन्-harsh speaker-निष्ठुर-adjctv-harsh, hard, cruel, भाषिन्-speaker- निष्ठुर: भाषिन्- वि. पु. प. कर्मधारय स., शयान (शयिन् )-sleeper, च-and, also, वा-and, also, सूर्योदये & अस्तमिते -स. वि. ए. व. of सूर्योदय-sunrise (time) & अस्तमित-sunset (time), यदि- अव्यय-even if, in case of, चक्रपाणि:- Lord Viṣṇu श्रीः - Lakṣmī -Goddess of health, विमुञ्चति- leaves, abandons, -वर्त. तृ. पु. ए. व. of वि+मुच्-(मुच्-मुंचति-ते ६ ग. उ. प. to set free, abandon

**मणिर्लुठति पादाग्रे काचः शिरसि धार्यते।**
**क्रयविक्रयवेलायां काचः काचो मणिर्मणिः**॥१५.९॥

(कदाचित्) मणिः पादाग्रे लुठति (तथा) काचः शिरसि धार्यते। (परन्तु तेषां मूल्यं), क्रय-विक्रय-वेला**यां**, काचः काचः (एव मूल्यमाप्नोति तथा) मणिः मणि: (एव मूल्यमाप्नोति)॥

A jewel/gem (in an anklet- नूपुर) may dance over the feet. A glass-bead may find its place on the head (on a मुकुट). However, at the time of buying and selling of these items, a jewel is valued as a jewel and a glass bead is valued as a glass bead only.

*This verse is directed at people of high and low quality. For example, in an army, a weak person may be appointed as the सेनापति and a strong person may be his lowly सैनिक. But at the time of battle, the सैनिक will outshine the leader.*

मणिः- a gem, jewel, precious stone & काचः- glass beed- both in पु. लि. प्र. वि. ए. व., लुठति- वर्त. प्र. पु. ए. व. of लुठ्- ६ ग. प. प. to roll about, move to and fro, पादाग्रे- adverb- in front of the feet, over the feet- पादः- foot, अग्रे- an adverb-in front of, before- पादस्य अग्रे- ष. तत्पुरुष स., शिरसि- in न. लि. स. वि. ए. व. of शिरस्- head, top, धार्यते- कर्मणि प्रयोग प्र. पु. ए. व. of धृ- धरति १ ग. प. प. to bear, hold, carry, क्रयविक्रयवेलायाम्- in स्त्री. लि. स. वि. ए. व. क्रयविक्रयवेला- occasion of buying and selling, trading- क्रयः- buying, purchasing, विक्रयः- sale, selling,

वेला-स्त्री. लिं- time, season, occasion- क्रयः च विक्रयः च- क्रयविक्रयौ- trade, buying and selling- क्रयविक्रयोः वेला- ष. तत्पुरुष स.

**बन्धनानि खलु सन्ति बहूनि**
**प्रेमरज्जुदृढबन्धनमन्यत्।**
**दारुभेदनिपुणोऽपि षंडध्रिः**
**निष्क्रियो भवति पङ्कजकोशे**॥१५.१७॥ - त्रिष्टुभ

बन्धनानि खलु बहूनि सन्ति। प्रेम-रज्जु-दृढ-बन्धनम् अन्यत् (अस्ति)। दारु -भेद-निपुणः अपि षंडध्रिः पङ्कज-कोशे निष्क्रियः भवति॥

There are indeed many types of bonds. But the strong bond of love is totally different. A bee capable of piercing a hole in the wood becomes helpless inside a lotus!

बहूनि & बन्धनानि- न. लिं. प्र. वि. ब. व. of बहु-many, plenty, large & बन्धनम्-bond, tie खलु- अव्यय-indeed, surely, certainly, सन्ति- प्र. पु. ब. व. of अस्-अस्ति २ ग. प.प. to be प्रेमन्- love, रज्जु-rope, दृढ-strong, प्रेमनः रज्जुः- प्रेमरज्जुः- ष. तत्पुरुष स. -प्रेमरज्जुना दृढम्-प्रेमरज्जुदृढम्-तृ. तत्पुरुष स.,प्रेमरज्जुदृढम् बन्धनम्-प्रेमरज्जुदृढ़बन्धनम्- कर्मधारय स., अन्यत्- न. लिं. प्र. वि. ए. व. of अन्य- different, other, another, दारु - wood, भेद- breaking, tearing, cleaving, निपुण-expert, अपि-also, षट् -षड् - six, अंघ्रिः or अंहिः foot- षट् अंघ्रयः यस्य तद् - षंडध्रिः-bee-बहुव्रीहि स., पङ्कज- lotus, पङ्के जायते इति- पङ्कजः- उपपद तत्पुरुष स., कोश- fold, cavity, पङ्कजस्य कोशः - पङ्कजकोशः -ष. तत्पुरुष स., कोशे-स. वि. ए. व. of कोशः or कोशम् , निष्क्रियः -निष् +क्रियः- inactive, helpless, भवति-- प्र. पु. ए. व. of भू १ ग प. प. to be, to happen

**कोऽर्थान्प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः**
**स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः।**
**कः कालस्य न गोचरत्वमगमत् कोऽर्थी गतो गौरवं**
**को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पथि**॥१६.४॥ - शा. वि.

भुवि, कः अर्थान् प्राप्य न गर्वितः? कस्य विषयिणः आपदः अस्तम् गताः (नष्टाः)? कस्य मनः स्त्रीभिः न खण्डितम्? कः नाम राज्ञां प्रियः? कः कालस्य गोचरत्वं न अगमत्? कः अर्थी गौरवं गतः? कः वा पुमान् पथि दुर्जन- वागुरासु पतितः, क्षेमेण यातः?

In this world, who does not become arrogant after becoming rich? Have ever the troubles of a person of worldly pleasures ended? Whose heart women have not broken? Who is a King's a truly favourite (person)? Who has gotten out of control of destiny? Which beggar has achieved dignity? Which person, trapped by wicked men on his path, can proceed safely?

कः ( किम्)- who, which, अर्थी (अर्थिन्)- one who begs, seeks, asks, प्रियः- beloved, dear, favourite, पतितः- fallen, fallen into- पतित- क. भू. धा. वि. of पत्- पतति १ ग. प. प. to fall, fall down), यातः- one who has gone, gone away- यात- क. भू. धा. वि. of या- याति २ ग. प. प. to go, proceed, गर्वितः- one who got proud, arrogant- गर्वित- क. भू. धा. वि. of गर्व्- गर्वति १ ग. प. प. to be proud, haughty, गतः- gone- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go & कः पुमान्- (पुंस्)- person, man, human- all in पु. लिं. प्र. वि. ए. व., अर्थान्- in पु. लिं. द्वि. वि. ब. व. of अर्थः- wealth, objective, purpose, प्राप्य- पू. का. वा. धा. सा. ल्यबन्त अव्यय of प्र+ आप्- to achieve, obtain- (आप्- आप्नोति ५ ग. प. प. to get), कस्य, विषयिणः & कालस्य- all in पु. लिं. ष. वि. ए. व. of किम्- who, विषयिन्- a person of worldly pleasures & कालः- destiny, time, आपदः & गताः- both in स्त्री. लिं. प्र. वि. ब. व. of आपद्- trouble, distress & गता- gone, vanished- अस्तम्, गोचरत्वम् & गौरवम्- all in पु. लिं. द्वि. वि. ए. व. of अस्तः- decline, to end, गोचरत्वः- influence, control, scope- (गो- cattle- गो+ चरः- range of cattle pasturage, scope, range- त्व- suffix implies quality) & गौरवः- respect, dignity, honour, भुवि & पथि- both स. वि. ए. व. of भू- स्त्री. लिं- earth, world & पथिन्- पु. लिं- way, road, मनः (मनस्)- mind, heart & खण्डितम्- broken, distressed- खण्डित- क. भू. धा. वि. of खण्ड्- खण्डयति-१० ग.प. प. to break, destroy- both in न. लिं. प्र. वि. ए. व., स्त्रीभिः- in स्त्री. लिं. तृ. वि. ब. व. of स्त्री- woman, female, राज्ञाम्- in पु. लिं. ष. वि. ब. व. of राजन्- King, अगमत्- अनद्यतनभूत प्र. पु. ए..व. of गम्- गच्छति १ ग. प. प. to go, दुर्जनवागुरासु- in स्त्री. लिं. स. वि. ब. व. of दुर्जन- wicked person- दुष्टः जनः- प्रादि कर्मधारय स., वागुरा- स्त्री. लिं.- trap, snare, clutch- दुर्जनेन वागुरा- तृ. तत्पुरुष स., क्षेमेण- in पु/न. लिं. तृ. वि. ए. व. of क्षेम- well being, न- no, not, नाम- a particle used for: named, called,indeed & वा-or, and-all अव्यय

**धनेषु जीवितव्येषु स्त्रीषु चाहारकर्मसु।**
**अतृप्ताः मानवाः सर्वे याता यास्यन्ति यान्ति च॥**१६.१३॥

सर्वे मानवाः (प्राणिनः) धनेषु, जीवितव्येषु, स्त्रीषु, आहारकर्मसु च अतृप्ताः याताः, यास्यन्ति यान्ति च॥

All men were unsatisfied in the past, are unsatisfied at present and will be unsatisfied in the future with their wealth, lifestyle, women, meals and work.

सर्वे, मानवाः, प्राणिनः, अतृप्ताः & याताः- all in पु. लिं. प्र. वि. ब. व. of सर्वः- entire, all, whole, मानवः- man, human, person, प्राणिन्- living being, अतृप्तः- unhappy, unsatisfied- तृप्तः- happy, satisfied- न तृप्तः- अतृप्तः- नञ् तत्पुरुष स. & यातः- undergone, experienced- (तृप्त & यात- both क. भू. ध. वि. of तृप्- तृप्यति, तृप्नोति & तृपति- ४, ५ & ६ ग. प. प. to be pleased, satisfied & या- याति २ ग. प. प. to go, to go towards), धनेषु, जीवितव्येषु & आहारकर्मसु- all in न. लिं. स. वि. ब. व. of

धनम्- wealth, money, property, जीवितव्यम्- life or living, lifestyle जीवितव्य (also- जीवनीय & जीव्य)- क. वि. धा. सा. वि. of जीव्- जीवति १ ग. प. प. to live, to be alive, आहारकर्मन्- food and work (job)- आहारः- food, fetching, कर्मन्- work, job- आहारः च कर्म च- आहारकर्मन्- द्वंद्व स., स्त्रीषु,-in स्त्री. लिं. स. वि. ब. व. of स्त्री- woman, wife, यास्यन्ति- द्वि. (सामान्य) भविष्य प्र. पु. ब. व. of या- याति & यान्ति- वर्त. प्र. पु. ब. व. of या- याति, च- and- अव्यय

★★★★★★

# Chapter 8- Do's and Don'ts (कार्याकार्यम्)

We would consider the verses in this chapter to be the essence of what Cāṇakya Nīti is all about. As he stated at the outset, Cāṇakya wants to describe what is right and what is wrong and hence what is to be done and not to be done. The advice given in these verses is very much applicable in the 21st century for people all over the world.

## *8.1 Dos (कर्तव्यानि)*

**आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि।**
**आत्मानं सततं रक्षेद्दारैरपि धनैरपि**॥१.६॥

(मनुष्यः) आपदर्थे धनं रक्षेत्, (सः) धनैः अपि दारान् रक्षेत्, (परन्तु सः) आत्मानं दारैः अपि, धनैः अपि, सततं रक्षेत्॥

One should protect his wealth for (potential) hard times. He should protect his wife more than his wealth. However, he should always protect himself first, even before his wife or wealth.

आपदर्थे- पु. लिं. स. वि. ए. व. of आपदर्थः- for purpose of calamity, emergency, difficult time- आपद्- स्त्री. लिं.- calamity, difficult time, अर्थः- purpose, aim, object, cause- आपदः अर्थः- ष. तत्पुरुष स., धनम्- wealth, money- in न. लिं. द्वि. वि. ए. व., रक्षेत्- विध्यर्थ प्र. पु. ए. व. of रक्ष्- रक्षति १ ग. प. प. to protect, save, guard, take care of, धनैः- in न. लिं. तृ. वि. ब. व. of धनम्- wealth, दारान्- in पु. लिं. द्वि. वि. ब. व. of दारा- wife, आत्मानम्- in पु. लिं. द्वि. वि. ए. व. of आत्मान्- oneself, self, दारैः- in पु. लिं. तृ. वि. ब. व. of दारा- wife, अपि-also, even & सततम्- always, constantly- both अव्यय

**मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्।**
**मन्त्रेण रक्षयेद् गूढं कार्यं चाऽपि नियोजयेत्**॥२ ७॥

मनसा चिन्तितं कार्यं न वाचा एव प्रकाशयेत्। (तद्) गूढं मन्त्रेण रक्षयेद् , कार्यं च अपि नियोजयेत्॥

One should not publicize any work by talking if it is planned in mind (only)! That secret should be protected and executed (first and then talked about).

मनसा, वाचा, मन्त्रेण all तृ. वि. ए. व. of मनस्-न. लिं -mind, thought, वाच्-स्त्री. लिं. talk, speech, मन्त्र- plan, secret, चिन्तितम् , कार्यम् , गूढम्-all द्वि. वि. ए. व. of चिन्तित-planned, thought of- क. भू. धा. वि. of चिन्त्- चिन्तयति-ते- १० ग. उ. प. to think, consider, कार्य ( also कर्तव्य, करणीय, कृत) work-(कर्मणि वि. धा. सा. वि. of कृ करोति-कुरुते ८ ग. उ. प.), गूढ-secret क. भू. धा. वि. of गूहति-ते १ ग. उ. प. to hide, keep secret, न- no, not, एव-अव्यय-just, just so, प्रकाशयेत् -to display, reveal, रक्षयेद् -to protect, नियोजयेत्- to put effort, -all प्रयोजक विध्यर्थ प्र. पु. ए. व. of प्र+काश् (काश्-काशति-ते, काश्यति-ते १, ४, ग, उ. प. ),रक्ष्-रक्षति १ ग. प. प. & नि+युज् (युज्-युनक्ति-युंक्ते ७ ग. उ.प.), च -and, अपि-also, and

**जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।**
**मित्रं च आपत्तिकालेषु भार्यां च विभवक्षये**॥१.११॥

भृत्यान् प्रेषणे, बान्धवान् व्यसनागमे, मित्रं च आपत्तिकालेषु (तथा) भार्यां च विभवक्षये जानीयात्॥

One should judge the servants when sent on a mission, relatives during arrival of difficulties, a friend during adverse time and wife during loss of wealth.

*One knows the ability of servants to accomplish the task when sent on a mission. One knows the willingness of relatives to help when faced with difficulties. One truly knows a friend if he stands by you during adverse times. Finally, the ability of the wife to manage the household is tested during loss of wealth.*

भृत्यान् & बान्धवान्- both in- पु. लिं. द्वि. वि. ब. व. of भृत्यः- servant, dependant, one who is to be supported, maintained- भृत्य- (also- भरणीय, भर्तव्य & भार्य)- क. वि. धा. सा. वि. of भृ- बिभर्ति- बिभृते ३ ग. उ. प. to support, maintain & बान्धवः- a relative, kinsman, मित्रम्- न. लिं- a friend, an ally- in न. लिं. द्वि. वि. ए. व., भार्याम्- स्त्री. लिं. द्वि. वि. ए. व. of भार्या- wife, प्रेषणे, व्यसनागमे & विभवक्षये- all in पु/न. लिं. स. वि. ए. व. of प्रेषण- dispatching, sending on a mission- (प्र+ इष्- to send forth, despatch- इष्- इष्यति ४ ग. प. प. to go, cast), व्यसनागमः- arrival of difficulty, calamity, hardship- व्यसनम्- न. लिं.- difficulty, calamity, hardship & आगमः- arrival, coming (आ+ गम् to arrive, come- गम्- गच्छति १ ग. प. प. to go)- व्यसनस्य आगमः- व्यसनागमः & विभवक्षयः- विभवः- पु. लिं.- wealth, prosperity, क्षयः- decline, depletion- (क्षि- क्षयति, क्षिणोति & क्षिणाति १, ५ & ९ ग. प. प. to destroy, affect, ruin)- विभवस्य क्षयः- विभवक्षयः- both ष. तत्पुरुष स., आपत्तिकालेषु- during time of difficulty- पु. लिं. स. वि. ब. व. of आपत्तिकालः- आपत्तिः- स्त्री. लिं.- calamity, difficulty, कालः- पु. लिं.- period, time- आपत्तेः कालः- ष. तत्पुरुष स.,जानीयात्- विध्यर्थ प्र. पु. ए. व.of ज्ञा- जानाति- जानीते ९ ग. उ. प. to know, च-and- अव्यय

**विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्।**
**अमित्रादपि सद् वृतं अमेध्यादपि कांचनम्**॥१.१६॥

विषात् अपि अमृतं, बालात् अपि सुभाषितम्, अमित्रात् (अपि) सद् वृत्तम्,अमेध्यात् अपि कांचनं ग्राह्यम्॥

One should accept nectar even from poison, a Subhāshita even from a child, a good deed from an enemy and gold from dirt.

*It does not matter where it comes from; if it is good, beneficial, worth learning precious etc; then grab it!*

अपि- अव्यय-(Indeclinable)-Even, it also means 'Also', वृत्तम्, कांचनम् , सुभाषितम् & ग्राह्यम्- न. लि, द्वि,. वि., ए. व. of , वृत्त- conduct, act, behaviour- कर्मणि भूतकाल धातुसाधित विशेषण (क. भू. धा. वि.) Past Participle of वृत्- वर्तते- tube, to exist-१ आ.प., कांचन- gold, सुभाषित (सु + भाषित)- well-said -क. भू. धा. वि . of भाष्- भाषते- & ग्राह्य-acceptable- कर्मणि विध्यर्थ धातुसाधित विशेषण (क. वि. धा. वि)- Past-passive participle, विषात्, बालात्, अमित्रात् & अमेध्यात्- all in पं. वि., ए. व. of विष-poison, बाल- child, young, अमित्र- unfriendly person, enemy -न मित्र - & अमेध्य- Dirty, filthy (Adjective, विशेषण-वि.) -न मेध्य, मेध्य- pure,, sacred, सद्- good, noble

There is one variation in the above श्लोक.

नीचादत्युत्तमा विद्या स्त्री रत्नं दुष्कुलादपि॥

One should accept great knowledge even from a lowly person and a woman of beauty and character even from a low class family.

**तावद् भयस्य भेतव्यं यावद् भयमनागतम्।**
**आगतं तु भयं वीक्ष्य नरः कुर्याद् यथोचितम्**॥५.०३॥

(नरः) भयस्य तावत् भेतव्यं, यावद् भयम् अनागतम् (अस्ति)। नरः भयम् आगतम् तु वीक्ष्य, यथोचितं (कार्यं) कुर्यात्॥

A man should be afraid of any danger until it is imminent. On realising that danger has arrived, he should do whatever is necessary (to ward it off).

भयस्य- ष. वि. ए. व. of भयम्- fear, dread, hazard, danger, भयम्, अनागतम्- not come- आगतम्- arrived, present- आगत- क. भू. धा. वि. of आ+ गम्- to arrive, come- (गम्- गच्छति १ ग. प. प. to go)- अन् आगतम्- अनागतम्- नञ् तत्पुरुष स. & भेतव्यम्- to be afraid of- भेतव्य- क. वि. धा. सा. वि. of भी- बिभेति ३ ग. प. प. to be

afraid of, to fear-all in न. लिं. प्र. वि. ए. व., भयम्, आगतम् & यथोचितम्- one which is proper, suitable- यथा- अव्यय- like which, in which manner, उचितम्- proper, suitable- उचित- क. भू. धा. वि. of उच्- उच्यति ४ ग. प. प. to be proper- उचितम् अनुसृत्य- यथोचितम्- अव्ययीभाव स.- all in न. लिं. द्वि. वि. ए. व., नरः- man, person- पु. लिं. प्र. वि. ए. व., वीक्ष्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of वि +ईक्ष्- to behold, observe- (ईक्ष्- ईक्षते- १ ग. आ. प. to see, perceive, कुर्यात्- विध्यर्थ तृ. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, act, तावद्-till that time, until, यावद्- till that time, so long as, तु- but - all अव्यय

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्**॥३.१०॥

कुलस्य अर्थे एकं त्यजेत्। ग्रामस्य अर्थे कुलं त्यजेत्। जनपदस्य अर्थे ग्रामं( त्यजेत्)। आत्मार्थे पृथिवीं त्यजेत्॥

(Told by Vidura to Dhṛtarāshtra, on seeing bad omens after birth of Duryodhana)

For the sake of the family, one (member) should be given up. For the sake of the village, a family should be left out. For the sake of the country, a village should be abandoned. For the sake of the Self, the world should be surrendered.

कुलस्य, ग्रामस्य, जनपदस्य all ष. वि. ए. व. of कुल-family, race, community, ग्राम-village, hamlet, जनपद-kingdom, country, अर्थे-for the sake of.- स. वि. ए. व. of अर्थ-purpose, reason, एकम् , कुलम्, ग्रामम्, पृथिवीम् - all द्वि. वि. ए. व. of एक (पु/न. लिं.)- one, single, कुलम् (न. लि.), ग्रामम् (न. लि.), पृथिवी (स्त्री. लि.) world, earth, त्यजेत्-विध्यर्थ प्र. पु. ए. व. of त्यज्-त्यजति-१ ग. प. प. to leave, abandon, surrender, आत्मार्थे- स. वि. ए. व. of आत्मार्थ-for the sake of self- आत्मनः अर्थः -ष. तत्पुरुष स.- आत्मन्-self, soul

**उपसर्गेऽन्यचक्रे च दुर्भिक्षे च भयावहे।**
**असाधुजनसंपर्के यः पलायेत् स जीवति**॥३.१९॥

यः, उपसर्गे, अन्यचक्रे, च भयावहे दुर्भिक्षे, असाधुजनसंपर्के च पलायेत्, सः (एव) जीवति॥

One who runs away when faced with natural calamity or an invasion by a foreign force or in dreaded famine or when in contact with evil people alone survives.

यः (यद्)- who & सः (तद्)- he- both in- पु. लिं. प्र. वि. ए. व., उपसर्गे, अन्यचक्रे, भयावहे, दुर्भिक्षे & असाधुजनसंपर्के- पु/न. लिं. स. वि. ए. व. of उपसर्गः- misfortune,

calamity, natural phenomenon foreboding evil like floods, storm, earthquake etc., अन्यचक्रम्- attack of an enemy, foreign force- अन्य- other, another, strange, unusual, चक्रम्- a realm, sovereignty, troop- अन्यस्य चक्रम्- अन्यचक्रम्- ष. तत्पुरुष स., भयाहम्- frightening- भयम्- fear, dread, terror, आवहः- producing, bringing, inviting, भयावहः- आवहम् भयं - वि. उ. प. कर्मधारय स., दुर्भिक्षम्- famine, acute scarcity of provisions & असाधुजनसंपर्कः- company of wicked or evil minded people- साधुः-good or saintly person- न साधुः- असाधुः, जनः- person, people, संपर्कः- contact, company- असाधुः जनः- असाधुजनः- वि. पू. प. कर्मधारय स., असाधुजनस्य संपर्कः- असाधुजनसंपर्कः- ष. तत्पुरुष स., पलायेत्- विध्यर्थ प्र. पु. ए. व. of परा+ अय्- पलायति- ते to run away, retreat- (अय्- अयते १ ग. आ. प. प. to go), जीवति- वर्त. प्र. पु. ए. व. of जीव्- १ ग. प. प. to be alive, to survive, च- and- अव्यय

**एकाकिना तपो द्वाभ्यां पठनं गायनं त्रिभिः।**
**चतुर्भिर्गमनं क्षेत्रं पञ्चभिर्बहुभिर्रणम्**॥४.१२॥

एकाकिना तपः, द्वाभ्यां पठनं, त्रिभिः गायनं, चतुर्भिः गमनं, पञ्चभिः क्षेत्रं (तथा) बहुभिः रणं (कुर्यात्)॥

A solitary person should undertake austerity. Two (students) should study together. A trio works well for singing. A foursome is good for travel. Five people should cultivate a field. Fighting a war requires large number of people.

एकाकिना- in पु. लिं. तृ. वि. ए. व. of एकाकिन्- alone, solitary, तपः- austerity, penance, द्वाभ्याम्- in पु. लिं. तृ. वि. द्वि. व. of द्वौ, त्रिभिः, चतुर्भिः, पञ्चभिः & बहुभिः- all in पु. लिं. तृ. वि. ब. व. of त्रयः- three, चत्वारः- four, पञ्च- five & बहु- adjctv- many, large, much more, पठनम्- studying, reading, reciting, rehearsing- (पठ्- पठति १ ग. प. प. to study, read), गायनम्- singing-(गै- गायति १ ग. प. प. to sing), गमनम्- traveling, going- (गम्- गच्छति १ ग. प. प. to go), क्षेत्रम्- field, ground, land), रणम्- war, battle- all in न. लिं. प्र. वि. ए. व.

**त्यजेद्धर्मं दयाहीनं विद्याहीनं गुरुं त्यजेत्।**
**त्यजेत्क्रोधमुखीं भार्यां निःस्नेहान्बान्धवांस्त्यजेत्**॥४.१६॥

(मनुष्यः) दयाहीनं धर्मं त्यजेत्। विद्याहीनं गुरुं त्यजेत्। क्रोधमुखीं भार्यां त्यजेत् (तथा) निःस्नेहान् बान्धवान् त्यजेत्॥

One should leave any Dharma (way of life) devoid of compassion. One should leave a teacher who is not knowledgeable. One should leave a wife

with angry expression on her face. One should avoid relatives without any affection.

*A wife should also leave an abusing husband!*
दयाहीनम्, धर्मम्, विद्याहीनम् & गुरुम्- all in पु. लिं. द्वि. वि. ए. व. of दयाहीनः- compassionless, merciless- दया- स्त्री. लिं.- compassion, mercy, हीनः- devoid of, wanting in- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon- दयया हीनः- दयाहीनः- तृ. तत्पुरुष स., धर्मः- prescribed codes of conduct, Dharma विद्याहीनः- one who is not learned, without knowledge- विद्या- knowledge, education, विद्यया हीनः- विद्याहीनः- तृ. तत्पुरुष स., & गुरुः- teacher, preceptor, elder, क्रोधमुखीम् & भार्याम्- both in स्त्री. लिं. द्वि. वि. ए. व. of क्रोधमुखी- one who is with an angry face- क्रोध- anger, wrath, मुखम्- face, mouth, countenance- मुखिन्- पु. लिं. & (मुखी- स्त्री. लिं.)- one with a face or countenance of- क्रोधयुक्तम् मुखम् यस्याः सा- क्रोधमुखी- बहुव्रीहि स. & भार्या- wife, निःस्नेहान् & बान्धवान्- both in पु. लिं. द्वि. वि. ब. व. of निःस्नेहः- affectionless, unfriendly- स्नेहः- affection, tenderness, love- निस्- अव्यय- prefix implies: absence of, devoid of- निर्गतः स्नेहः यस्मात् सः- निःस्नेहः- बहुव्रीहि स. & बान्धवः- relative, kinsman, त्यजेत्- विध्यर्थ प्र. पु. ए. व. of त्यज्- त्यजति- १ ग. प. प. to leave, abandon, get rid of

**कः कालः कानि मित्राणि को देशः कौ व्ययागमौ।**
**कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः**॥४.१८॥

(कार्यं कुर्वन् प्राग्) मुहुः मुहुः चिन्त्यं - कः कालः, कानि (मे) मित्राणि, कः देशः, कौ (मे ) व्यय-आगमौ, कः च अहं, का च मे शक्तिः इति॥

(Before beginning any venture), one ought to ask (himself) repeatedly. What is (an ideal) time (to start the project)? Who are (my) friends (who can help)? Which is (an ideal) place (for successful outcome)? What are (my) income and expenses? Who am I? What is my strength?

कः - पु. लि, प्र. वि, ए.व. , कौ- पु. लि, प्र. वि, , व. ,कानि- न. लि, प्र. वि. ब.व. का- स्त्री. लि. प्र. वि, ए. वचन, of किम्-pronominal adjective (pron. a.)-who, what, which, चिंत्यम्- क.वि धा वि. of चिंत्-१०,उ.प. चिंतयति-ते, think, mind, consider, discuss,, मुहुः मुहुः- repeatedly- मुहुस्—अव्यय-often, कालः- Time, मित्राणि- न. लि, तृ. वि. ब. वचन of-मित्र- Friend,, व्ययागमौ- व्यय च आगम च - द्वन्द्व स.

**निःस्पृहो नाधिकारी स्यान्नाकामी मण्डनप्रियः।**
**नाविदग्धः प्रियं ब्रूयात् स्फुटवक्ता न वञ्चकः**॥५.५॥

निःस्पृहः न अधिकारी स्यात्। अकामी न मण्डनप्रियः (स्यात्)। अविदग्धः न प्रियं ब्रूयात् (तथा) स्फुटवक्ता न वञ्चकः (स्यात्)॥

A desire less person should not be in a position of authority. There is no need for a lust less person to adorn himself. A fool should not speak pleasantly. A frank speaker would not be a swindler.

*A person in authority must have specific objectives to achieve. There is no need for a person to go out of his way if he does not desire money. A foolish person cannot speak pleasantly. Similarly a person who speaks frankly cannot have bad intentions to rob anybody.*

निःस्पृहः- one who is free from desire or covetousness- निस्- अव्यय- prefix implies: without devoid of & स्पृहा- covetousness, desire, longing- निर्गता स्पृहा यस्मात् सः- निःस्पृहः- बहुव्रीहि स., अधिकारी (अधिकारिन्)- one who is possessed of authority, power, अकामी (अकामिन्)- one who is free from lust or desire- कामिन्- lustful person, lover- न कामिन्- अकामिन्- नञ् तत्पुरुष स., मण्डनप्रियः- मण्डनम्- an act of adorning, decorating- प्रिय- adjctv- pleasing, agreeable, likeable- मण्डनम् प्रियम् यस्य सः- मण्डनप्रियः- बहुव्रीहि स., अविदग्धः- foolish, unwise- विदग्धः- a scholar, wise- क. भू. धा. वि. of वि +दह्- to refine - (दह्- दहति १ ग. प. प. to burn, scorch)- न विदग्धः- अविदग्धः- नञ् तत्पुरुष स., स्फुटवक्ता (स्फुटवक्तृ)- frank speaker- स्फुट- adjctv- clear, frank, open, वक्तृ- speaker- स्फुटः वक्ता- स्फुटवक्तृ- कर्मधारय स., वञ्चकः- a cheat, swindler, rogue- all in पु. लिं. प्र. वि. ए. व., प्रियम्- पु/न. द्वि. वि. ए. व. of प्रिय- see above, ब्रूयात् & स्यात्- both in विध्यर्थ प्र. पु. ए. व. of ब्रू- ब्रवीति- ब्रूते २ ग. उ. प. to speak, talk, say & अस्- अस्ति- २ ग. प. प. to be, exist, न- no, not- अव्यय

**सन्तोषस्त्रिषु कर्तव्यः स्वदारे भोजने धने।**
**त्रिषु चैव न कर्तव्योऽध्ययने जपदानयोः**॥७.४॥

स्वदारे, भोजने, धने (एतेषु) त्रिषु सन्तोषः कर्तव्यः (अस्ति)। (परन्तु) अध्ययने जपदानयोः (एतेषु) त्रिषु च न एव कर्तव्यः (अस्ति)॥

One should be happy with three things, namely, with one's wife (spouse), meals (home cooked) and (earned) wealth. (However), he/she should never be content with pursuit of knowledge, devotional chants and charity.

*In today's world, this Subhāshita is applicable to both, men and women.*

सन्तोषः- joy, happiness, satisfaction, कर्तव्यः- things to be done, duty- (also करणीय, कार्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, स्वदारे, भोजने, धने & अध्ययने- all in स. वि. ए. व. of स्वदारा- स्त्री. लिं.- one's own

wife- स्व- one's own, self, दारा- wife- स्वस्य दारा- स्वदारा- ष. तत्पुरुष स., भोजनम्- न. लिं.- eating, food, object of enjoyment, धनम्- न. लिं.- wealth, money & अध्ययनम्- न. लिं.- learning, acquisition of knowledge, त्रिषु- पु/न. लिं. स. वि. ए. व. of त्रि- three, जपदानयोः- न. लिं.स. वि. द्वि. व. of जपदानम्- जपः च दानम् च- द्वंद्व स.- जपः- chanting prayers, names of deities, दानम्- giving, donation, charity, न- no, not & एव-just, only- both अव्यय

**पादाभ्यां न स्पृशेदग्निं गुरुं ब्राह्मणमेव च।**
**नैव गां न कुमारीं च न वृद्धं न शिशुं तथा**॥७.६॥

(मनुष्यः) न अग्निं, गुरुं, ब्राह्मणम् एव च, न एव गां न कुमारीं च तथा न वृद्धं,न शिशुं पादाभ्यां स्पृशेत्॥

One should not ever touch a fire, a teacher, a priest, a cow or a maiden girl and likewise an old man or a child, with his feet.

*Essentially, one should not touch anybody with one's feet. It is considered disrespectful in many societies. It could be that the feet may be dirty as they touch the ground.*

अग्निम्, गुरुम्, ब्राह्मणम्, वृद्धम् & शिशुम्- all in पु. लिं. द्वि. वि. ए. व. of अग्निः- fire, गुरुः- teacher, elder, father, preceptor, ब्राह्मणः- a member of the priestly class, वृद्धः- an old man, an elderly person- वृद्ध- क. भू. धा. वि. of वृध्- वर्धते १ ग. आ. प. to grow, increase & शिशुः- a child, गाम् & कुमारीम्- both in- स्त्री. लिं. द्वि. वि. ए. व. of गो- a cow (गो-is also a- पु. लिं.- bull) & कुमारी- young girl, maiden, पादाभ्याम्- in पु. लिं. तृ. वि. द्वि. व. of पादः- foot, स्पृशेत्- विध्यर्थ प्र. पु. ए. व. of स्पृश्- स्पृशति ६ ग. प. प. to touch, come in contact, तथा- similarly, न- no, एव- only, merely, च-and- all अव्यय

**अनुलोमेन बलिनं प्रतिलोमेन दुर्जनम्।**
**आत्मतुल्यबलं शत्रुं विनयेन बलेन वा**॥७.१०॥

बलिनम् अनुलोमेन, दुर्जनं प्रतिलोमेन, आत्मतुल्यबलं शत्रुं विनयेन बलेन वा (व्यवहारितव्य अस्ति)॥

(One should deal) with a stronger enemy with a subdued approach. (One should approach) a wicked person with non-cooperation. One should act with either courtesy or strength with an enemy of equal strength.

बलिनम्, दुर्जनम्, आत्मतुल्यबलम् & शत्रुम्- all in पु. लिं. द्वि. वि. ए. व. of बलिन्- adjctv- one who is strong, mighty, powerful- (बलम्- strength, power, might, vigour), दुर्जनः- wicked man, bad person- जनः- person, people- दुष्टः जनः- दुर्जनः- प्रादि

कर्मधारय स. आत्मतुल्यबलः- one who is of strength/ power as oneself- आत्मन्- oneself, one's own, तुल्य-adjctv- comparable, equal, same kind of, बलम्- strength- आत्मनः तुल्यं बलं यस्य सः- बहुव्रीहि स. & शत्रुः- an enemy, adversary, अनुलोमेन, प्रतिलोमेन, विनयेन & बलेन- all adjctvs- in पु/न. लि. तृ. वि. ए. व. of अनुलोम- favourable approach, subdued behaviour, प्रतिलोम- opposition, non-cooperation, विनय- polite conduct, decorum, humility, courtesy & बल- strength, वा- or, and- अव्यय

**पुष्पे गन्धं तिले तैलं काष्ठेऽग्निं पयसि घृतम्।**
**इक्षौ गुडं तथा देहे पश्यात्मानं विवेकतः**॥७.२१॥

पुष्पे गन्धं, तिले तैलं, काष्ठे अग्निं, पयसि घृतम्, इक्षौ गुडं (पश्य)। तथा (हे मानव, त्वं स्वस्य) देहे आत्मानं विवेकतः पश्य॥

See the fragrance in a flower, the oil in a sesame seed, the fire hidden in a piece of wood, the clarified butter in the milk and the sugar in sugarcane. Likewise, with true knowledge (discretion), realise the Self (आत्मन्) in your own body.

पुष्पे, काष्ठे, पयसि & देहे- all in न. लिं. स. वि. ए. व. of पुष्पम्- a flower, काष्ठम्- a piece of wood, timber, पयस्- milk & देहः/देहम्- body, गन्धम्- fragrance, smell, तैलम्- oil & घृतम्- Ghee, clarified butter- all in न. लिं. द्वि. वि. ए. व., अग्निम्, आत्मानम् & गुडम्- all in पु. लिं. द्वि. वि. ए. व. of अग्निः- fire, आत्मन्- soul, one's own self & गुडः- jaggery, इक्षौ- in पु. लिं. स. वि. ए. व. of इक्षुः- sugarcane, विवेकतः- with discretion- विवेक- discrimination, judgement, discretion, true knowledge तः (तस्)- suffix implied- 'with' (often used as substitute for पं. वि. ए. व. of any noun), पश्य- आज्ञार्थ म. पु. ए. व. of दृश्- पश्यति १ ग. प. प. to see, visualise, तथा- likewise, similarly- अव्यय

**विद्यार्थी सेवकः पान्थः क्षुधार्तो भयकातरः।**
**भाण्डारी प्रतिहारी च सप्तसुप्तान् प्रबोधयेत्**॥९ ६॥

(एतान्) सप्तसुप्तान् प्रबोधयेत् - विद्यार्थी, सेवकः, पान्थः, क्षुधार्तः, भयकातरः, भाण्डारी, प्रतिहारी च॥

One should wake these seven people if they are sleeping (at the wrong time) - a student, a servant, a traveller, a hungry person, a person struck with fear, a store manager and a guard.

*It is considered a sin to wake up any one from sleep, unless he is sleeping when not doing his duty! For example, a guard should not be asleep at*

*night, nor should a storekeeper when the store is open. Similarly, a student or a servant should be awakened when not performing their assigned tasks. A person may have nightmares and get scary while sleeping. Therefore, he should be awakened. Not sure how a hungry person can sleep but if he is and it is time to eat, he too should be awakened!*

विद्यायाः अर्थिन् -विद्यार्थी-student- षष्ठी तत्पु स., पान्थः -traveller, wayfarer, क्षुध् (noun) -(न.लि.)-hunger, (verb)- ४ प. प. क्षुध्यति- to be hungry, आर्त- adjective-struck by, afflicted with, क्षुधया आर्तः - क्षुधार्तः,भयम्- fear, dread, कातर - adjective-afraid, timid, agitated, भयेन कातरः –भयकातरः -(both तृ. तत्पुरुष स.), भाण्डारी -store manager, cook, प्रतिहारी- Door-keeper, watchman, प्रतिहारः means door, gate. It also means a door-keeper, porter, बुध्- बोधति-ते, १ उ. प. बुध्यते ४ ग, आ. प.-to comprehend, to know, प्र+बुध्-to wake up, rise, causal-प्रयोजक- प्रबोधयति- प्रबोधयेत्-विद्यर्थ - प्र. पु. ए. वचन -may wake up., सुप्तान्-पु. लि. द्वि. वि.ब.वचन of- सुप्त-slept,, asleep-क.भू.धा.वि of स्वप्-स्वपिति २ ग, प. प. to sleep, प्रतिहारी- Door-keeper, watchman, प्रतिहारः- means door, gate. It also means a doorkeeper, porter

**निर्विषेणापि सर्पेण कर्तव्या महती फणा।**
**विषं भवतु वा माऽभूत् फणाटोपो भयंकरः**॥९ १०॥

सर्पेण निर्विषेण अपि महती फणा कर्तव्या (भूयते)। विषं भवतु वा मा अभूत्, फणाटोपः भयंकरः (कर्तव्यः अस्ति) ॥

Even a non-poisonous snake must expand its hood (in case of any danger.) Whether or not it has poison, the (arrogance of showing the) hood itself is frightening (to its enemy)!

सर्पेण and निर्विषेण- both तृ. वि. ए. व of सर्पः snake-serpent and निर्विषः- non-poisonous (निर्गतम् विषम् यस्मात् तद्- निर्विषम् -प्रादिबहुव्रीही स.), विषम्- poison, अपि -(अव्यय)- though, even if, महती - huge, big, great, फणा- फणः-फटः - expanded hood of a snake, आटोपः -pride, self-conceit, arrogance, कर्तव्या- ought to do- क. विध्यर्थ धा. वि. of कृ- करोति-कुरुते - ८ ग. उ. प. - to do- (All three स्त्री. लि. प्र. वि. ए. व. of -महत्, फणा & कर्तव्य reply), फणाटोपः, फटाटोपः (फणायाः आटोपः -ष. तत्पुरुष स.)- arrogant display of hood, भवतु -आज्ञार्थ प्र.. पु. ए. व. and अभूत्- सामान्य भूत. प्र. पु. ए. व of भू-भवति - १ ग. प. प. to be, happen, वा - (अव्यय) or , also, and, मा- particle of prohibition, भयंकरः- भयम् करोति इति- द्वि. तत्पुरुष स.- frightening, terrible, अस्तु -आज्ञार्थ प्र.. पु. ए. व. of अस्- २ ग. प. प.- to be

**दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्।**
**सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत्॥१०.२॥**

पादं दृष्टिपूतं न्यसेत्। जलं वस्त्रपूतं पिबेत्। वाचं सत्यपूतां वदेत्। मनः पूतं समाचरेत्॥
One should put his step forward after looking carefully, drink his water filtered by cloth, speak truthful words and act upon things after due deliberation in mind.

पादम्, जलम्, वाचम्, दृष्टिपूतम्, वस्त्रपूतम्, सत्यपूताम् & मनःपूतम् -all द्वि. वि. ए. व. of पाद-(न. लिं.) foot, step, जल-(न. लिं.)-water, वाच् -(स्त्री. लिं.)-word, talk, दृष्टिपूत- दृष्ट्या पूतम्- (दृष्टिः-sight, पूत- purified, cleaned, washed -क. भू. धा. वि. of पू-१ ग.पवते- & ४ ग.-पूयते आ. प.& ९ ग. उ. प. पुनाति-पुनीते-to cleanse, make pure, purify, वस्त्रपूत- वस्त्रेण पूतम् -वस्त्र-(न. लिं.) cloth, सत्यपूत-सत्येण पूतम्-सत्यम्-(न. लिं.)-truth, मनःपूत-मनसा पूतम् -मनस्-(न. लिं.) mind, heart- all तृ. तत्पुरुष स., न्यसेत्, पिबेत्, वदेत् & समाचरेत्-all विध्यर्थ प्र. पु. ए. व. of नि+अस्- to set, place (अस्-अस्ति २ ग. प. प. to be), पा-पिबति १ ग. प. प. to drink, वद्-वदति-१ ग. प. प. -to speak & सं+आ+चर्- to perform, act (चर्-चरति-१ ग. प. प. to walk )

**यस्य स्नेहो भयं तस्य स्नेहो दुःखस्य भाजनम्।**
**स्नेहमूलानि दुःखानि तानि त्यक्त्वा सुखं वसेत्॥१३ .५॥**

यस्य स्नेहः तस्य भयम् (भवति)। स्नेहः दुःखस्य भाजनम् (अस्ति)। दुःखानि स्नेह-मूलानि (सन्ति)। तानि त्यक्त्वा (मनुष्यः) सुखं वसेत्॥

A person attached (to someone or something), is afraid (of loosing it). Attachment is the cause of sorrow. Sorrows are at the root of love (or any attachment). Live happily by letting them go.

यस्य, तस्य, दुःखस्य, all ष. वि. ए. व. of यद् -who, which, what, तद् - that, it, he, she, दुःखम्- grief, agony, sorrow-respectively, तानि- प्र. वि. ब. व. of तद्, दुःखानि- प्र. वि. ब. व. of दुःखम् , स्नेहः - affection, love ( also means oil, oiliness, grease, fat ) भयम्- fear, apprehension, risk, भाजनम् -sharing, having, giving (भाज्-१० ग. उ. प. and also causal of भज्- १ उ. प.- to share, enjoy, divide), स्नेहमूलानि- प्र. वि. ब. व. of स्नेहमूलम्- स्नेहस्य मूलम् -ष. तत्पुरुष स., मूलम्- root, beginning, basis, त्यक्त्वा- पू. कालवाचक त्वान्त धा. अव्यय of त्यज्- त्यजति १ ग. प. प.-to leave, abandon let go, सुखम्- happily, वसेत् - विध्यर्थ प्र.. पु. ए. व. of वस्- वसति १ ग. प. प. to live, stay, reside.

**यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा।**
**परापवादसस्येभ्यो गां चरन्तीं निवारय॥१४.१४॥**

यदि (त्वं) जगत् एकेन कर्मणा वशीकर्तुम् इच्छसि, (तदा) परापवादसस्येभ्यः चरन्तीं (तव) गां निवारय॥

If you wish to control the world just by a single act, then drive away that corn-grazing cow that criticizes others.

*Here the corn-grazing cow is a simile for a person that constantly blames others. A positive approach is a much better tool to win over the world.*

जगत्- world- न. लिं. द्वि. वि. ए. व., एकेन & कर्मणा- न. लिं. तृ. वि. ए. व. of एकम्- one, single & कर्मन्- an act, work, job, function, वशीकर्तुम्- to bring under control- पू. का. वा. तुमन्त हेत्वर्थक धा. सा. वि. of वशीकृ- to get under control, to influence- ( च्वि प्रत्यय to कृ- करोति- कुरुते ८ ग. उ. प. to do make), इच्छसि- वर्त. म. पु. ए. व. of इष्- इच्छति ६ ग. प. प. to desire, want, परापवादसस्येभ्यः- न. लिं. पं. वि. ब. व. of परापवादसस्यम्- पर- other, another, अपवाद- censure, blame, सस्यम्- grain, corn- परस्य अपवादः- परापवादः- ष. तत्पुरुष स. & परापवादः इव सस्यम्- परापवादसस्यम्- उपमानउत्तरपदकर्मधारय स., चरन्तीम् & गाम्- स्त्री. लिं. द्वि. वि. ए. व. of चरन्ती- grazing- (चरत्- वर्त. का. वा. धा. सा. वि. of चर्- चरति- १ ग. प. प. to graze, move) & गो- cow, निवारय- आज्ञार्थ म. पु. ए. व. of नि+ वृ- निवारयति- ते- to open, remove, ward off, keep away- (वृ-वरति, वारयति -१० ग. उ. प.- to cover ), यदि- in case, if- अव्यय

**त्यज दुर्जनसंसर्गं भज साधुसमागमम्।**
**कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्**॥१४.२०॥

दुर्जनसंसर्गं त्यज। साधुसमागमं भज। अहोरात्रं पुण्यं कुरु (तथा) नित्यम् अनित्यतां स्मर॥

Leave the company of wicked people. Associate yourself in the company of noble people. Strive to do meritorious deeds day and night. Always remember the uncertainty in the daily life.

त्यज, भज, कुरु & स्मर- all आज्ञार्थ म. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, quit, भज्- भजति- ते १ ग. उ. प. to be attached or devoted to, to attend or serve, कृ- करोति कुरुते ८ ग उ. प. to do, make, strive for & स्मृ- स्मरति १ ग. प. प. to remember, keep in mind, be aware of, दुर्जनसंसर्गम्- a company of wicked people- दुष्ट- spoiled, wicked, bad- क. भू. धा. वि. of दुष्- दुष्यति ४ ग. प. प. to be bad, wicked, जनः- person, people, संसर्ग- contact, company, association- दुष्टः जनः- दुर्जनः- प्रादि कर्मधारय स. & दुर्जनस्य संसर्गः- दुर्जनसंसर्गः- पु. लिं.- ष. तत्पुरुष स., साधुसमागमम्- association of noble people- साधुः- noble, saintly person, meeting, contact- साधोः समागमः- साधुसमागमः- ष. तत्पुरुष स पु. लिं., पुण्यम्- meritorious/good deed - न. लिं. & अनित्यताम्- uncertainty, fickleness, doubtfulness- नित्य- adjctv- perpetual, , everlasting- ता- suffix

implies: quality, nature- न नित्यता- अनित्यता- स्त्री. लिं- नञ् तत्पुरुष स.- all in द्वि. वि. ए. व., अहोरात्रम्- day and night (अहन्- न.लिं- a day, day time & रात्रिः/रात्री- स्त्री. लिं.- a night- अहोरात्रम्-अहनि च रात्रय: च एतेषां समाहार: -समाहार द्वन्द्व स, & नित्यम्- daily, constantly, always- both अव्यय

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।**
**तस्मात् तदेव वक्तव्यं वचने का दरिद्रता**॥१६.१२॥

सर्वे-जन्तवः प्रिय-वाक्य-प्रदानेन तुष्यन्ति। तस्मात् तद् एव वक्तव्यं (कुर्यात्)। वचने का दरिद्रता?

All living beings like pleasant talk. Hence that alone should be spoken. Why show stinginess while speaking?

सर्वे & जन्तवः - both पु. लिं. प्र. वि. ब. व. of सर्व- -all, entire and जन्तु- living being, man, person, प्रियवाक्यप्रदानेन- तृ. वि. ए. व. of प्रियवाक्यप्रदान- प्रियम् वाक्यम्- प्रियवाक्यम् –कर्मधारय स., प्रियवाक्यस्य प्रदानम्- प्रियवाक्यप्रदानम्- ष. तत्पुरुष स. -offering pleasant talk, तुष्यन्ति- प्र. पु. ब. व. of तुष्- तुष्यति- ४ ग. प. प. to be happy, satisfied, तस्मात् -therefore- पं. वि. ए. व. of तद्- it, this, एव (अव्यय)- alone, only, वक्तव्यम् -प्र.वि. ए. व. of वक्तव्य- क. विध्यर्थ धा. सा. वि of वच् -वक्ति,२ ग. - to say, tell, वचने- स. वि. ए. व. of वचन- speech, utterance, का and दरिद्रता- both स्त्री. लिं. प्र. वि. ए. व. of किम्- why, (which what) and दरिद्र- poor, mean- दरिद्र+ता -meanness, stinginess

**कृते प्रतिकृतिं कुर्यात् हिंसने प्रतिहिंसनम्।**
**तत्र दोषो न पतति दुष्टे दौष्ट्यं समाचरेत्**॥१७.२॥

(मनुष्यः) कृते प्रतिकृतिं कुर्यात् (तथा) हिंसने प्रतिहिंसनं कुर्यात्। तत्र दोषः न पतति।(मनुष्यः) दुष्टे दौष्ट्यं समाचरेत्॥

One should respond to an action with reaction. He should return a strike with a strike. There is no blemish in doing so. One must resort to cruelty towards a wicked person.

कृते, हिंसने & दुष्टे-all in पु. लिं. स. वि. ए. व. of कृतः- performed, done, deed, action, benefit, service, हिंसनः- one who is hurting, striking (हिंस्- हिंसति, हिनस्ति, हिंसयति- ते 1 & 7 प. प. & 10 ग. उ.प. to strike, hit, hurt, harm) & दुष्टः- a wicked or cruel person- दुष्ट- क.भू.धा.वि. of दुष्- दुष्यति 4 ग. प. प. to be bad, wicked, दौष्ट्यम्, प्रतिकृतिम् & प्रतिहिंसनम्- all in द्वि. वि. ए. व. of दौष्ट्यः- wickedness, cruelty, प्रतिकृतिः- revenge, retaliation, स्त्री. लिं.- कृतिः- doing, action, deed- कृतिम् प्रतिकृत्य- प्रतिकृतिम् & प्रतिहिंसनम्- न. लिं.- striking back,

hurting in revenge- हिंसनम् striking- हिंसनम् प्रतिकृत्य- both अव्ययीभाव स., कुर्यात् & समाचरेत्- both विध्यर्थ प्र. पु. ए. व. कृ- करोति, कुरुते 8 ग. उ. प. to do & सं+आ + चर्- to resort to, practice- (चर्- चरति 1 ग. प. प. to walk, go about), दोषः- blame, blemish, fault- in पु. लिं. प्र. वि. ए. व., पतति- वर्त. प्र. पु. ए. व. of पत्- 1 ग. प. प. to fall, occur, befall, तत्र- there, in that case & न- no, not- both अव्यय

## *8.2 Don'ts (अकर्तव्यानि)*

**यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः।**
**न च विद्यागमोऽप्यस्ति वासस्तत्र न कारयेत्॥१.८॥**

यस्मिन् देशे न सम्मानः (अस्ति), न वृत्तिः (अस्ति), न च बान्धवाः (सन्ति), न च विद्यागमः अपि अस्ति, तत्र (कोऽपि) वासः न कारयेत्॥

Nobody should stay in a country where there is no respect for an individual, no means of living, no relatives and not even a possibility to acquire knowledge.

यस्मिन्- in which & देशे- पु. लिं. स. वि. ए. व. of यद्- which & देशः- country, region place, वृत्तिः- occupation, business, means of existence- स्त्री. लिं. प्र. वि. ए. व., बान्धवाः- in पु. लिं. प्र. वि. ब. व. of बान्धव- relative, kinsman, अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, कारयेत्- प्रयोजक विध्यर्थ प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, सम्मानः- dignity, honour, कश्चित्- some, little bit, विद्यागमः- facility of learning, possibility of gaining knowledge- विद्या- स्त्री. लिं.- Knowledge, education,आगमः- acquisition, course, arrival, coming- विद्यायाः आगमः- विद्यागमः- ष. तत्पुरुष स.-all in पु. लिं. प्र. वि. ए. व., वासः- न. लिं. द्वि. वि. ए. व. of वासस्- lodging for the night stay, अपि- even, also, तत्र- there, in that place, न- no, not, च- and- all अव्यय

**धनिकः पण्डितो राजा नदी वैद्यस्तु पञ्चमः।**
**पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत्॥१.९॥**

धनिकः, पण्डितः (श्रोतियः), राजा, नदी (तथा) पञ्चमः तु वैद्यः (एते) पञ्च यत्र न विद्यन्ते, तत्र (मनुष्यः) दिवसं न वसेत्॥

One should not stay even for a day in that town, where these five - a wealthy person, a scholar, a King, a river and the fifth, a physician- do not exist.

धनिकः- a wealthy person, पण्डितः- a scholar, learned, expert, (श्रोतियः -one who is proficient in Vedas), राजा -(राजन्)- King, Ruler, पञ्चमः- adjctv- a fifth one, वैद्यः- a physician, doctor- पु. लिं. प्र. वि. ए. व., नदी- a river- स्त्री. लिं. प्र. वि. ए. व., पञ्च- पु/स्त्री/न. लिं. प्र. वि. ए. व. of पञ्चन्- five, विद्यन्ते- वर्त. प्र. पु. ब. व. of विद्- विद्यते ४ ग. आ. प. to exist, to be, दिवसम्- पु/न. लिं. द्वि. वि. ए. व. of दिवस- a day, वसेत्- shall stay- विध्यर्थ प्र. पु. ए. व. of वस्- वसति १ ग. प. प. to dwell, live, stay, यत्र- where, in which place, तत्र- there, in that place, न- no, not, तु- but, on the other hand, and- all अव्यय

**लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता।**
**पञ्च यत्र न विद्यन्ते न कुर्यात्तत्र संगतिम्**॥१.१०॥

यत्र लोकयात्रा, भयं, लज्जा, दाक्षिण्यं (तथा) त्यागशीलता (एते) पञ्च न विद्यन्ते, तत्र (मनुष्यः) संगतिं (संस्थितिं) न कुर्यात्॥

One should not create a residence, where these five do not exist- namely, means of living, fear (of wrong doing), modesty, civility and philanthropy.

लोकयात्रा- worldly affair, business of the world, means of existence- लोकः- people, world, earth, यात्रा- journey, support of life, livelihood- लोकस्य यात्रा- ष. तत्पुरुष स., लज्जा- modesty, shame, prudency & त्यागशीलता- tendency for giving, philanthropic nature- त्यागः- gift, donation, giving up, शीलता- nature, disposition, conduct- त्यागयुक्ता शीलता- त्यागशीलता- मध्यम प. लो. स.- all in स्त्री. लिं. प्र. वि. ए. व., भयम्- fear, terror, dread, risk & दाक्षिण्यम्- politeness, courtesy, civility- both in न. लिं. प्र. वि. ए. व., पञ्च- प्र. वि. ब. व. of पञ्चन्- five, विद्यन्ते- वर्त. प्र. पु. ब. व. of विद् -विद्यते ४ ग. आ. प. to be, to exist, to remain, संगतिम् & संस्थितिम्- both in स्त्री. लिं. द्वि. वि. ए. व. of संगतिः & संस्थितिः- association, company, staying, residence, nearness, abode, कुर्यात्- विध्यर्थ प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, यत्र- where, which place, तत्र- there, in that place, न- no, not- all अव्यय

**अति दानात् बलिर्बद्धो ह्यतिमानात् सुयोधनः।**
**अति लौल्यात् रावणो हतः अति सर्वत्र वर्जयेत्**॥३.१२॥

बलिः अति दानात् बद्धः। सुयोधनः हि अति- मानात् नष्टः। रावणः अति लौल्यात् हतः। अति सर्वत्र वर्जयेत्॥

(King) Bali was tied due to his excessive charity. Duryodhana met his ruin due to his extreme pride. Rāvaṇa was killed due to his excessive passion for women. Anything in excess must be avoided in all circumstances.

*Lord Viṣṇu, as a dwarf Brahmin, asked King Bali for three steps of land. When the King granted his wish, the dwarf grew in size and consumed Earth and Heavens in two steps. With no place for the third step, King Bali, out of his zeal to grant whatever the dwarf wanted, asked him to put his foot on his head. That tied him down to the lowest of the seven worlds. Duryodhan could have avoided the whole Mahābhārata war, if he had agreed to the five-village demand from the Pandavaas.*

*King* Rāvaṇa *of Lankā kidnapped Sītā, Lord Rāma's wife, because he was infatuated with her beauty.*

बलिः, रावणः, सुयोधनः, सीता- all प्र. वि. ए. व. of names,अति- excessive- (अव्यय), दानात् , मानात् लौल्यात्, रूपात् -all पं. वि. ए. व. of दान- charity, giving, मान- pride, haughtiness, ( also means honour, respect), लौल्य- greediness, passion & रूप- beauty- respectively. बद्ध- confined, held captive- क. भू. धा. वि. of बंध् -बध्नाति ९ ग.प. प. to bind, make captive, हि-(अव्यय) for instance, because, only, विनष्टः नष्टः ruined - क.भू. धा. वि. of वि+नश् & नश् - नश्यति ४ ग. प. प.- -to be lost, ruined, हतः- killed- क. भू. धा. वि. of हन्- हन्ति २ ग. प. प. to kill, destroy, सर्वत्र -(अव्यय)- everywhere, वर्जयेत्- आज्ञार्थ प्र.. पु. ए. व. of वृज्- वर्जति १ ग. प. प. & १० ग. उ. प. वर्जयति-ते to shun, avoid, give up, हृता- स्त्री. लिं. प्र. वि. ए. व. of हृत- क.भू. धा. वि. of हृ - हरति-ते १ ग. उ. प.- to take away, carry, गर्वेण-तृ. वि. ए. व. of गर्व- pride, haughtiness

**अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।**
**वञ्चनं चापमानं च मतिमान्न प्रकाशयेत्**॥७.१॥

मतिमान् अर्थनाशं मनस्तापं, गृहे दुश्चरितानि च, वञ्चनं च, अपमानं च न प्रकाशयेत्॥

A wise man should not disclose his loss of money, his mental agony, misbehaviour in his own home and frauds and insults (suffered by him.)

मतिमान्- पु. लिं. प्र. वि. ए. व. of मतिमत्- intelligent person- मतिः- स्त्री. लि.- intellect, knowledge- मत्- suffix implies quality, अर्थनाशम्, मनस्तापम्, वञ्चनम् & अपमानम्- न. लिं. द्वि. वि. ए. व. of अर्थनाश- loss of money- अर्थ- money, purpose, नाश- destruction, loss- अर्थस्य नाशम् & मनस्तापम्- mental agony, pain- मनस्- न. लिं.- mind, heart तापम्- trouble, heat, pain, मनसः तापम्- both ष. तत्पुरुष स., वञ्चन- cheating, fraud- (वञ्च्- वञ्चति १. ग. प. प. to cheat) & अपमान- insult, disgrace, disrespect, humiliation, गृहे- न. लि. स. वि. ए. व. of गृह- house, abode, दुश्चरितानि- न. लिं. द्वि. वि. ब. व. of दुश्चरित- misbehaviour, wrong doing- चरित- behaviour, character- क. भू. धा. वि. of चर्- चरति १ ग. प. प. to walk, move- दुस्- prefix implies: bad, evil- दुरितम् चरितम्- प्रादि कर्मधारय स., प्रकाशयेत्- विध्यर्थ प्र. पु. ए. व. of प्र+काश्- to bring out, publish, reveal-

(काश्- काशते & काश्यते- १ & ४ ग. आ. प. to shine, look brilliant), च- and, न- no, not

**विप्रयोर्विप्रवह्न्योश्च दम्पत्योः स्वामिभृत्ययोः।**
**अन्तरेण न गन्तव्यं हलस्य वृषभस्य च**॥७.५॥

विप्रयोः, विप्रवह्न्योः च दम्पत्योः, स्वामिभृत्ययोः, हलस्य वृषभस्य च अन्तरेण न गन्तव्यम्॥

One should not walk thru between two priests (Brahmins), between priest and the fire, between a couple (husband and wife), between the Master and servant and between a plough and bullock.

*King Bhoja once saw his queen talking to poet Māgha and tried to overhear their conversation.The queen noticed him and said 'Come in, Stupid!' The King got upset but did not understand what stupidity he had committed. Next morning in the court, he welcomed every one by saying, 'Come in, Stupid'. None could dare question the King. When Māgha entered and got this welcome, he responded with this shloka why the Queen had called him stupid as he was interfering in their conversation.*

विप्रयोः, विप्रवह्न्योः, दम्पत्योः, स्वामिभृत्ययोः- all in पु. लिं. ष. वि. द्वि. व. of विप्र- a priest, Brahmin, विप्रवह्नि- a priest and fire- विप्रः च वह्निः च - द्वंद्व स., दम्पती- (पु. लिं. द्वि. व.)- a couple, husband and wife, स्वामिभृत्य- Master and servant- स्वामिः च भृत्यः च -द्वंद्व स., हलस्य & वृषभस्य- पु. लिं. ष. वि. ए. व. of हल- a plough & वृषभ- bullock, ox, च- and, अन्तरेण- तृ. वि. ए. व. of अन्तर- between, difference, न- no, not, गन्तव्यम्- न. लिं. प्र. वि. ए. व. of गन्तव्य- कर्मणि वि. धा. सा. वि. of गम्- गच्छति १ ग. प. प. to go, move

**यत्रोदकं तत्र वसन्ति हंसाः**
**तथैव शुष्कं परिवर्जयन्ति।**
**न हंसतुल्येन नरेण भाव्यं**
**पुनस्त्यजन्तः पुनराश्रयन्ते**॥७.१३॥ -त्रिष्टुभ

हंसाः, यत्र उदकम् (अस्ति) तत्र वसन्ति तथा शुष्कम् एव परिवर्जयन्ति। (ते तथा) त्यजन्तः पुनः पुनः आश्रयन्ते। नरेण हंसतुल्येन न (कदाचन) भाव्यम्॥

Swans inhabit an area with water. They abandon it once it gets dry. After abandoning, they return to the same place again and again (when full of water). A man should not behave like that.

हंसाः & त्यजन्तः- both in पु. लिं. प्र. वि. ब. व. of हंसः- swan & त्यजन्- leaving, abandoning- कर्तरि वर्त. का. वा. धा. सा., उदकम्- water-in न. लिं. प्र. वि. ए. व., शुष्कम्- dry, arid- in न. लिं. द्वि. वि. ए. व., वसन्ति, परिवर्जयन्ति & आश्रयन्ते- all in वर्त. प्र. पु. ब. व. of वस्- वसति १ ग. प. प. to live, inhabit, परि+ वृज्- to shun or avoid

totally- (वृज्- वर्जति, वर्जयति- ते १ ग. प. प. & १० ग. उ. प. to shun, avoid) & आ+ श्रि- to seek refuge with, to inhabit- (श्रि- श्रयति- ते- to go to, approach), नरेण & हंसतुल्येन- both in पु. लिं. तृ. वि. ए. व. of नरः- a man, person & हंसतुल्यः- one who is like a swan- हंसः- swan, तुल्यः- comparable to, similar to, हंसाय तुल्यः - हंसतुल्यः- च. तत्पु स., भाव्यम्- to be performed, behaved, followed- in न. लिं. प्र. वि. ए. व.- भाव्य (also भवितव्य, भवनीय & भव्य)- क. वि. धा. सा. वि. of भू- भवति १ ग. प. प. to be, to happen, to exist, यत्र- where, in which place, तत्र- there, न- no, not, तथा- like that, similarly, same way, एव- just, merely, only, तथा एव- like that only, पुनः (पुनर्)- again, - all अव्यय

**नात्यन्तं सरलैर्भाव्यं गत्वा पश्य वनस्थलीम्।**
**छिद्यन्ते सरलास्तत्र कुब्जास्तिष्ठन्ति पादपाः**॥७.१२॥

(मनुजैः) न अत्यन्तं सरलैः भाव्यं ।(त्वं) वनस्थलीम् गत्वा पश्य। तत्र सरलाः पादपाः छिद्यन्ते। कुब्जाः (पादपाः) तिष्ठन्ति॥

Men should not be too straight (-forward). Go to a forest and you will see that the straight trees are chopped down while curved (trees) survive!

*Be flexible!*

न- no, not, अत्यन्तम्- adjctv-very much, extremely, excessively, perfect, सरलैः-तृ. वि. ब. व. of सरल-straight, भाव्यम्-worth to be, performed- भाव्य-भवनीय-भवितव्य-भव्य- कर्मणि विध्यर्थ धा. सा. वि. of भू-भवति १ ग प. प to be, गत्वा-after going- पू. का. वा. त्वांत धा. सा. अव्यय of गम्-गच्छति १ ग. प. प. to go, वनस्थलीम् -द्वि. वि. ए. व. of वनस्थली-forest, woods पश्य-आज्ञार्थ म. पु. ए. व. of दृश्-पश्यति १ ग. प. प. to see, observe, तत्र-अव्यय-there, in that place, सरलाः, पादपाः & कुब्जाः- प्र. वि. ब. व. of सरल-straight, पादप-tree- पदैः पिबति इति -उपपद तत्पुरुष स. & कुब्ज- dwarf, curved, crooked छिद्यन्ते- get cut-कर्मणि प्रयोग प्र पु. ब. व. of छिद्- ७ ग. उ. प. छिनत्ति-छिंत्ते to cut, rend, तिष्ठन्ति-वर्त. प्र. पु. ब. व. of स्था-तिष्ठति १ ग. प. प. to stand, survive,

**अहिं नृपं च शार्दूलं किटिं च बालकं तथा।**
**परश्वानं च मूर्खं च सप्त सुप्तान्न बोधयेत्**॥९ ७॥
पाठभेदः - वृटिं, वराटं, वृद्धं च

अहिं, नृपं, च शार्दूलं, किटिं (वृटिं, वराटं, वृद्धं) च बालकं तथा परश्वानं च मूर्खं च (एता) सप्त सुप्तान् न बोधयेत्॥

When they are sleeping, (one should not) awaken these seven- a snake, a king, a tiger, a hog (pig, or an old man), a child, other's dog and a fool.

*It is likely that a snake, a tiger, hog or a dog will attack you if they are disturbed in any way, especially when asleep. A king should not be disturbed unless absolutely necessary. Both a child and an old man can get cranky if they do not receive adequate sleep.*

अहिम्, नृपम्, शार्दूलम्, किटिम्, वृटिम्, वराटम्, वृद्धम्, बालकम्, परश्वानम्, मूर्खम्-पु. लिं. द्वि. वि. ए. व. of अहि-a snake, serpent, नृप-a king, शार्दूल-a tiger or leopard or panther, किटि-वृटि- वराट-all mean-a hog, pig, वृद्ध-an old person -क. भू धा. वि. of वृध्-वर्धते् १ ग. आ. प. to grow, increase, बालक- child, परश्वान-other's dog- पर- the other, श्वान-a dog- परस्य श्वानः - ष. तत्पुरुष स., मूर्ख-a fool, stupid person, तथा-and, च-and, सप्त-प्र.वि. ए. व. of सप्तन्-seven, सुप्तान्- प्र. वि. ब. व. of सुप्त- sleeping, slept, asleep - क. भू. धा. वि. of स्वप्-स्वपिति २ ग. प. प. & स्वपति-ते १ ग. उ. प. to sleep, न- no, not, बोधयेत्- प्रयोजक विध्यर्थ प्र. पु. ए. व. of बुध्-१ ग. उ. प. बोधति-ते & ४ ग. आ. प. बुध्यते- to wake up, understand, know, perceive, deem

**मुहूर्तमपि जीवेद्वै नरः शुक्लेन कर्मणा।**
**न कल्पमपि कृष्णेन लोकद्वयविरोधिना**॥१३.१॥

नरः मुहूर्तम् अपि शुक्लेन कर्मणा जीवेत् वै । नरः कल्पम् अपि न जीवेत् च, कृष्णेन कष्टेन लोकद्वयविरोधिना (कर्मणा जीवेत्)॥

A person should live just for a moment with a good deed than live millions of years by indulging in bad and evil deeds, which are opposed to living in the two worlds.

*The two worlds are- the one that we are living in now and one that we will go to after death.*

नरः- a man- in पु. लिं. प्र. वि. ए. व., मुहूर्तम् & कल्पम्- both in पु. लिं. द्वि. वि. ए. व. of मुहूर्तः- moment, a small duration & कल्पः- 432 million years, जीवेत्- विध्यर्थ प्र. पु. ए. व. of जीव्- जीवति- १ ग. प. प. to live, to be alive, survive, शुक्लेन, कर्मणा, कृष्णेन, कष्टेन & लोकद्वयविरोधिना- all in तृ. वि. ए. व. of शुक्ल- adjctv- white, pure, bright, कर्मन्- न. लिं- work, deed, कृष्ण/ कष्ट- adjctv- black, bad, evil, wrong & लोकद्वयविरोधिन्- adjctv- one which is opposed to interest of both worlds- लोकम्- world, द्वयम्- a pair, couple, विरोधिन्- opposing, contradicting, resisting, inconsistent with- द्वयम् लोकम्- वि. उ. प. कर्मधारय स. & लोकद्वयस्य विरोधिन् - षष्ठी तत्पु स., अपि -also, even, वै- a particle of affirmation, certainty, च- and, न- no, not- all अव्यय

**गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत्।**
**वर्तमानेन कालेन वर्तयन्ति विचक्षणाः**॥१३ २॥

(मनुष्येण) गते (वृत्तांते, प्रसंगे) शोकः न कर्तव्यः (भूयते)। (सः) भविष्यं (प्रसङ्गं) न एव चिन्तयेत्। विचक्षणाः वर्तमानेन कालेन (एव) वर्तयन्ति॥

One should not mourn about the past. (Neither) should he worry about the future. Wise men focus (only) on the present time.

*Enjoy the present moment!*

गते- पु/न. लिं. स. वि. ए. व. of गत- past, bygone- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, शोकः- grief, sorrow, lament & कर्तव्यः-a thing to be done, a duty- कर्तव्य- (also करणीय, कार्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make- both in पु. लिं. प्र. वि. ए. व., भविष्यम्- पु/न. लिं. द्वि. वि. ए. व. of भविष्य- future, that which is going to happen, impending, चिन्तयेत्- विध्यर्थ तृ. पु. ए. व. of चिन्त्- चिन्तयति- ते १० ग. उ. प. to think, consider, mind, विचक्षणाः- in पु. लिं. प्र. वि. ब. व. of विचक्षण- knowledgeable, learned, wise, वर्तमानेन & कालेन- in पु. लिं. तृ. वि. ए. व. of वर्तमान- present, ongoing- वर्त. का. वा. धा. सा. वि. of वृत्- वर्तते १ ग. आ. प. to be, happen & काल- time, period, वर्तयन्ति- प. प.प्रयोजक वर्त. प्र. पु. ब. व. of वृत्, न एव- never- अव्यय

**सुसिद्धमौषधं धर्मं गृहच्छिद्रं च मैथुनम्।**
**कुभुक्तं कुश्रुतं चैव मतिमान्न प्रकाशयेत्**॥१४.१७॥

मतिमान् (नरः) सुसिद्धम् औषधं, धर्मं, गृहच्छिद्रं, मैथुनं, कुभुक्तम् (अन्नम्) च कुश्रुतं च एव न प्रकाशयेत्॥

A wise person should never disclose (to anyone), his proven medicine, his Dharma, faults in his household, his sexual acts, bad food that he has eaten and unfounded rumours.

*It does not make sense why one should not disclose one's proven medicine or his Dharma! It would make sense only if one does not want to disclose his ill health and his controversial views. In those cases, disclosing his bad health, although successfully treated or his Dharma, although well founded, may not bring him goodness or may even hurt him.*

मतिमान्- पु. लिं. प्र. वि. ए. व. of मतिमत्- an intelligent, wise, understanding, sensible person- मतिः- wisdom, mind, thought & मत्- suffix implies quality, possession, सुसिद्धम्- well prepared, well proved- सिद्ध- क. भू. धा. वि. of सिध्- सिध्यति ४ ग. प. प. to accomplish, attain, to be proved, औषधम्- medicine, herb, गृहच्छिद्रम्- household weakness, shortcoming- गृहम्- house home,

छिद्रम्- defect, flaw, blemish, weak point- गृहस्य छिद्रम्- गृहच्छिद्रम्- ष. तत्पुरुष स., मैथुनम्- sexual act, compilation, कुभुक्तम्- bad food eaten- भुक्त- क. भू. धा. वि. of भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to eat, enjoy, possess- कु- अव्यय- a prefix implies bad, miserable, little- कुत्सितम् भुक्तम्- कुभुक्तम् & कुश्रुतम्- degraded news or ugly talks heard- श्रुत- क. भू. धा. वि. of श्रु- शृणोति ५ ग. प. प. to hear, learn, study- कुत्सितम् श्रुतम्- कुश्रुतम्- both प्रादि कर्मधारय स.- all in न. लिं. द्वि. वि. ए. व., धर्मम्- in पु. लिं. द्वि. वि. ए. व. of धर्मः- accepted codes of conduct, duty- (Dharma), प्रकाशयेत्- प्रयोजक विध्यर्थ प्र. पु. ए. व. of प्र+ काश्- to reveal, display, disclose- (काश्- काशते, काश्यते १, ४ ग. आ. प. to shine, look brilliant, beautiful), च- and, एव- just merely, only, न- no, not- all अव्यय

★★★★★★

# Chapter 9 - Miscellaneous Verses (सङ्कीर्ण सुभाषित)

Cāṇakya Nīti has many verses related to Hindu Deities such as Brahmā (ब्रह्मा) - the Creator, Viṣṇu (विष्णु) - the Preserver and Siva (शिव) - the destroyer, Lakṣmī (लक्ष्मी) the Goddess of wealth, Kṛṣṇa (कृष्ण) - an incarnation of Viṣṇu, Saraswati (सरस्वती) - Goddess of education, etc. Those and other miscellaneous verses are included in this chapter.

## *9.1 About our deities*

**काष्ठपाषाणधातूनां कृत्वा भावेन सेवनम्।**
**श्रद्धया च तथा सिद्धिस्तस्य विष्णुः प्रसीदति॥**८.१२॥

(मनुष्यस्य) काष्ठपाषाणधातूनां भावेन तथा श्रद्धया च सेवनं कृत्वा सिद्धिः (भवति)। तस्य विष्णुः प्रसीदति॥

One realizes his spiritual goal by worshipping God Viṣṇu with sincerity and devotion. He can be in any form of wood, stone or metal Idol. (By doing so) God Viṣṇu would be pleased with him.

काष्ठपाषाणधातूनाम्- in पु. लिं. ष. वि. ब. व. of काष्ठपाषाणधातुः- wood, stone and metal- काष्ठम्- a piece of wood, पाषाणः- stone, धातुः- metal, mineral- काष्ठम् च पाषाणः च धातुः च- द्वंद स., कृत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ- करोति कुरुते ८ ग. उ. प. to make, do, भावेन & श्रद्धया- both in तृ. वि. ए. व. of भावः- feeling, devotion, sincerity & श्रद्धा- confidence, belief, trust, सेवनम्- act of serving, worshipping, attending upon- in न. लिं. द्वि. वि. ए. व., सिद्धिः- accomplishment, fulfilment, complete attainment, तस्य- to him- in पु. लिं. ष. वि. ए. व. of तद्- he, विष्णुः- Vishnu, God Almighty, प्रसीदति- वर्त. प्र. पु. ए. व. of प्र +सद्- to be pleased, gracious, appeased- (सद्- सीदति- १ ग. प. प. to sit, lie down, to be in distress, despair)

**गन्धं सुवर्णे फलमिक्षुदण्डे,**
**नाकारि पुष्पं खलु चन्दनस्य।**
**विद्वान्धनी भूपतिर्दीर्घजीवी,**
**धातुः पुरा कोऽपि न बुद्धिदोऽभूत्॥**९.३॥ - त्रिष्टुभ

(धात्रा) सुवर्णे गन्धं, इक्षुदण्डे फलं, चन्दनस्य पुष्पं, विद्वान् धनी, भूपतिः दीर्घजीवी खलु न अकारि । पुरा कः अपि धातुः बुद्धिदः न अभूत्॥

The Creator did not put fragrance in gold, nor did He grow fruits on sugarcane or flowers on a sandalwood tree. Likewise, He did not make learned person wealthy nor did He give a long life to a King. Perhaps, there was no one to give Him good advice during creation (in old times)!

गन्धम्, फलम् & पुष्पम्- all in द्वि. वि. ए. व. of गन्धः- पु. लिं.- fragrance, smell, फलम्- न. लिं.- fruit & पुष्पम्- न. लिं.- flower, सुवर्णे & इक्षुदण्डे- both स. वि. ए. व. of सुवर्णम्- gold & इक्षुदण्डः- पु. लिं.- sugarcane stick- इक्षुः- sugarcane, दण्डः- stick- इक्षोः दण्डः- इक्षुदण्डः- ष. तत्पुरुष स., अकारि- कर्मणि प्रयोग सा. भूत. प. प. प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, चन्दनस्य & धातुः- पु/न. लिं. ष. वि. ए. व. of चन्दन- sandalwood & धातृ- the Creator, epithet of Brahmā, विद्वान् (विद्वस्)- scholar, learned, धनी (धनिन्)- wealthy, rich, भूपतिः- King, Ruler- भू- earth, land & पतिः- master, owner, husband- भुवः पतिः- भूपतिः- ष. तत्पुरुष स., दीर्घजीवी (दीर्घजीविन्)- one who lives a long life- दीर्घः- long, long lasting, जीविन्- living being- दीर्घः जीवी- दीर्घजीवी- वि. पू. प. कर्मधारय स., धनाढ्यः- very wealthy person- धनम्- wealth, money, आढ्यः- adjctv- rich in, abounding in- धनेन आढ्यः- धनाढ्यः- तृ. तत्पुरुष स., नृपः- King- नृ- man, human, नृन् पाति इति- नृपः- उपपद तत्पुरुष स., चिरायुः- one with long life- चिर- adjctv- long, long lasting, आयुः (आयुस्)- life, duration of life- चिरम् आयुः यस्य सः- चिरायुः- बहुव्रीहि स., बुद्धिदः- one who can enlighten- बुद्धिः- wisdom, knowledge, intelligence- बुद्धिम् ददाति इति- बुद्धिदः- उपपद तत्पुरुष स., कः (किम्)- who, which & न कः अपि- no one, none- all in पु. लिं. प्र. वि. ए. व., अभूत्- सा. भूत. प्र. पु. ए. व. of भू- भवति १ ग. प. प. to exist, to be, पुरा - in the former times, in the olden days, न-no, not, अपि- even, also, खलु - indeed, surely, च- and- all अव्यय

**का चिन्ता मम जीवने यदि हरिर्विश्वम्भरो गीयते**
**नो चेदर्भकजीवनाय जननीस्तन्यं कथं निर्मयेत्।**
**इत्यालोच्य मुहुर्मुहुर्यदुपते लक्ष्मीपते केवलं**
**त्वत्पादाम्बुजसेवनेन सततं कालो मया नीयते**॥१०.१७॥- शा. वि.

'यदि हरिः विश्वम्भरः गीयते, मम जीवने का चिन्ता? नो चेद् अर्भकजीवनाय जननीस्तन्यम् कथं निर्मयेत्?' इति मुहुः मुहुः आलोच्य, (हे) यदुपते लक्ष्मीपते, त्वत् पादाम्बुजसेवनेन मया सततं कालः केवलं नीयते॥

When Lord Viṣṇu is said to be the all- pervading (Supreme Spirit), what is to worry about in my life? If it were not for Him, how is milk produced in breast of the mother for sustenance of a newborn? Thinking this repeatedly, Oh, Kṛṣṇa, Oh Viṣṇu, I constantly spend my time in the service of your lotus-feet.

यदुपते & लक्ष्मीपते-both in पु. लिं.सं. वि. ए. व. of यदुपतिः- Lord of Yadavas- Kṛṣṇa - यदुः- an ancient King, ancestor of Yadavas- यादवानाम् पतिः & लक्ष्मीपतिः- Lord of Lakshmi-epithet of Vishnu- लक्ष्मीः- Goddess of wealth- लक्ष्म्याः पतिः- both ष. तत्पुरुष स., हरिः- God, Viṣṇu विश्वम्भरः- all sustaining, pervading, supreme spirit- विश्वम्- the universe, world- विश्वम् भरति इति- उपपद तत्पुरुष स. & कालः- time, period- all in पु. लिं. प्र. वि. ए. व., गीयते & नीयते- both कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of गै- गायति १ ग. प. प. to sing, to describe in a song & नी- नयति-ते १ ग. उ. प. to lead, to carry off, मम- my- ष. वि. ए. व. of अस्मद्- I, we, जीवने- in न. लिं. स. वि. ए. व. of जीवनम्- existence, sustainance, का- what & चिन्ता- worry, anxiety, thought- both in स्त्री. लिं. प्र. वि. ए. व., अर्भकजीवनाय- in न. लिं. च. वि. ए. व. of अर्भकजीवनम्- अर्भकः- just born child, young one of an animal, जीवनम्- see above- अर्भकस्य जीवनम्- ष. तत्पुरुष स., जननीस्तन्यम्- milk of mother's breast- in न. लिं. द्वि. वि. ए. व.- जननी- mother, स्तनः- the female breast, स्तन्यम्- mother's milk- जनन्याः स्तन्यम्- ष. तत्पुरुष स., निर्मयेत्- in प. प. विध्यर्थ प्र. पु. ए. व. of निस्+ मय्- to produce, create, make- (मय्- मयते १ ग. आ. प. to go, move), आलोच्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of आ+ लोच्- to think ponder, consider, perceive- (लोच्- लोचते १ ग. आ. प. to see, observe), मया- by me- in तृ. वि. ए. व. of अस्मद्- I, त्वत्- yours- in पं. वि. ए. व. of युष्मद्- you पादाम्बुजसेवनेन- in न. लिं. तृ. वि. ए. व. of पादाम्बुजसेवनेम्- service of lotus feet- पादः-foot, अम्बु- न. लिं- water- अम्बुनि जायते इति- अम्बुजम्- Lotus- पादम् अम्बुजम् इव- पादाम्बुजम्- उपमा उ. प. कर्मधारय स. & पादाम्बुजस्य सेवनेम्- ष. तत्पुरुष स, यदि- if, in case, त्वत् - your इति- a particle used to report the very words spoken- thus, so, मुहुः (मुहुस्)- often, constantly- मुहुः मुहुः- over and over again, repeatedly कथम्- how, which way, manner, नो चेद्- if not, otherwise, केवलम्- only, merely, solely, सततम्- always, repeatedly- all अव्यय

**येषां श्रीमद्यशोदासुतपदकमले नास्ति भक्तिर्नराणां**
**येषामाभीरकन्याप्रियगुणकथने नानुरक्ता रसज्ञा।**
**येषां श्रीकृष्णलीलाललितरसकथासादरौ नैव कर्णौ**
**धिक् तान् धिक् तान् धिगेतान् कथयति सततं कीर्तनस्थो मृदङ्गः**
॥१२.५॥- आर्या

येषां नराणां श्रीमद्-यशोदा-सुत-पद-कमले भक्तिः न अस्ति, येषां रसज्ञा आभीर-कन्या-प्रिय-गुण-कथने न अनुरक्ता (अस्ति), येषां कर्णौ श्रीकृष्ण-लीला-ललित-रस- कथा- सादरौ न एव (स्तः), धिक् तान् धिक् तान्, धिक् एतान् (इति) कीर्तनस्थः मृदङ्गः सततं कथयति॥

For those who have no devotion to the lotus feet of child of gracious Yashoda, for those whose tongue is not fully devoted singing the virtues of beloved of Gopis, Kṛṣṇa, for those whose ears are never respectful to the stories of tastefully pleasing plays of Lord Shri Kṛṣṇa, the 'Mrudanga'

present at the recital, keeps saying, "Shame to them, Shame to them, Shame to all of them".

*There is a double meaning of 'धिक् तान् धिक् तान्! First, it is the sound of the 'Mrudanga' and second, it is its literal meaning of 'Shame to them'.*

येषाम् & नराणाम्- both in पु. लिं. ष. वि. ब. व. of यद्- who & नरः- person, man, श्रीमद्यशोदासुतपदकमले & आभीरकन्याप्रियगुणकथने- both in न. लिं. स. वि. ए. व. of श्रीमद्यशोदासुतपदकमलम्- Lotus feet of child of gracious Yashoda- श्रीमत्- adjctv- virtuous, graceful, यशोदा Yashoda, सुत- son, पदः- foot, कमलम्- lotus- श्रीमती यशोदा - श्रीमद्यशोदा- वि. पू. प., पदौ कमलम् इव- पदकमलम्- उपमा. उ. प. कर्मधारय स., श्रीमद्यशोदायाः सुतः- श्रीमद्यशोदासुतः & श्रीमद्यशोदासुतस्य पदकमलम्- both ष तत्पुरुष स., आभीरकन्याप्रियगुणकथनम्- singing praise of virtues of the beloved of cowherd girls- आभीर- cowherd, कन्या- girl, प्रिय- beloved, dear, गुण- virtue, कथनम्- singing praise- आभीरस्य कन्या- आभीरकन्या - Gopi, आभीरकन्यानाम् प्रियः- आभीरकन्याप्रियः -कृष्ण आभीरकन्याप्रियस्य गुणस्य कथनम्- ष. तत्पुरुष स., भक्तिः- devotion, reverence, रसज्ञा- tongue- रसः- taste,, flavour, ज्ञ- adjctv- knowing- रसम् जानाति या सा- बहुव्रीहि स. अनुरक्ता- loyally devoted- अनुरक्त- क. भू. धा. वि. of अनु+ रंज्- (रंज्- रजति- ते १ ग. उ. प. to be attached, devoted), कर्णौ & श्रीकृष्णलीलाललितरसकथासादरौ- both in पु. लिं. प्र. वि. द्वि. व. of कर्णः- an ear & श्रीकृष्णलीलाललितरसकथासादरः- one who is respectful to narration of tastefully pleasing playful sports of Lord Shrikrishna- श्रीकृष्ण- lord Krishna, लीला- playful sport, ललित- elegant, pleasing, रस- taste, Rasa- expression of sentiment- कथा- story आदरः- reverence- आदरेण सह- सादरः- सहबहुव्रीहि स.- ललितः रसः- ललितरसः- वि. पू. प. कर्मधारय स. & श्रीकृष्णस्य लीलायाः ललितरसस्य कथायाः सादरः यः सः- बहुव्रीहि स., तान् & एतान्- both in पु. लिं. द्वि. वि. ब. व. of तद्- he, it, that & एतद्- this one, कीर्तनस्थः- one present at recital of stories- कीर्तनम्- recital of stories (in praise of God)- कीर्तने तिष्ठति इति -उपपद स. & मृदङ्गः- a type of drum- both in पु. लिं. प्र. वि. ए. व., कथयति- वर्त. प्र. पु. ए. व. of कथ्- १० ग. उ. प. to tell, declare, न- no, not, एव- just, only, mere, धिक्- an interjection of censure, displeasure & सततम्- always, constantly-all अव्यय

**धर्मे तत्परता मुखे मधुरता दाने समुत्साहता**
**मित्रेऽवञ्चकता गुरौ विनयता चित्तेऽतिगम्भीरता।**
**आचारे शुचिता गुणे रसिकता शास्त्रेषु विज्ञानता**
**रूपे सुन्दरता शिवे भजनता त्वय्यस्ति भो राघव**॥१२.१५॥ शा.वि.

पाठभेद: त्वय्यस्ति भो राघव= सत्स्वेव सन्दृश्यते॥

भोः राघव! धर्मे तत्परता, मुखे मधुरता, दाने समुत्साहता, मित्रे अवञ्चकता, गुरौ विनयता, चित्ते अति- गम्भीरता, आचारे शुचिता, गुणे रसिकता, शास्त्रेषु विज्ञानता, रूपे सुन्दरता, शिवे भजनता, त्वयि (एव) अस्ति /सत्सु एव सन्दृश्यते॥

Oh Rāghava ! All these qualities - total dedication to 'Dharma', pleasantness in speech, eagerness to give, honesty with friends, politeness to elders, deep thinking mind, purity in behaviour, appreciation of good quality, thorough knowledge of scriptures, handsome in appearance and devotion to Lord Śiva - reside in you! (All these qualities are seen only in noble/saintly people.)

धर्मे, गुरौ, आचारे, गुणे, शिवे- all in पु. लिं. स. वि. ए. व. of धर्मः-right codes of conduct, Dharma, गुरुः- teacher, elder, father, preceptor, आचारः- good behaviour, conduct, गुणः- virtue, quality, शिवः- Shiva, God, मुखे, दाने, मित्रे, चित्ते & रूपे- all in न. लिं. स. वि. ए. व. of मुखम्- face, mouth, दानम्- charity, act of giving, मित्रम्- a friend, चित्तम्- thought, mind, heart & रूपम्- figure, form, appearance, शास्त्रेषु- in न. लिं. स. वि. ब. व. of शास्त्रम्- sacred percept, spiritual injunction, religious treatise, सत्सु- in पु. लिं. स. वि. ब. व. of सत्- noble, virtuous saintly, तत्परता- exclusive devotion, मधुरता- pleasantness, समुत्साहता- sincere effort, अवञ्चकता- honesty, विनयता- politeness, अतिगम्भीरता- very profoundness, शुचिता- purity in action, रसिकता- tastefulness, विज्ञानता- intelligence, सुन्दरता- handsomeness, भजनता- worshipfulness- all in स्त्री. लिं. स. वि. ए. व.- ता suffix to an adjctv or a word derived from a verb implies quality, nature- तत्पर (तद्+ पर)- exclusively devoted to, closely intent on, मधुर- sweet, pleasant, समुत्साहः- good inclination, desire, effort, अवञ्चकः- dependable, honest- (वञ्चकः- a cheat, rogue, deceitful- न वञ्चकः- अवञ्चकः- नञ् तत्पुरुष स.), विनयः- polite conduct, decency, अतिगम्भीरः- very profound, earnest, serious- (अति- अव्यय- a prefix implies very much, high), शुचिः- purity, upright, undefiled, रसिकः- tasteful, impassioned, विज्ञानम्- knowledge, wisdom, understanding, सुन्दरः- elegant, beautiful, भजनम्- worship, service, राघव- of Raghu' s family- Rama- in पु. लिं. सं. वि. ए. व., त्वयि- in you- स. वि. ए. व. of युष्मद्- you- अस्ति- वर्त. प्र. पु. ए. व. of अस्- to be, to exist, सन्दृश्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of सं+ दृश्- to see well, perceive- (दृश्- पश्यति १ ग. प. प. to see, look at) एव- only, just, merely, भोः (भोस्)- a vocative particle- Oh Sir- both अव्यय

**काष्ठं कल्पतरुः सुमेरुरचलश्चिन्तामणिः प्रस्तरः**
**सूर्यः तीव्रकरः शशी क्षयकरः क्षारः हि वारांनिधिः।**
**कामो नष्टतनुर्बलिर्दितिसुतो नित्यं पशुः कामगौ-**
**-र्नैतांस्ते तुलयामि भो रघुपते कस्योपमा दीयते**॥१२. १६॥ शा. वि.

कल्पतरुः काष्ठं, सुमेरुः अचलः, चिन्तामणिः प्रस्तरः, सूर्यः तीव्रकरः, शशी क्षयकरः, वारांनिधिः क्षारः हि, कामः नष्टतनुः, बलिः दितिसुतः, कामगौः नित्यं पशुः, भोः रघुपते, ते एतन् न तुलयामि। (ते) कस्य उपमा दीयते?

The wish yielding tree, Kalpataru, is just timber. The mighty Meru Mountain cannot move. Wish granting gem, Chintāmaṇi, is just a piece of rock. The Sun is very hot and the Moon wanes. The ocean is very salty. The God of love, Madan, has lost his body. The mighty King Bali is a demon. The wish-granting cow, Kāmdhenu, will always be an animal. Oh Raghupati, I will not compare you with anyone of these. (Then) With whom can you be compared?

काष्ठम्- wood, timber- in न. लिं. प्र. वि. ए. व., कल्पतरुः- wish yielding tree- कल्पप्रदः तरुः- मध्यम. प. लो. कर्मधारय स. (क्लृप्- कल्पते १ ग. आ. प. to be fit or adequate for, produce- कल्पित- desired, wished for), सुमेरुः- the sacred mountain Meru, अचलः- immovable, fix- (चलः- mobile- न चलः- अचलः- नञ् तत्पुरुष स.), चिन्तामणिः- wish granting gem- चिन्ता- thought, thinking, मणिः- gem, jewel- चिन्ताप्रदः मणिः- मध्यम प. लो. कर्मधारय स., प्रस्तरः- a stone, rock, सूर्यः- the Sun, तीव्रकरः- very hot- तीव्र- adjctv- severe, intense, sharp, hot, तीव्रम्- heat, करः- doer- तीव्रं करोति इति & क्षयकरः-waning, diminishing- क्षयः- decay, decline- क्षयं करोति इति - क्षयकरः - both उपपद तत्पुरुष स., शशी (शशिन्)- the Moon, क्षारः- corrosive, salty, वारांनिधिः- ocean- वार्- न. लिं- water, निधिः- treasure, storehouse- वाराम् निधिः- ष. तत्पुरुष स., कामः- God of love- नष्टतनुः- without a body- नष्ट- ruined, lost- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, तनुः- body- नष्टः तनुः यस्य सः- बहुव्रीहि स., बलिः- Mighty King Bali, दितिसुतः- a demon- 'Daitya' -दितिः- wife of Kashyap- mother of demons, सुतः- son- दितेः सुतः- ष. तत्पुरुष स., पशुः- an animal- all in पु. लिं. प्र. वि. ए. व., कामगौः- wish granting cow- in स्त्री. लिं. प्र. वि. ए. व.- कामः - desire, wish, गौः (गो)- cow/bull- कामप्रदः गौः- मध्यम प. लो. कर्मधारय स., एतन्- them- in पु. लिं. द्वि. वि. ब. व. of एतद्- he, ते- (तुभ्यम्)- in पु. लिं. च. वि. ए. व. of युष्मद्- you, तुलयामि- उ. पु. ए. व. of तुल्- १० ग. उ. प. तोलयति- ते or तुलयति- ते which is supposed to be a denominative from तुला), रघुपते- in पु. लि. सं वि. ए. व. of रघुपतिः- Rama- रघूणां पतिः- ष. तत्पुरुष स., कस्य- whose- पु. लिं. ष. वि. ए. व. of किम्- who, दीयते- कर्मणि प्रयोग प्र. पु. ए. व. of दा- ददाति- दत्ते ३ ग. उ. प. to give, हि- indeed, surely, न- no, not, नित्यम्- always, daily, उपमा- (स्त्री. लिं.)- similarity, comparison, भोः (भोस्)- a vocative particle: Oh Sir- all अव्यय

**पीतः क्रुद्धेन तातश्चरणतलहतो वल्लभो येन रोषाद्-**
**आबाल्याद् विप्रवर्यैः स्ववदनविवरे धार्यते वैरिणी मे।**
**गेहं मे छेदयन्ति प्रतिदिवसमुमाकान्तपूजानिमित्तं**
**तस्मात्खिन्ना सदाहं द्विजकुलनिलयं नाथ युक्तं त्यजामि**॥१५.१६॥- आर्या

नाथ, येन क्रुद्धेन (मम) तातः पीतः, (तथा) रोषाद् वल्लभः चरणतलहतः, (येः) विप्रवर्यैः आबाल्यात् स्ववदनविवरे मे वैरिणी धार्यते, (तथा ये) प्रतिदिवसम् उमा-कान्त-पूजा-निमित्तं मे गेहं छेदयन्ति, तस्मात् अहं सदा खिन्ना, द्विजकुलनिलयं युक्तं त्यजामि॥

Said by Lakṣmī to Viṣṇu-

Oh, my dear husband! The reason why I purposely avoid staying in the household of learned people (Brahmins) is that one (of them, Agastya) drank up my father (the Ocean) in anger. The other one (Bhrugu), with anger, kicked my husband (Viṣṇu) with sole of his foot. The best among them hold my adversary (Sarasvati) on the tip of their tongue (cavity of mouth). They damage my residence everyday (by picking lotus flowers) since childhood, for the sake of Pooja of Śiva! And that is why I am so sad.

नाथ- Oh dear husband- in पु. लिं. सं. वि. ए. व., येन & क्रुद्धेन- both in पु. लिं. तृ. वि. ए. व. of यद्- who & क्रुद्धः- angry- क्रुद्ध- क. भू. धा. वि. of क्रुध्- क्रुध्यति- ४ ग. ग. प. प. to be angry, तातः- father, पीतः- drunk, swallowed- क. भू. धा. वि. of पा- पिबति १ ग. प. प. to drink, वल्लभः- husband, beloved, चरणतलहतः- kicked by the sole of the foot- चरण- foot, तल- sole, surface, हत- struck- क. भू. धा. वि. of हन्- हन्ति २ ग. प. प. to strike, kill- चरणस्य तलः- चरणतलः- ष. तत्पुरुष स. & चरणतलेन हतः- चरणतलहतः- तृ. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., रोषाद् & आबाल्यात्- both in पु. लिं. पं. वि. ए. व. of रोषः- anger, rage & आबाल्यः- since the childhood- आ- a prefix implies: from, ever since, बाल्यः- childhood, विप्रवर्यैः- in पु. लिं. तृ. वि. ब. व. of विप्रवर्यः- best among the Brahmin- विप्रः- a wise man, sage, a Brahmin & वर्यः- adjctv- best, excellent, selected, eligible- विप्रेषु वर्यः- स. तत्पुरुष स., स्ववदनविवरे- in न. लिं. स. वि. ए. व. of स्ववदनविवरम्- in the cavity of one's own mouth- स्व- one's own, वदनम्- mouth, विवरम्- cavity- स्वस्य वदनम्- स्ववदनम् & स्ववदनस्य विवरम्- स्ववदनविवरम्- both ष. तत्पुरुष स., अहम्- I & मे (मम)- my, mine- both प्र. वि. & ष. वि. ए. व. of अस्मद्- I, वैरिणी- enemy, adversary & खिन्ना- sad, disturbed, afflicted- खिन्न- क. भू. धा. वि. of खिद्- खिंदति ६ ग. प. प. to afflict, strike- both in स्त्री. लिं. प्र. वि. ए. व., धार्यते- कर्मणि प्रयोग प्र. पु. ए. व. of धृ- धरति १ ग.प. प. to hold, carry, प्रतिदिवसम्- everyday- दिवसम्- day- दिवसे दिवसे- प्रतिदिवसम्- अव्ययीभाव स., उमाकान्तपूजानिमित्तम्- for the sake of Pooja of Shiva- उमा- पार्वती, कान्तः- husband, beloved, पूजा- worship, निमित्तम्- purpose, for- उमायाः कान्तः- उमाकान्तः, उमाकान्तस्य पूजा- उमाकान्तपूजा & उमाकान्तपूजायाः निमित्तम्- उमाकान्तपूजानिमित्तम्- all ष. तत्पुरुष स.- both in न. लिं. प्र. वि. ए. व., गेहम्- house dwelling, habitation, द्विजकुलनिलयम्- household of wise men or Brahmins- द्विज- twice born, Brahmin, कुल- race, family, निलयम्- house- द्विजस्य कुलम्- द्विजकुलम् & द्विजकुलस्य निलयम्- द्विजकुलनिलयम्- all ष. तत्पुरुष स., & युक्तम्- cleverly, diligently- all in न. लिं. द्वि. वि. ए. व., छेदयन्ति- प्रयोजक वर्त. प्र. पु. ब. व. of छिद्- छेदयति- ते- to disturb, destroy- (छिद्-

छिनत्ति, छिंते ७ ग. उ. प. to cut, tear), त्यजामि- वर्त. उ. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to bandon, leave- तस्मात्- therefore & सदा- always, - both अव्यय

**उर्व्यां कोऽपि महीधरो लघुतरो दोर्भ्यां धृतो लीलया**
**तेन त्वं दिवि भूतले च सततं गोवर्धनो गीयसे ।**
**त्वां त्रैलोक्यधरं वहामि कुचयोरग्रे न तद्गण्यते**
**किं वा केशव भाषणेन बहुना पुण्यैर्यशो लभ्यते**॥१५.१९॥शा. वि.

(त्वया), उर्व्याम् कः अपि लघुतरः महीधरः दोर्भ्यां लीलया धृतः, तेन त्वं दिवि भूतले च सततं गोवर्धनः गीयसे। (परन्तु अहं) त्वां त्रैलोक्यधरं कुचयोः अग्रे वहामि तद् न गण्यते। केशव, किं बहुना भाषणेन वा, यशः पुण्यैः लभ्यते॥

Said by a Gopi to Kṛṣṇa -

Dear Keshava! , you once held some small mountain by your finger easily (somewhere) on this earth. For that act, you are always praised as Govardhan-dhāri on this Earth and in Heaven. However, I hold you, the bearer of three worlds; over my breasts (in my heart). That does not get counted at all! What can I say more? Perhaps, glory is bestowed only on those who have accumulated credits from past good deeds.

उर्व्याम् & दिवि- in स्त्री. लिं. स. वि. ए. व. of उर्वी- the earth, land & दिव्- heaven, sky, भूतले- in पु/न. लिं. स. वि. ए. व. of भूतलः/लम्- the surface of the earth- भूः- earth, universe, तलः/लम्- surface, base- भुवः तलः- ष. तत्पुरुष स., कः (किम्)- who, कः अपि- someone, लघुतरः- smaller size- लघु- adjctv- small, light, little, तर- suffix implies comparative degree, महीधरः- a mountain- मही- स्त्री. लिं.- earth, land, धरः- holder, bearer- महीम् धरति इति- उपपद तत्पुरुष स., गोवर्धनः- a celebrated hill in Vrindavan (वृन्दावन) in Mathura, गो-cow/bull, cattle, वर्धन: - prospering, promoting, growing,गोवर्धनधारिन्- उपपद तत्पुरुष स. an epithet of Krishna) & धृतः- borne, held- धृत- क. भू. धा. वि. of धृ- धरति, धारयति- ते १ प. प. & १० उ. प. to hold, bear- all in पु. लिं. प्र. वि. ए. व., अङ्गुल्या & लीलया- both in स्त्री. लिं. तृ. वि. ए. व. of अङ्गुली- a finger & लीला- pastime, mere sport, child's play, दोर्भ्याम्- in पु/न. लिं. तृ. वि. द्वि. व. of दोस्- the forearm, arm, तेन & भाषणेन- in पु/न. लिं. तृ. वि. ए. व. of तद्- it, he, that & भाषणम्- saying, speech, talk, words, त्वम्- you & त्वाम्- to you- प्र. वि & द्वि. वि. ए. व. of युष्मद्- you, त्रैलोक्यधरम्- in पु. लि. द्वि. वि. ए. व. of त्रैलोक्यधरः- bearer of the three worlds- त्रि- three, लोकः/लोकम्- world- त्रैलोक्यम्- त्रयाणाम् लोकानाम् समाहारः- न. लिं. ए. व. द्विगु स.- the three worlds taken collectively- त्रैलोक्यम् धरति इति- उपपद तत्पुरुष स., कुचयोः- in पु. लि. ष. वि. द्वि. व. of कुचः- the female breast, अग्रे- adverb- in front, before, on top, तद्- that, it & यशः (यशस्)- fame, glory, renown- both in न. लिं. प्र. वि. ए. व., केशव- an epithet of Vishnu- in पु. लिं. सं. वि. ए. व., पुण्यैः- in न. लिं. तृ. वि. ब. व. of पुण्यम्- virtue, meritorious deed, गीयसे- कर्मणि प्रयोग वर्त. म. पु. ए. व.

of गै- गायति १ ग. प. प. to sing, relate, declare, गण्यते & लभ्यते- both कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of गण्- गणयति- ते १० ग. उ. प. to count, reckon, consider & लभ्- लभते १ ग. आ. प. to get, acquire, obtain, वहामि- वर्त. उ. पु. ए. व. of वह्- वहति- ते १ ग. उ. प. to carry, bear, sustain, अपि- also, even, न- no, not, वा- as an alternative connection it means- 'or', च- and, सततम्- always, daily, किम् बहुना- -why say much, in short- all अव्यय

## *9.2 Various Subjects*

**गीर्वाणवाणीषु विशिष्टबुद्धिः**
**तथापि भाषान्तरलोलुपोहम्**
**यथा सुराणाममृते स्थितेऽपि**
**स्वर्गाङ्गनानामधरासवे रुचिः** ॥१०.१८॥ - त्रिष्टुभ

(मे) गीर्वाणवाणीषु विशिष्टबुद्धिः (स्थिते) अपि, अहं भाषान्तरलोलुपः (अस्मि) यथा सुराणाम्, अमृते स्थिते अपि, स्वर्गाङ्गनानाम् अधरासवे रुचिः (अस्ति)॥

Even though my primary interest is in the Saṃskṛta language, I ardently long for the study of other languages! This is just like Gods, who already have the nectar of immortality available, still they long for nectar from lips of celestial damsels!

सुराणाम्- in पु. लिं. ष. वि. ब. व. of सुरः- God, अमृते, स्थिते & अधरासवे- all in पु/न. लिं. स. वि. ए. व. of अमृतम्- nectar of immortality, beverage of gods, स्थित- standing, staying, existing, available- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, stand & अधरासवः- nectar of lips- अधरः- a lip in general, आसवः- any spirituous liquor, decoction- अधरः एव आसवः- अधरासवः- उ. पू. प. कर्मधारय स., स्वर्गाङ्गनानाम्- in स्त्री. लिं. ष. वि. ब. व. of स्वर्गाङ्गना- damsel of heaven, paradise- स्वर्गः- heaven, paradise, अङ्गना- a woman, female- स्वर्गस्य अङ्गना- स्वर्गाङ्गना- ष. तत्पुरुष स. रुचिः- taste, longing, relish, liking, विशिष्टबुद्धिः- special talent, interest- विशिष्ट-adjctv- distinct, particular special, बुद्धिः- knowledge, talent, intelligence, interest- विशिष्टा बुद्धिः- वि. पू. प. कर्मधारय स.- both in स्त्री. लिं. प्र. वि. ए. व., गीर्वाणवाणीषु- in स्त्री. लिं. स. वि. ब. व. of गीर्वाणवाणी- language of gods, Saṃskṛta language- गीर्- स्त्री. लिं- speech, name of goddess of speech, learning- गीर्वा/गीर्वाण- God, deity, वाणी- speech, language- गीर्वाणां वाणी- गीर्वाणवाणी- ष. तत्पुरुष स., अहम्- I -in प्र. वि. ए. व. of अस्मद्- I, भाषान्तरलोलुपः- ardently longing for different languages- भाषा- स्त्री. लिं.- language, speech, tongue अन्तर- adjctv- different from, other than, लोलुपः- very eager, desirous, ardently longing for- अन्तरा भाषा- भाषान्तरा- वि. उ. प. कर्मधारय स. &

भाषान्तरासु लोलुपः- स. तत्पुरुष स., in पु. लि. प्र. वि. ए. व., यथा- like which, तथा- like that, similar to, अपि- even, also-all अव्ययs

**देयं भोज्यधनं सदा सुकृतिभिर्नो सञ्चितव्यं कदा**
**श्रीकर्णस्य बलेश्च विक्रमपतेरद्यापि कीर्तिः स्थिता।**
**अस्माकं मधुदानभोगरहितं नष्टं चिरात्सञ्चितं**
**निर्वाणादिति पाणिपादयुगले धर्षन्त्यहो मक्षिकाः**॥११.१॥ शा. वि.

पा. भे.: सञ्चितव्यं कदा = सञ्चयस्तस्य वै & पाणिपादयुगले = नैजपादयुगलं
(मनुष्येण) सुकृतिभिः भोज्यधनं सदा देयं, नो कदा सञ्चितव्यम्। श्रीकर्णस्य, बलेः, विक्रमपतेः च अद्य अपि कीर्तिः स्थिता (भवति)। अहो, ' अस्माकं मधु-दान-भोग-रहितं, चिरात् सञ्चितं, नष्टं ' इति मक्षिकाः निर्वाणात् पाणिपादयुगले /नैजपादयुगलं धर्षन्ति॥

One should always give away money to virtuous people for their enjoyment. Money should never be just stored up. The fame of great Karṇa, Bali and Vikramāditya remains well established even to this day! The honey-bees keep striking their own pairs of feet (pairs of hands and feet) in despair, yelling, 'Oh, the honey we stored for a long time, without ever giving it to anyone or enjoying it ourselves, is totally lost' !

सुकृतिभिः- in पु. लि. तृ. वि. ब. व. of सुकृतिन्- one who is righteous, pious, virtuous- सु-अव्यय- prefix denotes good, virtuous- कृतिः- स्त्री. लिं.- doing, deed, work- सुभगा कृतिः यस्य सः- बहुव्रीहि स., देयम्- ought to be given & सञ्चितव्यम्- to be hoarded, accumulated- both in न. लि. प्र. वि. ए. व.- देय (also दातव्य & दानीय) & सञ्चितव्य (also सञ्चयनीय & सञ्चित्य)- both in क. वि. धा. सा. वि. of दा- ददाति- दत्ते ३ ग. उ. प. प. to give, grant, donate & सं+ चि- to collect, gather (चि- चिनोति चिनुते ५ ग. उ. प.), भोज्यधनम्- money for the food/ daily needs, enjoyment- भोज्य- that to be eaten, enjoyed- in क. वि. धा. सा. वि. of भुज्- भुनक्ति भुंक्ते ७ ग. उ. प. to eat, enjoy, धनम्- money, wealth- भोज्यम् धनम्- वि. पू. प. कर्मधारय स., श्रीकर्णस्य, बलेः विक्रमपतेः- all in पु. लिं. ष. वि. ए. व. of श्रीकर्णः- Karna of Mahabharat, बलिः- Demon King Bali, विक्रमपतिः- King Vikramadiya, कीर्तिः- fame, name, glory & स्थिता- remained- स्थित- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, remain)- both in स्त्री. लिं. प्र. वि. ए. व., अस्माकम्- ours- in ष. वि. ब. व. of अस्मद्- I, मधुदानभोगरहितम्-मधूनां दानभोगरहितम्- honey that was not given, nor enjoyed- मधु- न. लिं.- honey, दान- granting, giving, charity, भोग- enjoying, using, रहितम्- devoid of, without- रहित- क. भू. धा. वि. of रह्- रहति १ ग. प. प. to quit, leave, दानम् च भोगः च- दानभोगः- द्वंद्व स. & दानभोगेन रहितम्- तृ. तत्पुरुष स., चिरात् & निर्वाणात्- both पं. वि. ए. व. of चिर- adjctv- long time & निर्वाण- lost, complete extinction- क. भू. धा. वि. of निस्+ वा- to be lost, extinct- (वा- वाति २ ग. प. प. to blow, to go), सञ्चितम्- collected, gathered- सञ्चित- क. भू. धा. वि. of सं+ चि- to collect- see above, नष्टम्- lost,

**विप्रास्मिन्नगरे महान्कथय कस्तालद्रुमाणां गणः**
**को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि**
**को दक्षः परवित्तदारहरणे सर्वोऽपि दक्षो जनः**
**कस्माज्जीवसि हे सखे विषकृमिन्यायेन जीवाम्यहम्**॥१२.९॥- शा.वि.

विप्र, अस्मिन् नगरे कः महान् कथय !- 'ताल- द्रुमाणां गणः'। कः दाता? - 'रजकः, प्रातः वसनं गृहीत्वा, निशि ददाति'। को दक्षः?- 'परवित्तदारहरणे सर्वे अपि जनः दक्षः (अस्ति)' । हे सखे, कस्मात् जीवसि? 'अहं विषकृमिन्यायेन जीवामि'॥

(A visitor asks a learned man following questions about his town. Each line starts with a question followed by its answer).

Oh, Learned-man,
Tell me who is great in this town? 'A Cluster of Palm trees '.
Who is the giver? 'The washer man who collects clothes in the morning and brings back at night'.
Who is very attentive? 'Those who snatch away promptly other's wealth and women.'
Then, Oh dear friend, then how do you survive?-'I survive by the maxim of a worm in a poisonous environment'.

*Scientists have identified a new species of cave worm deep inside a toxic cave filled with poisonous sulphur gas in Colorado,. This new worm, blood-red in colour, never sees the light of day – but it thrives in a dank, hostile atmosphere that would kill humans.*

विप्र & सखे- both in पु. लिं. सं. वि. ए. व. of विप्रः- a member of priestly class, a learned person & सखा- friend, buddy, अस्मिन्, नगरे & परवित्तदारहरणे- all in पु/न. लिं. स. वि. ए. व. of इदम्- this, नगरम्- town, city & परवित्तदारहरणम्- seizing of wealth and women of others- परः- other, another, वित्तम्- wealth, दारा- पु. लिं.- wife, हरणम्- taking away, snatching- वित्तम् च दारा च- वित्तदारा- द्वंद्व स. & परस्य वित्तदाराणाम् हरणम्- ष. तत्पुरुष स., निशि- in स्त्री. लिं. स. वि. ए. व. of निश्- night (this has no first five inflections), कः (किम्)- who, महान् (महत्)- adjctv- great, big, गणः- group, कः (किम्)- who, दाता (दातृ)- a philanthropist, giver, रजकः- a washer man, दक्षः- prompt, attentive, fit, suitable careful, सर्वः-all, entire, जनः- people- all in पु. लिं. प्र. वि. ए. व., अहम्- I- प्र. वि. ए. व.of अस्मद्, कथय- आज्ञार्थ म. पु. ए. व. of कथ्- कथयति- ते १० ग. उ. प. to tell, say, तालद्रुमाणाम्- in पु. लिं. ष. वि. ब. व. of तालद्रुमः- a Palmyra Palm तालः- a Palmyra tree, द्रुमः- tree- तालस्य द्रुमः- ष. तत्पुरुष स., वसनम्- clothes- न. लिं. द्वि. वि. ए. व., गृहीत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of ग्रह्- गृह्णाति गृह्णीते ९ ग. उ. प. to receive, take, ददाति- (दत्ते)- वर्त. प्र. पु. ए. व. of दा- ३ ग. उ. प. to give, कस्मात्- by what, which- in पु/न. लिं. पं. वि. ए. व. of कः/किम्- who, विषकृमिन्यायेन- in पु. लिं. तृ. वि. ए. व. of विषकृमिन्यायः- the maxim of survival of a worm or a insect in a poisonous environment- विषम्- poison, कृमिः- worm, insect, न्यायः- logic, system, rule,

method- विषम् च कृमिः च- विषकृमिः- द्वंद्व स. & विषकृम्योः न्यायः- ष. तत्पुरुष स., जीवामि & जीवसि- वर्त. उ. पु. & म. पु. ए. व. of जीव्- जीवति १ ग. प. प. to live, to be alive, प्रातः (प्रातर्)- at dawn, day break, हे- particle of addressing, अपि-also, even- all अव्यय

**न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये**
**स्वर्गद्वारकपाटपाटनपटुः धर्मोऽपि नोपार्जितः।**
**नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं**
**मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम्**॥१६.१॥- शा.वि.

(मया) संसार-विच्छित्तये ईश्वरस्य पदं विधिवत् न ध्यातम्। (मया) स्वर्ग-द्वार-कपाट-पाटन-पटुः धर्मः अपि न उपार्जितः । (मया) स्वप्ने अपि नारी- पीन-पयोधर-ऊरु-युगलम् न आलिङ्गितम् ।वयं मातुः यौवन-वनः-छेदे कुठाराः एव केवलम् (अभूम)॥

"I did not meditate at the feet of the Lord in a proper manner to free myself from this worldly life. I did not break open the doors of the heaven by following the Dharma. I did not even dream to embrace pairs of the large breasts and thighs of a woman. Alas, we are just axes that cut down the garden of youth of our mother."

*This sounds like a lament from a person who did not achieve anything in his life. He regrets that his own birth caused unnecessary pain to his mother in her youth.*

ध्यातम्- meditated upon, thought of- ध्यात- क. भू. धा. वि. of ध्यै- ध्यायति १ ग. प. प. to think of, meditate, पदम्- position, foot, matter, विधिवत्- in a proper manner- विधिः- पु. लिं- method, practice, manner & वत् suffix implies quality, nature, नारीपीनपयोधरोरुयुगलम्- pairs of plumpy breasts and thighs of a woman- नारी- woman, पीन- adjctv- plump, large, पयोधरः- female breast, cloud- पयस्- न. लिं- milk, water, धरः- holder- पयः धरति इति- उपपद तत्पुरुष स., ऊरुः- thigh, युगलम्- a pair, couple- पयोधरः च ऊरुः च- पयोधरोरुः द्वंद्व स., पयोधरोरुः & पयोधरोर्वोः युगलम्- पयोधरोरुयुगलम्- ष. तत्पुरुष स., पीनम् पयोधरोरुयुगलम्- पीनपयोधरोरुयुगलम्- वि. पू. प. कर्मधारय स. & नार्याः पीनपयोधरोरुयुगलम्- ष. तत्पुरुष स., आलिङ्गितम्- embraced, clasped- आलिङ्गित- क. भू. धा. वि. of आ+ लिङ्ग्- to embrace, clasp- (लिङ्ग्- लिङ्गति -१ ग. प. प. to go, move)- all in न. लिं. द्वि. वि. ए. व., ईश्वरस्य- in पु. लिं. ष. वि. ए. व. ईश्वरः- God, Master, संसारविच्छित्तये- स्त्री. लिं. च. वि. ए. व. of संसारविच्छित्तिः- breaking away from the bonds of worldly life- संसारः- family life, worldly affairs, विच्छित्तिः- cutting off, breaking away, cessation- संसारात् विच्छित्तिः- पं तत्पुरुष स., स्वर्गद्वारकपाटपाटनपटुः- proficient in cleaving open the shutters of the doors of heaven- स्वर्ग- heaven, द्वारम्- door, gateway, कपाट- panel of a door,

पाटन- breaking, cleaving, पटुः- an expert, proficient- स्वर्गस्य द्वारस्य कपाटस्य पाटनम्- स्वर्गद्वारकपाटपाटनम्- composite ष. तत्पुरुष स. & स्वर्गद्वारकपाटपाटने पटुः- स. तत्पुरुष स., धर्मः- right codes of conduct- Dharma & उपार्जितः- earned, acquired- उपार्जित- क. भू. धा. वि. of उप+ अर्ज्- १ ग. प. प. to procure, obtain- all in पु. लिं. प्र. वि. ए. व., मातुः- in स्त्री. लिं. ष. वि. ए. व. of मातृ- mother, यौवनवनच्छेदे & स्वप्ने- स. वि. ए. व. of यौवनवनच्छेद- यौवनम्- youth, youthful days, वनम्- cluster of trees, a fountain, छेदः- cutting, felling down- वनम् इव यौवनम्- यौवनवनम्- उ. उ. प. कर्मधारय स. & यौवनवनस्य छेदः- ष. तत्पुरुष स. & स्वप्नः- dream, sleeping, कुठाराः & वयम्- both पु. लि. प्र. वि. ब. व. of कुठारः- an axe & अस्मद्- I, we, न- no, not, अपि- even, also, केवलम्- just, mere, एव- only, just,

**दानार्थिनो मधुकरा यदि कर्णतालै-**
**दूरीकृताः करिवरेण मदान्धबुद्ध्या।**
**तस्यैव गण्डयुगमण्डनहानिरेषा**
**भृङ्गाः पुनर्विकचपद्मवने वसन्ति**॥१७.१८॥ - शक्करी

यदि करिवरेण मदान्धबुद्ध्या, दानार्थिनः, मधुकराः कर्णतालैः दूरीकृताः, एषा तस्य एव गण्डयुगमण्डनहानिः (भवति), भृङ्गाः पुनः विकचपद्मवने वसन्ति॥

If that strongest elephant, blinded by arrogance, drives away the bees by flapping his ears, who approach him solicitously, loses an opportunity to adorn his temples (by the bees)! As for the bees, they again merrily inhabit fully blossomed lotus thickets.

*An anyokti (अन्योक्ति) is a kind of poetic composition where the message is directed to somebody but giving an example of something else.This verse is directed towards wealthy but arrogant people who do not appreciate intellectuals or artists. If neglected by the rich, the artists do thrive somewhere else any way. The reputation of the rich would enhance if they embrace the intellectuals. Akabar's own reputation was enhanced by his collection of nine jewels -ministers,who excelled in different fields.*

दानार्थिनः, मधुकराः, दूरीकृताः & भृङ्गाः- all in पु. लिं. प्र. वि. ए. व. of दानार्थिन्-one who is expecting something from the other- दानम्- granting, giving, gift, अर्थिन्- solicitor, one who asks- दानम् अर्थयते इति- उपपद तत्पुरुष स., मधुकरः- honey bee- मधु- न. लिं.- honey, करः- doer, maker- मधु करोति इति- उपपद तत्पुरुष स., दूरीकृतः-one, who is driven away- क. भू. धा. वि. of दूरी+कृ- करोति कुरुते ८ ग. उ. प. to do, make- च्वि रूप. & भृङ्गः- large black bee, कर्णतालैः- in पु. लिं. तृ. वि. ब. व. of कर्णतालः- flapping of the ears- कर्णः- the ear, तालः- flapping, clapping, कर्णयोः तालः- ष. तत्पुरुष स., एषा (एतद्)- this & गण्डयुगमण्डनहानिः- loss of adornment opportunity of the pair of temples- गण्डः- the cheek, temple of an elephant, युगम्-a pair,, couple, मण्डनम्-

declaration, an act of adorning, हानिः- loss, a bandonment- गण्डयोः युगम्- गण्डयुगम्, गण्डयुगस्य मण्डनम्- गण्डयुगमण्डनम् & गण्डयुगमण्डनस्य हानिः- गण्डयुगमण्डनहानिः- all ष. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., करिवरेण- in पु. लिं. तृ. वि. ए. व. of करिवरः- the best among the elephants- करिन्- an elephant, वर- adjctv- the best, excellent- करीणाम् वरः- ष. तत्पुरुष स., मदान्धबुद्ध्या - in स्त्री. लिं. तृ. वि. ए. व. of मदान्धबुद्धिः- with an attitude blinded by the arrogance- मदः- intoxication, rut, pride, arrogance, अन्ध- adjctv- blind, unable to see, बुद्धिः- thinking, mind, attitude- मदेन अन्धः- मदान्धः- तृ. तत्पुरुष स. & मदान्धा बुद्धिः यस्य सः- मदान्धबुद्धिः- बहुव्रीहि स., विकचपद्मवने- in न. लिं. स. वि. ए. व. of विकचपद्मवनम्- thicket of full-blown lotuses- विकच- adjctv- blown, blossomed, पद्मम्- lotus, वनम्- a cluster, thicket of plants- विकचम् पद्मम्- विकचपद्मम् & विकचपद्मानाम् वनम्- ष. तत्पुरुष स., तस्य- his- in पु. लिं. ष. वि. ए. व. of तद्-he, वसन्ति- वर्त. प्र. पु. ब. व. of वस्- वसति १ ग. प. प. to dwell, live, inhabit, यदि- if, in case, एव- only, merely, just & पुनः (पुनर्)- again, once more- all अव्यय

**अध: पश्यसि किं बाले! पतितं तव किं भुवि।**
**रे रे मूर्ख! न जानासि गतं तारुण्यमौक्तिकम्**॥१७.२०॥

"बाले, किम् अध: पश्यसि? भुवि तव किं पतितम्?"
"रे रे मूर्ख! (किं त्वं) न जानासि ? (मम) गतं तारुण्यमौक्तिकं (पश्यामि)॥"

(Someone mockingly asks a very old, bent down, woman)
"Oh, young girl, why are you looking down? Did something of yours fall on the ground ?
(To this, she replies)
"Oh, oh, stupid fellow, don't you understand? (I am looking for) my lost pearl of youth!"

बाले- in स्त्री. लिं. सं. वि. ए. व. of बाला- young girl, मूर्ख- in पु. लिं. सं. वि. ए. व. of मूर्खः- a stupid, foolish person, भुवि (भुवाम्)- in स्त्री. लिं. स. वि. ए. व. of भू- ground, earth, तव- yours- ष. वि. ए. व. of युष्मद्- yours- किम्- what & पतितम्- fallen, dropped- क. भू. धा. वि. of पत्- पतति १ ग. प. प. to fall, drop off, fall down- both in न. लिं. प्र. वि. ए. व., पश्यसि & जानासि- both वर्त. म. पु. ए. व. of दृश्- पश्यति १ ग. प. प. to see, observe & ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand, realise, गतम्- gone, past- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go & तारुण्यमौक्तिकम्- a pearl of youth- तारुण्यम्- youth, youthfulness, मौक्तिकम्- a pearl- तारुण्यम् मौक्तिकम् इव- उ. उ. प. कर्मधारय स.- both in न. लिं. द्वि. वि. ए. व., किम्- a particle of interrogation- why, अध: (अधस्)- below, down, downwards, न- no, not & रे- a vocative particle- Oh, Look- all अव्यय

# Chapter 10- Modern Cāṇakya (आधुनिक चाणक्य)

Almost all the Cāṇakya Subhāṣitas are as valid today as they were 2500 years back. However, the inherent good messages from some verses are unnecessarily muddled due to discriminatory or misogynist or illogical choice of words or examples. A modern Cāṇakya would certainly rewrite these verses!

Yes, we are talking about verses compiled 2500 years or so back when the social conditions were very different from today. Brahmins were the dominant caste and were to be always respected. Women were uneducated, were expected to serve men and were looked down for variety of reasons.

In today's society, if Cāṇakya were to focus on the message without being discriminatory or misogynist, he would choose alternate words or examples for these Subhāṣitas. We offer apologies to Āchārya Cāṇakya for suggesting so.

## *10.1 Varna or Caste Based (वर्ण आधारित)*

Since Vedic times, the Brāhmaṇas (ब्राह्मण), the Kṣtriya (क्षत्रिय) and Vaiśya (वैश्य) have been considered as upper three classes. The Śudra (शुद्र) class that supported the upper three classes was treated without any respect. Cāṇḍāla (चाण्डाल ) referred to the untouchable and untouchable people who performed unclean and lowest level tasks in a society

That caste discrimination is reflected in many verses in Cāṇakya Nīti.

**तैलाभ्यङ्गे चिताधूमे मैथुने क्षौरकर्मणि।**
**तावद्भवति चाण्डालो यावत्स्नानं न चाचरेत्**॥८.६॥

(मनुष्यः) तैलाभ्यङ्गे, चिताधूमे, मैथुने (तथा) क्षौरकर्मणि (पश्चात्), यावत् स्नानं न च आचरेत्, तावत् चाण्डालः भवति॥

A person is an untouchable after body massage with oil, after he returns from a cremation, after sex or after a haircut, until he takes his bath.

*We can replace "चाण्डालः" with "unclean-अशुद्धः" which is what the verse is saying. अशुद्धः तावद्भवति यावत्स्नानं न चाचरेत्॥*

तैलाभ्यङ्गे, चिताधूमे, मैथुने & क्षौरकर्मणि- स. वि. ए. व. of तैलाभ्यङ्ग- oil smeared body- तैल- oil, अभ्यङ्ग (अभि- अव्यय- towards, for, against + अङ्गम्- body- अभि अङ्गानाम्- अभ्यङ्गम्- अव्ययीभाव स.)- smearing of body with anything- तैलस्य अभ्यङ्गम्- तैलाभ्यङ्गम्- ष. तत्पुरुष स., चिताधूम, चिता- स्त्री. लिं.- funeral pyre- धूम- smoke- चितायाः धूमः- चिताधूमः- ष. तत्पुरुष स., मैथुन- copulation, sexual union & क्षौरकर्मन्- getting a haircut- क्षौरम्- न. लिं.- haircut, shaving, कर्मन्- न. लिं.- activity, work- क्षौरस्य कर्म- क्षौरकर्म- ष. तत्पुरुष स., स्नानम्- bath, ablution- न. लिं. द्वि. वि. ए. व., आचरेत्- would perform- विध्यर्थ तृ. पु. ए. व. of आ+ चर्- to observe, perform, do- (चर्- चरति-१ ग. प. प. to walk, go about), चाण्डालः- outcast, untouchable- पु. लिं. प्र. वि. ए. व., भवति- वर्त. तृ. पु. ए. व. of भू- १ ग. प. प. to be, to happen, to exist, यावत्- untill, till that time & तावत्- till such time, till, न- no, not, च- and, both अव्यय

**तद्भोजनं यद् द्विजभुक्तशेषं**
**तत्सौहृदं यत्क्रियते परस्मिन्।**
**सा प्राज्ञता या न करोति पापं**
**दम्भं विना यः क्रियते स धर्मः**॥१५.८॥ - त्रिष्टुभ

भोजनं तद्, यद् द्विजभुक्तशेषं (भवति)। सौहृदं तद् यद् परस्मिन् क्रियते। प्राज्ञता सा या पापं न करोति। धर्मः सः यः विना दम्भं क्रियते॥

Real food is the one which remains after members of the upper class have eaten. Real affection is the one which is showered on an outsider. Real intellect is that which does not commit any sin. Real Dharma is that which is practiced without being arrogant.

*In Hinduism, we say- अतिथि देवो भव! - We treat guests with utmost respect. This verse will still carry its full meaning if द्विज - a member of the upper class - is replaced by any guest. Similarly, a meal with one's own family is indeed very satisfying and enjoyable. Instead of द्विजभुक्तशेषं, a better word would सकुटुंबभुक्तं!*

भोजनम्- food, meal, eating, तद्- that, यद्- which, द्विजभुक्तशेषम्- one that is done after feeding the Bramhanas- द्विजः- twice-born- word used for a Bramhina- a scholar well versed in scriptures- (द्विवारं जायते - द्विजः- उपपद तत्पुरुष स.), भुक्त- eaten, enjoyed- क. भू. धा. वि. of भुज्- भुनक्ति भुंक्ते ७ ग. उ. प. to eat, enjoy, शेषम्- remainder, anything left out- (शिष्- शेषति १ ग. प. प. to spare, leave as remainder)- द्विजेन भुक्तम्- द्विजभुक्तम्- तृ. तत्पुरुष स. & द्विजभुक्तस्य शेषम् यद् तद्- द्विजभुक्तशेषम्- बहुव्रीहि स. & सौहृदम्- friendship, affection- all in न. लिं. प्र. वि. ए. व., परस्मिन्- in पु. लिं. स. वि. ए. व. of परः- outsider, stranger, other, क्रियते- कर्मणि प्रयोग प्र. पु. ए. व. of कृ & करोति- वर्त. प्र. पु. ए. व. of

कृ- करोति कुरुते ८ ग. उ. प. to do, make, प्राज्ञता- wisdom, intelligence, understanding- (प्राज्ञ- adjctv- intellectual, wise- ता suffix implies quality), सा (तद्)- that, she & या- which- all in स्त्री. लिं. प्र. वि. ए. व., पापम्- sin, bad or wrong deed & दम्भम्- deceit, fraud, hypocrisy, arrogance- in न. लिं. द्वि. वि. ए. व., धर्मः- Dharma, right way of life, सः (तद्)- that, he & यः (यद्)- who- in पु. लिं. प्र. वि. ए. व., न- no, not, विना- without, absence of- both अव्ययs

**एकाक्षरप्रदातारं यो गुरुं नाभिविन्दति।**
**श्वानयोनिशतं गत्वा चाण्डालेष्वभिजायते**॥१३.१८॥

एकाक्षरप्रदातारं गुरुं यः न अभिवन्दते, (सः) श्वानयोनिशतं गत्वा चाण्डालेषु अभिजायते॥

A person, who does not respect a teacher, who has taught him even a single syllable, will be born among the untouchables after a hundred births as a dog.

*In this verse, a dog is considered at a higher level than an untouchable! This could be an exaggeration to emphasize the point of respecting the teachers but the message is muddled by the supposed consequences, which are extremely discriminatory.*

एकाक्षरप्रदातारम् & गुरुम्- both in पु. लिं. द्वि. वि. ए. व. of एकाक्षरप्रदातृ- giver of a single syllable/letter- एक- adjctv- one, single, अक्षरम्- letter, syllable, alphabet, प्रदातृ- giver, donor- एकम् अक्षरम्- एकाक्षरम्- वि. पू. प. कर्मधारय स. & एकाक्षरस्य प्रदाता- ष. तत्पुरुष स. & गुरुः- teacher, preceptor, elder, father, यः (यद्)- who- in पु. लिं. प्र. वि. ए. व., श्वानयोनिशतम्- in न. लिं. द्वि. वि. ए. व.- a hundred births of a dog- श्वानः- a dog, योनिः- पु/स्त्री. लिं- womb, uterus, any place of birth or origin, शतम्- a hundred- श्वानस्य योनिः- श्वानयोनिः & श्वानयोनीनाम् शतम्- both ष. तत्पुरुष स., गत्वा- both पू. का. वा. धा. सा. त्वान्त अव्यय of गम्- गच्छति १ ग. प. प. to go, enter, चाण्डालेषु- in पु. लिं. स. वि. ब. व. of चाण्डालः- a member of a outcast, a man of cruel or wicked deeds, अभिवन्दते, अभिजायते- all in वर्त. प्र. पु. ए. व. of अभि+ विद्- to respect, - (विद्- विन्दति ते ६ ग. उ. प. to recognise, gain, experience), अभि+ वन्द्- वन्दते १ ग. आ. प. to salute, greet respectfully, adore & अभि+ जन्- to be reborn, to arise, to spring from- जन्- जायते- ४ ग. आ. प. to be born, produced), न-no, not, अव्यय

## *10.2 Women Related (स्त्री उद्दिश्य)*

Some verses related to women appear misogynist or derogatory.

**नदीनां शस्त्रपाणिनां नखीनां शृङ्गीणां तथा।**
**विश्वासो नैव कर्तव्य: स्त्रीषु राजकुलेषु च**॥१.१५॥

नदीनां, शस्त्रपाणिनां, नखीनां, शृङ्गीणां, तथा स्त्रीषु, राजकुलेषु च विश्वासः न एव कर्तव्य: (अस्ति)॥

One should not trust (blindly) the (behaviour) of rivers, persons armed with a weapon, animals with claws or horns, women and royal family members.

*There are many stories in ancient literature when beautiful women were used for the downfall of powerful men. This is true even today. The problem here is that only the woman is blamed, not the lustful man!*

नदीनाम्, शस्त्रपाणिनाम्, नखीनाम् & शृङ्गीणाम्- all in ष. वि. ब.व. of नदी- स्त्री. लिं.- river, शस्त्रपाणिन्- पु. लिं.- an armed person, one who has a weapon in hand- शस्त्रम्- न. लिं.- a weapon, पाणिः -स्त्री. लिं.- hand- शस्त्रम् पाणौ (पाण्याम्) यस्य सः- शस्त्रपाणिन्- बहुव्रीहि स., नखिन्- न. लि. -one who has nails, claws- नखः, नखम्- a nail of a finger or toe, claw- यत् नखानि युक्त: अस्ति तत् - नखिन्- बहुव्रीहि स., शृङ्गिन्- पु. लि. -one who has horns, स्त्रीषु & राजकुलेषु- with in स. वि. ब. व. of स्त्री- स्त्री. लिं.- a woman, female & राजकुलम्- न. लिं.- royal household, members of royal family- राजन्- पु. लिं.- King & कुलम्- न. लिं. race, family, house- राज्ञः कुलम्- राजकुलम्- ष. तत्पुरुष स., विश्वासः- trust, faith confidence & कर्तव्य: -to be done- कर्तव्य (also करणीय कार्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do,- both पु. लिं. प्र. वि. ए. व., तथा- like wise, also, and, न- no, not, एव- just, mere, only नैव- never, not at all- all अव्यय

**भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरांगना।**
**विभवो दानशक्तिश्च नाऽल्पस्य तपसः फलम्**॥२.२॥

भोज्यं, भोजनशक्तिः च, वरांगना रतिशक्तिः (च, तथा) विभवः दानशक्तिः च, न अल्पस्य तपसः फलम् (अस्ति)॥

Having a tasty meal and good digestive power, having a beautiful woman and ability to enjoy her, having a plenty of wealth and an inclination to donate are not a reward for a small penance (but needs hard work).

*This may be true in case of a woman with handsome husband too!*

भोज्यम्- food, a store of provisions, eatables- भोज्य- (also-भोक्तव्य, भोग्य & भोजनीय)- क. वि. धा. सा. वि. of भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to eat, enjoy, possess) & फलम्- fruit, result, reward- both in न. लिं. प्र. वि. ए. व., भोजनशक्तिः- digestion power, capacity to eat- भोजनम्- न. लिं- food, meal, शक्तिः- स्त्री. लिं- capacity, strength, ability- (शक्- शक्नोति ५ ग. प. प. to be able,

have power)- भोजने शक्तिः- भोजनशक्तिः, रतिशक्तिः- ability in love making- रतिः- स्त्री. लिं.- love, affection, sexual enjoyment- रत्याम् शक्तिः- रतिशक्तिः, दानशक्तिः- ability to give- दानम्- न. लिं- giving, granting, दाने शक्तिः- दानशक्तिः- all स. तत्पुरुष स. & वरांगना- a beautiful woman- वर- adjctv- best, excellent, beautiful, अंगना- a woman, female- वरा अंगना- वरांगना- वि. पू. प. कर्मधारय स.- all in स्त्री. लिं. प्र. वि. ए. व., विभवः- wealth, prosperity, riches- in पु. लिं. प्र. वि. ए. व., अल्पस्य & तपसः- both in न. लिं. ष. वि. ए. व. of अल्पम्- adjctv- small, minor, little & तपस्- penance, religious austerity, च- and, न-no, not- both अव्यय

**नदीतीरे च ये वृक्षाः, परगेहेषु कामिनी।**
**मन्त्रिहीनाश्च राजानः शीघ्रं नश्यन्त्यसंशयम्**॥२.१५॥

ये वृक्षाः नदीतीरे च (तिष्ठन्ति), (या) कामिनी परगेहेषु (वसति), (ये) राजानः मन्त्रिहीनाः च (सन्ति), एते असंशयं शीघ्रं नश्यन्ति॥

Those trees that grow on riverbanks, a beautiful woman living in other's homes and Kings without ministers are sure to perish in no time.

*A woman gone to somebody else's home may be abused. We can replace a woman with wealth, improperly obtained, will be lost. अधर्मे प्राप्ता संपत्ति!*

ये, वृक्षाः, राजानः & मन्त्रिहीनाः - all in पु. लिं. प्र. वि. ब. of यद्- who, which, वृक्षः- tree, राजन्- King & मन्त्रिहीनः- one who is without a minister- मन्त्रिः- minister, councillor, हीनः- one who is without- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon, forsake- मन्त्रिणा हीनः- मन्त्रिहीनः- तृ. तत्पुरुष स., नदीतीरे- on the banks of a river- in न. लिं. स. वि. ए. व. of नदीतीरम्- river bank- नदी- स्त्री. लिं.- river, तीरम्- bank shore- नद्याः तीरम्- नदीतीरम्- ष. तत्पुरुष स., कामिनी- lustful, lovely woman- in स्त्री. लिं. प्र. वि. ए. व., परगेहेषु- न. लिं. स. वि. ब. व. of परगेहम्- पर- adjctv- other another, गेहम्- a house, habitation- परस्य गेहम्- परगेहम्- ष. तत्पुरुष स., नश्यन्ति- वर्त. प्र..पु. ब. व. of नश्- नश्यति ४ ग. प. प. to get destroyed, perish, असंशयम्- no doubt, surely- संशयम्, uncertainty, hesitation- न संशयम्- असंशयम्नञ् तत्पुरुष स., च-and & शीघ्रम्- quickly, in no time, swiftly- both अव्यय

**निर्धनं पुरुषं वेश्या प्रजा भग्नं नृपं त्यजेत्।**
**खगा वीतफलं वृक्षं भुक्त्वा चाभ्यागतो गृहम्** ॥२.१७॥

वेश्या निर्धनं पुरुषं त्यजेत्। प्रजाः भग्नं नृपं (त्यजेयुः।) खगाः वीतफलं वृक्षं (त्यजेयुः)।(तथा) अभ्यागतः भुक्त्वा च गृहं (त्यजेत्)॥

A prostitute should leave a person with no money. Subjects should desert an impaired King. Birds should abandon a tree with no fruits and a guest should leave a house after enjoying the hospitality.

*No trader deals with a person without any money! I would change वेश्या to a वैश्यः - any merchant or a trader.*

वेश्या- courtesan, prostitute, concubine-in स्त्री. लिं. प्र. वि. ए. व., प्रजाः- स्त्री. लिं. प्र. वि. ब. व. of प्रजा- subject, people, mankind & खगाः- पु. लिं. प्र. वि. ब. व. of - खगः- a bird- खम्- sky- खे गच्छति इति- खगः- उपपद तत्पुरुष स., निर्धनम्, पुरुषम्, भग्नम्, नृपम्, वीतफलम् & वृक्षम्- all in पु. लिं. द्वि. वि. ए. व. of निर्धनः- a poor person, one who is without wealth- निर्गतम् धनम् यस्मात् सः- निर्धनः- बहुव्रीहि स., पुरुषः- man, person, भग्नः- impaired, broken, defeated- क. भू. धा. वि. of भंज्- भनक्ति ७ ग. प. प. to devastate, shatter, break, नृपः- Ruler, King- (नृ- a man, person- नृन् पाति इति- नृपः- उपपद तत्पुरुष स.), वीतफलः- one which is devoid of fruit- वीत- gone, departed, disappeared- क. भू. धा. वि. of वि+ इ- to be without, to depart- (इ- एति २ ग. प. प. to go, to go to) & फलम्- fruit- वीतं फलं वीतफलम् - वि. पु. प. कर्मधारय स., & वृक्षः- a tree, अभ्यागतः- a guest, visitor, a person arrived- अभ्यागत- क. भू. धा. वि. of अभि+ आ+ गम्- to arrive- (गम्- गच्छति १ ग. प. प. to go)- all in पु. लिं. प्र. वि. ए. व., गृहम्- house, dwelling- in न. लिं. द्वि. वि. ए. व., भुक्त्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to eat, enjoy, त्यजेत्- विध्यर्थ तृ. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave.

**दुरधीता विषं विद्या अजीर्णे भोजनं विषम्।**
**विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम्**॥४.१५॥

दुरधीता विद्या विषं (भवति)।अजीर्णे भोजनम् विषं (भवति)। दरिद्रस्य गोष्ठी विषं (भवति)। वृद्धस्य तरुणी विषं (भवति)॥

Bad education is a poison. A meal after indigestion will make it worse. A poor man, wasting his time in meaningless talks, will harm himself. An old man with a young girl may have heart attack!

*A marriage with a young girl may cause harm to the old man. But there are many other excessive activities, extra risks etc that may cause problems for older people. Why focus on an unpleasant situation where the young girl was probably forced to marry an old man?*

विद्या-Knowledge, Education, दुरधीता- दुर्-अव्यय- prefix used to convey sense of: bad, wicked, अधीत- learnt, studied- क. भू. धा. वि. of अधि+इ- (इ-एति २ ग. प. प. to go, to go to), गोष्ठी- chitchat, discourse & तरुणी- young girl, woman- all in स्त्री. लिं. प्र. वि. ए. व., अजीर्णे- during indigestion- स. वि. ए. व. of अजीर्ण-

adjctv- indigestion, undigested- न जीर्ण- नञ्तत्पुरुष स. -जीर्ण- adjctv- digested, old, worn-out- क. भू. धा. वि. of जॄ - (दीर्घ)- जरति १ ग. प. प., जीर्यति ४ ग. प. प., जृणाति ९ ग. प. प. & जारयति-ते-१० ग. उ. प. To grow old; भोजनम्- food, meal & विषम्- poison, venom, negative impact- both न. लिं. प्र. वि. ए. व., दरिद्रस्य & वृद्धस्य- पु. लिं. ष. वि. ए. व. Of दरिद्र- poor & वृद्ध- old, aged- क. भू. धा. वि. of वृध्- वर्धते १ ग. आ. प. to grow, increase.

**वित्तेन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।**
**मृदुना रक्ष्यते भूपः सत्स्त्रिया रक्ष्यते गृहम्**॥५.९॥

धर्मः वित्तेन रक्ष्यते। विद्या योगेन रक्ष्यते। भूपः मृदुना रक्ष्यते। सत्स्त्रिया गृहं रक्ष्यते॥

Dharma is protected by wealth. Knowledge is preserved by its constant application. A King is protected by his modesty. A household is protected by a good woman.

*Dharma can grow if supported by money. Knowledge is enhanced by giving it away. Modesty is a great virtue for politicians for re-elections.*

*A household managed, not just by good women but by good people is well respected. Alternately, we can say मृदुना रक्ष्यते भूपः, सत्जनेन गृहमपि!*

धर्मः- right codes of conduct (Dharma) & भूपः- King- भूः- earth- भुवम् पाति इति- भूपः- उपपद तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., विद्या- knowledge, learning, training- in स्त्री. लिं. प्र. वि. ए. व., गृहम्- house, household, dwelling- in न. लिं. प्र. वि. ए. व., वित्तेन, योगेन, मृदुना & सत्स्त्रिया- all in तृ. वि. ए. व. of वित्तम्- न. लिं.- money, wealth, property, possession- वित्त- क. भू. धा. वि. of विद्- विंदति- ते ६ ग. उ. प. to get, acquire, gain, योगः- पु. लिं- application, employment, contact, touch, मृदु- adjctv- tender, delicate, subtle, soft, & सत्स्त्री- स्त्री. लिं.- well-behaved or noble woman- सत्- noble, well-behaved, good & स्त्री- woman, lady- सती स्त्री- सत्स्त्री- वि. पू. प. कर्मधारय स. रक्ष्यते- gets protected- कर्मणि प्रयोग प्र. पु. ए. व. of रक्ष्- रक्षति १ ग. प. प. to protect, to guard

**तृणं ब्रह्मविदः स्वर्गं तृणं शूरस्य जीवनम्।**
**जिताक्षस्य तृणं नारी निःस्पृहस्य तृणं जगत्**॥५.१४॥

ब्रह्मविदः स्वर्गं तृणं, शूरस्य जीवनं तृणं, जिताक्षस्य नारी तृणं (तथा) निःस्पृहस्य जगत् तृणं (भवति)॥

The heaven is like a straw for the Realised person. Life is like a straw for a brave person. A woman is like a straw for a person who has control over

the senses of enjoyment. The world itself is like a straw for the one who is free from all desires.

*Here a woman is considered an object of enjoyment. One can substitute नारी with अर्थ- money, wealth.* जिताक्षस्य तृणम् अर्थम्॥

ब्रह्मविदः, शूरस्य, जिताक्षस्य & निःस्पृहस्य- पु. लिं. ष. वि. ए. व. of ब्रह्मविद्- one who has knowledge of the Supreme Spirit, a Realized person- ब्रह्मन्- न. लिं.- the Supreme-being, the Creator विद्- adjctv- an affix implies: knowing, conversant with- (ब्रह्म वेत्ति इति- उपपद तत्पुरुष स.), शूर- barve, valiant, जिताक्ष- one who has control over his senses - जित- won, conquered- क. भू. धा. वि. of जि-जयति १ ग प. प. to win, conquer-अक्षम्- an organ of sense - जितानि अक्षाणि येन सः- जिताक्षः - बहुव्रीहि स. & निःस्पृह- (निस् स्पृह)-one who is free from desires- निस्- अव्यय- suffix implies devoid of, absence of, स्पृहा- स्त्री. लिं.- desire- निर्गता स्पृहा यस्मात् सः- बहुव्रीहि स., स्वर्गम्, तृणम्, जीवनम् - न. लिं. प्र. वि. ए. व. of- स्वर्ग- heaven, तृण-straw, grass, (तृणं -तृणवत् / तृणसदृशं जीवन- living, being alive & जगत्- world, नारी- woman- स्त्री. लिं. प्र. वि. ए. व.

**ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी।**
**भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः**॥६.११॥

पिता ऋणकर्ता शत्रुः (भवति), माता व्यभिचारिणी च (शत्रुः भवति), रूपवती भार्या शत्रुः (भवति), पुत्रः अपण्डितः शत्रुः (भवति)॥

A debt ridden father or an adulterous mother or a beautiful wife or a stupid son is (as bad as) one's enemy.

*A son is eventually responsible for the debts incurred by his father. He would be looked down in the society if his mother goes astray. One should be proud of a beautiful wife. However, the husband has to worry that others do not steal her away or she may herself run away for better pastures. Just like a husband worries about a beautiful wife, the wife can also consider her husband as an enemy if he runs after other women!*

पिता (पितृ)- ऋणकर्ता- one who makes debts- ऋणम्- debt, कर्ता (कतृ)- adjctv- doer, maker, creator- ऋणस्य कर्ता- ष. तत्पुरुष स., शत्रुः- an enemy, पुत्रः- son अपण्डितः- a stupid, foolish- पण्डितः- a wise man, an intelligent person, an expert- न पण्डितः- अपण्डितः- नञ् तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., माता (मातृ)- mother, व्यभिचारिणी (व्यभिचारिन्)- adjctv- one who goes astray, adulterous, unchaste- (वि+अभि+चर् - to go astray, deviate from the right path- चर्- चरति१ ग. प. प. to walk, move, go about), रूपवती- one who is beautiful- रूपम्- figure, appearance, beautiful form, वत् (वती)- adjctv- an affix added

to noun implies 'possession', 'quality' भार्या- wife- all in स्त्री. लिं. प्र. वि. ए. व.,च- and- अव्यय

**शुद्धं भूमिगतं तोयं शुद्धा नारी पतिव्रता।**
**शुचिः क्षेमकरो राजा सन्तोषी ब्राह्मणः शुचिः**॥८.१७॥

भूमिगतं तोयं शुद्धं (भवति)। पतिव्रता नारी शुद्धा (अस्ति)। क्षेमकरः राजा शुचिः (गण्यते) । (तथा) सन्तोषी ब्राह्मणः शुचिः (भवति)॥

The water percolated through the earth is pure. A devout wife is considered a chaste woman, a King engaged in welfare of his subjects is considered as undefiled ruler and a satisfied or contended Brahmin is considered a pious one.

*We can easily add a पाठभेद - पतिव्रतः नरः, ब्राह्मणः - अतिथिः*

*The water percolated through the earth is pure. A devout wife or a husband is pious. A King engaged in welfare of his subjects is virtuous. A satisfied guest is a pious one.*

भूमिगतम्- one that has gone into the earth- भूमिः- earth, ground, गत- gone, entered- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go- भूमौ गतम्- स. तत्पुरुष स., तोयम्- water, शुद्धम्- pure, purified, clean, chaste, undefiled, innocent- शुद्ध- क. भू. धा. वि. of शुध्- शुध्यति ४ ग. प. प.to be purified, clean- all in न. लिं. प्र. वि. ए. व., शुद्धा- pure, chaste, नारी- woman, पतिव्रता- a devoted or faithful wife- पतिः- husband, व्रता- devoted, faithful- पतये व्रता - च. तत्पुरुष स.- in स्त्री. लिं. प्र. वि. ए. व., शुचिः- adjctv- pure, resplendent, virtuous, pious, क्षेमकरः- propitious, protecting peace and happiness, beneficial- क्षेम- adjctv- well-being, comfort, beneficial, करः- doer- क्षेमम् कारयति इति- उपपद तत्पुरुष स., राजा (राजन्)- King, Ruler, सन्तोषी (सन्तोषिन्)- satisfied, contended, happy, ब्राह्मणः- a member of a priestly class, 'Brahman'- all in पु. लिं. प्र. वि. ए. व.

**असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभृतः।**
**सलज्जा गणिका नष्टा निर्लज्जाश्च कुलाङ्गनाः**॥८.१८॥

असन्तुष्टाः द्विजाः नष्टाः, सन्तुष्टाः महीभृतः (महीभुजाः) च (नष्टाः), सलज्जाः गणिकाः नष्टाः ( तथा) निर्लज्जाः कुलाङ्गनाः च (नष्टाः भवन्ति)॥

Unsatisfied Brahmins, happy Kings, modest courtesans and immodest women from respectable families are ruined.

*Brahmins are invited for religious rituals. If they tend to be unhappy even with generous donations, nobody will call them again and their reputation*

*will be destroyed. Kings must not be happy with status quo because there is always work to be done to keep the society happy. A courtesan will not earn money unless she exposes herself here and there. A shameless woman from a good family will be chastised. This will be also true of men who go astray.*

सन्तुष्टाः, असन्तुष्टाः, द्विजाः, नष्टाः, महीभृतः & महीभुजाः- all in पु. लिं. प्र. वि. ब. व. of सन्तुष्टः- satisfied, happy, contented, असन्तुष्टः- unsatisfied, unhappy- न सन्तुष्टः- असन्तुष्टः- नञ् तत्पुरुष स.- सन्तुष्ट- क. भू. धा. वि. of सं+ तुष्- to be well satisfied, contented- (तुष्- तुष्यति ४ ग. प. प. to be satisfied, contented, pleased), द्विजः- a member of priestly class, brahman, twice born, नष्टः- ruined, got destroyed, lost- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, destroyed, महीभृत् & महीभुजः- King, ruler- मही- earth, land, ground- महीम् बिभर्ति इति- महीभृत् & महीम् भुनक्ति इति- महीभुजः,- Governs Earth- both उपपद तत्पुरुष स., सलज्जा- modest, bashful- लज्जा- modesty, shame- लज्जया सह या सा- सलज्जा- सहबहुव्रीहि स., गणिका- a courtesans, harlot, नष्टा (नष्ट)- destroyed- all in स्त्री. लिं. प्र. वि.ए. व., निर्लज्जाः & कुलाङ्गनाः- both in स्त्री. लिं. प्र. वि. ब. व. of निर्लज्जा- shameless, immodest- निर्गता लज्जा यस्याः सा- प्रादिबहुव्रीहि स. & कुलाङ्गना- woman from good family, respectable, chaste lady- कुलम्- न. लिं- family, race, अङ्गना- lady, woman- कुले जाता अङ्गना या सा- कुलाङ्गना- बहुव्रीहि स., च- and-अव्यय

**अग्निरापः स्त्रियो मूर्खाः सर्पा राजकुलानि च।**
**नित्यं यत्नेन सेव्यानि सद्यः प्राणहराणि षट्**॥१४.१२॥

अग्निः, आपः, स्त्रियः, मूर्खाः, सर्पाः, राजकुलानि च नित्यं यत्नेन सेव्यानि (भवन्ति)। (ते) सद्यः प्राणहराणि षट् (सन्ति)॥

Fire, water, women, stupid people, snakes and the royal family should always be handled with utmost care. These six could be very dangerous without warning.

*It is not clear why women are included in this list of dangerous people.*

अग्निः- fire- in पु. लिं. प्र. वि. ए. व., आपः (आपस्)- water- in न. लिं. प्र. वि. ए. व., स्त्रियः- in स्त्री. लिं. प्र. वि. ब. व. of स्त्री- a woman, मूर्खाः & सर्पाः- both in पु. लिं. प्र. वि. ब. व. of मूर्खः- a stupid or foolish person & सर्पः- a snake, serpent, राजकुलानि, सेव्यानि, प्राणहराणि & षट्- all in न. लिं. प्र. वि. ब. व. of राजकुलम्- a royal family, a king's household- राजन्- a King, कुलम्- family, race- राज्ञः कुलम्- ष. तत्पुरुष स., सेव्यम्- one, that to be served, attended to- सेव्य (also सेवितव्य & सेवनीय)- क. वि. धा. सा. वि. of सेव्- सेवते १ ग. आ. प. to serve, attend to, wait upon, प्राणहरम्- deadly, very dangerous- प्राणः- the breath of life,

life- प्राणान् हरति इति- प्राणहरम्- उपपद तत्पुरुष स. & षट् - six यत्नेन- पु/न. लिं. तृ. वि. ए. व. of यत्न- effort, exertion, diligence, care- (यत्- यतते १ ग. आ. प. to attempt, strive), च-and, नित्यम्- always, सद्यः (सद्यस्)- instantly, immediately, suddenly- all अव्यय

**एक एव पदार्थस्तु त्रिधा भवति वीक्षितः।**
**कुणपं कामिनी मांसं योगिभिः कामिभिः श्वभिः**॥१४.१६॥

एकः एव पदार्थः तु (त्रिभिः) वीक्षितः त्रिधा भवति, (यथा स्त्रियः शरीरं) योगिभिः कुणपम् (इव), कामिभिः कामिनी (इव), (तथा) श्वभिः मांसम् (इव दृश्यते)।

Just one single object, viewed by three different persons, can be perceived in three different ways. A woman's body is viewed as a useless item by saints, as an attractive woman by lustful men and only as a piece of meat by dogs.

*Again, there is no reason to treat women as an object of enjoyment*.

एकः- single, one, पदार्थः- an item, a thing, an object & वीक्षितः- one, which is viewed, observed, glanced- वीक्षित- क. भू. धा. वि. of वि+ ईक्ष्- to behold, perceive- (ईक्ष्- ईक्षते १ ग. आ. प. to see, observe)- all in पु. लिं. प्र. वि. ए. व., भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to become, to exist, योगिभिः, कामिभिः & श्वभिः- all in पु. लिं. तृ. वि. ब. व. of योगिन्- a saint, an ascetic, कामिन्- a lover, a lustful person & श्वन्- a dog, कुणपम्- न. लिं- a term often used as a word of contempt with living beings, a dead body, corpse, कामिनी- स्त्री. लिं.- a beloved, a lustful woman, मांसम्- न. लिं- a piece of meat, flesh- all in प्र. वि. ए. व., एव- only, just, merely, तु- but, on the other hand & त्रिधा- trebly, in three ways or parts- all अव्यय

**किं तया क्रियते लक्ष्म्या या वधूरिव केवला।**
**या तु वेश्यैव सामान्यपथिकैरपि भुज्यते**॥१६.१२॥

किं तया लक्ष्म्या क्रियते, या वधूः इव केवला (वर्तते)? या वेश्या इव सामान्यपथिकैः अपि भुज्यते तु (सा हितकरा/उपयुक्ता भवति) ॥

What is the use of that wealth if it is like a wife (who serves only her husband)? The wealth should be like a prostitute, who serves even to common travellers.

*This Subhashit has a good message to distribute one's wealth to many people. However, it appears misogynist by the examples of a bride and a prostitute. One possibility is that the writer is using "exaggerated*

*examples"-अतिशयोक्ति - to convey the message. Secondly, it may be just a "tongue-in-cheek" discussion among men! Either way, we need a better example. Here is an alternative:*

*किं तया क्रियते लक्ष्म्या या गृहबन्धा केवला। या वृक्षाणां छाया: इव पथिकैरपि भुज्यते॥*

*What is the use of that wealth if it is only stored in the home? The wealth should be like shades of tress that serve all travellers.*

तया & लक्ष्म्या- both in- स्त्री. लिं. तृ. वि. ए. व. of ता -she & लक्ष्मीः- fortune, wealth, prosperity, wealth, या- who, वधूः- wife, bride, spouse, केवला- adjctv- mere, sole, alone, वेश्या- prostitute, courtesan, concubine- all in- स्त्री. लिं. प्र. वि. ए. व., सामान्यपथिकैः- in- पु. लिं. तृ. वि. ब. व. of सामान्यपथिकः- सामान्य- adjctv- common, general, ordinary, पथिकः- traveller, way-farer- सामान्यः पथिकः- वि. पू. प. कर्मधारय स., क्रियते & भुज्यते- both कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make & भुज्- भुनक्ति भुंक्ते ७ ग. उ. प. to enjoy, use, eat, possess, किम्- interrogative particle- what, what for, इव- like, similar to, अपि- also, even, तु- on the other hand, but, and now- all अव्ययs

## *10.3 Unreasonable Verses (अतर्क्य)*

Some verses in Cāṇakya Nīti defy logic. Others are not supported by any credible data. Here are a few!

**नराणां नापितो धूर्तः पक्षिणां चैव वायसः।**
**चतुष्पदां श्रृगालस्तु स्त्रीणां धूर्ता च मालिनी**॥५.२१॥

नराणां नापितः धूर्तः (अस्ति), पक्षिणां च एव वायसः (धूर्तः अस्ति), चतुष्पदां श्रृगाल: तु (धूर्तः अस्ति तथा) स्त्रीणां च मालिनी धूर्ता (अस्ति)॥

A barber is cunning among men. A crow is a swindler among the birds. A fox is cunning among four legged animals. A female garland-maker is the crafty one.

We are not sure about the logic behind these assertions.

नराणाम्, पक्षिणाम् & चतुष्पदाम्- all in पु. लिं. ष. वि. ब. व. of नरः- a man, human, male, पक्षिन्- a bird- adjctv- winged, one with the wings & चतुष्पदः- a quadruped, an

animal- चतुर्- a numerical adjctv- four, पदम्- foot- चत्वारि पदानि यस्य सः- बहुव्रीहि स., नापितः- a barber, shaver, धूर्तः- a cheat, crafty, swindler,cunning वायसः- a crow,
शृगालः- fox- all in पु. लिं. प्र. वि. ए. व., स्त्रीणाम्- in स्त्री. लिं. ष. वि. ब. व. of स्त्री- a woman, female, धूर्ता- cunning cheat & मालिनी- a female garland maker or wife of a garland maker, florist- both in स्त्री. लिं. प्र. वि. ए. व., तु- but, on the other hand, च- and & एव- just, only, merely- all अव्यय

**पक्षिणां काकश्चाण्डालः पशूनां चैव कुक्कुरः।**
**मुनीनां कोपी चाण्डालः सर्वेषां चैव निन्दकः**॥६.२॥

पक्षिणाम् काकः चाण्डालः (भवति)। पशूनां च एव कुक्कुरः (चाण्डालः भवति)। मुनीनां कोपी चाण्डालः (भवति)। तथा सर्वेषां च एव निन्दकः (चाण्डालः भवति)॥

A crow is the most despised among birds. Among the animals, it is the dog. An angry sage is the worst among sages. But among all, a person who criticizes others constantly is the most despised one.

*A dog is one of the most beloved pets! Why is it an outcast?*

काकः- a crow, कुक्कुरः- a dog, चाण्डालः-adjctv- a person of wicked /cruel deeds, an outcast, कोपी (कोपिन्)- an angry man, one of angry nature & निन्दकः- a defaming or abusing person- (निन्द्- निन्दति १ ग. प. प. to blame, censure, find fault- निन्दा- blame, censure- निन्दाम् करोति इति- उपपद तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., पक्षिणाम्, पशूनाम्, मुनीनाम् & सर्वेषाम्- all in पु. लिं. ष. वि. ब. व. of पक्षिन्- adjctv- a bird, one with wings, पशुः- an animal, beast, मुनिः- a sage, holy man, saint & सर्वः- all, everyone, च- and & एव- only, merely-both अव्यय

**भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति।**
**रजसा शुध्यते नारी नदी वेगेन शुध्यति**॥६.३॥

कांस्यं भस्मना शुध्यते, ताम्रं अम्लेन शुध्यति, नारी रजसा शुध्यते (तथा) नदी वेगेन शुध्यति॥

An article of bronze gets cleaned by ashes. Copper article gets cleaned with vinegar or tamarind. A woman gets purified by menstrual cycle and a river is purified by the speed of its currents.

*The menstrual cycle is a natural function and has nothing to do with a woman's body cleanliness or purity.*

कांस्यम्- bronze & ताम्रम्- copper- both in- न. लिं. प्र. वि. ए. व., भस्मना- न. लिं. तृ. वि. ए. व. of भस्मन्- ashes, अम्लेन, रजसा & वेगेन- all in पु. लिं. तृ. वि. ए. व. of अम्लः- sourness, vinegar (अम्लफलम्- tamarind fruit), रजस्- dust, dirt, menses & वेगः- speed, velocity, force, नारी- a woman & नदी- river, any flowing stream- both in स्त्री. लिं. प्र. वि. ए. व., शुध्यति- वर्त. प्र. पु. ए. व. of शुध्- ४ ग. प. प. to become pure or purified, शुध्यते- gets purified, cleaned- कर्मणि प्रयोग प्र. पु. ए. व. of शुध्- शुध्यति

**दुर्जनं सज्जनं कर्तुमुपायो नहि भूतले।**
**अपानं शतधा धौतं न श्रेष्ठमिन्द्रियं भवेत्**॥१०.१०॥

दुर्जनं सज्जनं कर्तुम् उपायः भूतले नहि (वर्तते)। अपानं शतधा धौतं, श्रेष्ठम् इन्द्रियम् न भवेत्॥

There is no method to turn a wicked person into a virtuous one. Even after washing it hundred times, the anus does not achieve an eminent position among tall body organs.

*Although an anus is one of the five organs of action- कर्मेन्द्रिय, it does not get the prestige of other organs of actions - mouth, hands, feet and genitals because its function is such that it must be washed multiple times! We can substitute a pig for anus to convey the same message. The pig has a habit of rolling in mud to cool off, so it will still get dirty after many baths.*

*पाठभेद - अपानं -->सुकरं - a pig, इन्द्रियम् -->पशुं हि सुकरं शतधा धौतं न भवति पशुश्रेष्ठः॥*

दुर्जनम्, सज्जनम् & अपानम्- पु. लिं. द्वि. वि. ए. व. of दुर्जन- wicked or bad person- दुष्टः जनः & सज्जन- virtuous or good person- सत् जनः- both प्रादि कर्मधारय स. & अपान- anus- (also means breathing out), कर्तुम्- to make or prepare- हेत्वार्थ तुमन्त धा. सा. अव्यय of कृ-करोति- कुरुते ८ ग. उ. प. to do, make, उपायः- means, remedy, way, stratagem- पु. लिं. प्र. वि. ए. व., नहि- अव्यय- just not, surely not, भूतले- न. लिं. स. वि. ए. व. of भूतल- surface of the earth- भू - स्त्री. लिं.- earth, globe, तल- न. लिं- surface, भुवः तलम्- ष. तत्पुरुष स., शतधा- अव्यय- hundred times/ways- (शत- hundred), धौतम्- washed, cleaned- धौत (धूत, धून)- क. भू. धा. वि. धू-६ ग. प. प. & १, ५, ९ & १० ग. उ. प.- to wash, clean, shake off, श्रेष्ठम्- adjctv- best, excellent, pre-eminent & इन्द्रियम्- bodily organ, भवेत्- विध्यर्थ प्र. पु. ए. व. of भू-भवति १ ग. प. प. to become

**अन्नाद्दशगुणं पिष्टं पिष्टाद् दशगुणं पयः।**
**पयसोऽष्टगुणं मांसं मांसाद्दशगुणं घृतम्**॥१०.१९॥

पिष्टम् अन्नाद् दशगुणम् (अस्ति)। पयः पिष्टाद् दशगुणम् (अस्ति)। मांसं पयसः अष्टगुणम् (अस्ति)। घृतं मांसाद् दशगुणम् अस्ति॥

(Food prepared with) ground flour is ten times (more nutritious) than boiled rice. Milk is ten times (more nutritious) the ground flour. Meat is eight times (more nutritious) than milk and ghee is ten times (more nutritious) than meat!

*How the nutritional contents of the various foods were arrived at?*

अन्नात्, पिष्टात्, मांसात् & पयसः- all in न. लिं. पं. वि. ए. व. of अन्नम्- boiled rice (also means food in general), पिष्टम्- ground flour (also means anything ground in general- पिष्ट- क. भू. धा. वि. of पिष्- पिनष्टि ७ ग. प. प. to pound, grind, crush), मांसम्-meat, flesh & पयस्- milk (also commonly means water), दशगुणम्- ten times or folds, अष्टगुणम्- eight times or folds, (दशन्- ten, अष्टन्- eight & गुणः- times or folds (गुणः has other meanings too, like: quality, property, a wick, rope, thread etc., पयः (पयस्)- milk, मांसम्- meat, घृतम्- ghee, clarified butter- all in न. लिं. प्र. वि. ए. व.

**शाकेन रोगा वर्धन्ते पयसा वर्धते तनुः।**
**घृतेन वर्धते वीर्यं मांसान्मांसं प्रवर्धते** ॥१०.२०॥

शाकेन रोगाः वर्धन्ते, पयसा तनुः वर्धते, घृतेन वीर्यम् वर्धते (तथा) मांसात् मांसं प्रवर्धते॥

Consumption of vegetables increases (various diseases). Milk builds (strong) body. Ghee increases virility. Consumption of meat develops more flesh (on your body).

*This verse does not make sense as there is no data or logic behind this. Secondly, the latest research shows consumption of meat is bad for health and the environment. Vegetables are great for a healthy body. Thirdly, it contradicts an earlier verse, which says meat eaters are burdensome on this Earth. Here is an alternate verse, still with without much logic no logic to it - just tongue- in- cheek version.*

*रोगा मान्सेन वर्धन्ते पयसा वर्धते मतिः। घृतेन वर्धते वीर्यं शाकेन वर्धते तनुः॥*

*Meat consumption causes bad health. Water increases intelligence. Ghee increases virility. Vegetables strengthen the body.*

शाकेन, पयसा & घृतेन- all in तृ. वि. ए. व. of शाकः/कम्- पु/न. लिं- leafy vegetable, पयस्- न. लिं- milk (also mean water) & घृतम्- ghee, clarified butter, रोगाः- in पु. लिं. प्र. वि.. ब. व. of रोगः- disease, sickness, वर्धते & वर्धन्ते- in वर्त. प्र. पु ए. व. & ब. व. of वृध्- १ ग. आ. प. to grow, increase, rise & प्रवर्धते- वर्त. प्र. पु ए. व. of प्र+ वृध्- to increase very much, तनुः- body- in पु. लिं. प्र. वि.. ए. व., वीर्यम्- strength, virility, energy- in न. लिं. प्र. वि. ए. व., मांसम् & मांसात्- in in न. लिं. प्र. वि. & पं वि. ए. व. of मांसम्- flesh, meat.

**यस्य चाप्रियमिच्छेत्तु तस्य ब्रूयात्सदा प्रियम्।**
**व्याधो मृगवधं कर्तुं गीतं गायति सुस्वरम्**॥१४.१०॥

पाठभेद: यस्माच्च प्रियमिच्छेत्तु ।

(यथा) व्याधः मृगवधं कर्तुं सुस्वरं गीतं गायति, (तथा मनुष्यः), यस्य अप्रियं च इच्छेत् तु, तस्य सदा प्रियं ब्रूयात्॥ (यस्माच्च प्रियमिच्छेत्तु, तस्य सदा प्रियं ब्रूयात्॥)

One should always speak pleasantly to someone if he wants to hurt him (or he wishes well), just like a hunter, wanting to kill a deer, plays melodious tunes (for attracting them).

*This is a contradictory verse. Yes, the hunter tries to attract a deer. The verse says that one should talk pleasantly with someone you want to hurt.*

*But the alternate says one should talk pleasantly to someone whom he wishes well. We like the alternate but the example is still wrong.*

यस्य- whose & तस्य- his- both in पु.लिं. ष. वि. ए. व. of यद्- who & तद्- he, प्रियम्- adjctv- pleasant, agreeable- न प्रियम्- अप्रियम्- harsh, hurtful- नञ् तत्पुरुष स., गीतम्- song (गीत- क. भू. धा. वि. of गै- गायति १ ग. प. प. to sing), सुस्वरम्- melodious tune- सु- अव्यय- good, स्वरम्- tune, sound, noise- सुभगम् स्वरम्- प्रादि कर्मधारय स., मृगवधम्- killing of an animal- मृगः- an animal, deer, वधः- killing, murder (वध्- वधति १ ग. प. प. to kill, slay)- मृगस्य वधः- ष. तत्पुरुष स.- all in पु/न. लिं. द्वि. वि. ए. व., इच्छेत् & ब्रूयात्- both विध्यर्थ प्र. पु. ए. व. of इष्- इच्छति ६ ग. प. प. to desire, want, wish for & ब्रू- ब्रवीति ब्रूते २ ग. उ. प. to say, talk, व्याधः- hunter- in पु. लिं. प्र. वि. ए. व., कर्तुम्- पू. का. वा. धा. सा. तुमन्त-हेत्वर्थक अव्यय of कृ- करोति कुरुते ८ ग. उ. प. to do, गायति- वर्त. प्र. पु. ए. व. of गै- see above, च-and, तु- if, but, on the other hand, even then, सदा- always, - all अव्यय

★★★★★★

# Epilogue (सारांश)

In this book, we have tried to analyze the Cāṇakya Nīti Saṃskṛta Verses with detailed Grammar & Meaning plus our own commentary. We have added background information that is needed to explain many verses. We have also suggested some alternate words for some discriminatory verses and still bring the essence of those verses to modern demographics and changing values.

As we stated earlier, the do's and don'ts that are prescribed and definitions of what is right and what is wrong are as valid today as they were 2500 years ago. We hope people across the world follow them in their daily lives and or their chosen professions.

We are sure that there are many mistakes in this book. We also understand many verses would still need more explanations. We would appreciate if the readers can give us feedback on this book with an email to pamag43@gmail.com.

# References

1. Chanakya Neeti: By B.K. Chaturvedi, DiamondPocket Books, New Delhi.
2. संपूर्ण चाणक्य नीती (मराठी) - पुष्पा ठक्कर, Riya Publications, Kolhapur, India
3. Wikipedia : General reference for many articles on various topics
4. https://www.easynepalityping.com/type-in-sanskrit
5. https://ashtadhyayi.com/
6. https://www.learnsanskrit.cc/
7. https://sanskritdeepika.org/index.php
8. https://mysanskritsubhashit.wordpress.com/
9. https://www.wisdomlib.org/definition/vipra
10. Chanakya Neeti: Dr. Radhakrishnan Pillai

★★★★★★